रघुवंशः

नं० ७८०-च

पत्र

७६

७२ पत्र

तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ ९ ॥ तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः
श्यामिकापि वा ॥ १० ॥ वैवस्वतो मनुर्नाम माननीयो मनीषिणां आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥ ११ ॥ तदन्वये शुद्धिम
ति प्रसूतः शुद्धिमत्तरः दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥ १२ ॥ व्यूढोरस्को वृषस्कंधः शालप्रांशुर्महाभुजः आत्मकर्म
क्षमं देहं क्षात्रो धर्म इवाश्रितः ॥ १३ ॥ सर्वातिरिक्तसारेण सर्वतेजोभिभाविना स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥ १४ ॥
आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः आगमैः सदृशारंभः आरंभसदृशोदयः ॥ १५ ॥ चतुर्भिः कालापकम् ॥ भीमकान्तै
र्नृपगुणैः स बभूवोपजीविनां अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥ १६ ॥ रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परं
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥ १७ ॥ प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् सहस्रगुणमुत्स्रष्टुमादत्ते
हि रसं रविः ॥ १८ ॥ सेना परिच्छदस्तस्य द्वयमेवार्थसाधनं शास्त्रेष्वकुंठिता बुद्धिर्मौर्वी धनुषि चातता ॥ १९ ॥ तस्य संवृतमंत्रस्य गूढाकारें
गितस्य च फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव ॥ २० ॥ जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः अगृध्नुराददे सोऽर्थमसक्तः
सुखमन्वभूत् ॥ २१ ॥ ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥ २२ ॥ अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः
तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना ॥ २३ ॥ प्रजानां विनयाधानाद्रक्षणाद्भरणादपि स पिता पितरस्तासां केवलं जन्महेतवः ॥ २४ ॥ स्थित्यै दंडयतो द

रु०

२

२

द्यान्परिणेतुः प्रसूतये । अप्यर्थकामौ तस्यास्तां धर्मायैव मनीषिणः । दुदोह गां स यज्ञाय सस्याय मघवा दिवं । संपद्विनिमयेनोभौ दधतुर्भुवनद्वयं २६ न
किलानुययुस्तस्य राजानो रक्षितुर्यशः । व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता । २७ द्वेष्योपि संमतः शिष्टस्तस्यार्तस्य यथौषधं । त्याज्यो दु
ष्टः प्रियोप्यासीदंगुलीवोरगक्षता २८ तं वेधा विदधे नूनं महाभूतसमाधिना । तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः २९ स वेलावप्रवल
यां परिखीकृतसागरां । अनन्यशासनामुर्वीं शशासैकपुरीमिव ३० तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा । पत्नी सुदक्षिणेत्यासीदध्वरस्येव द
क्षिणा ३१ कलत्रवंतमात्मानमवरोधे महत्यपि । तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ३२ तस्यामात्मानुरूपायामात्मजन्मसमुत्सु
कः । विलंबितफलैः कालं स निनाय मनोरथैः ३३ गंगां भगीरथेनेव पूर्वेषां पावनक्षमां । इच्छता संततिं तेन न्यस्तामिव स्वकोशला ३४ संता
नार्थाय विधये स्वभुजादवतारिता । तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ३५ अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया । तौ दंपती वसिष्ठस्य गुरो
र्जग्मतुराश्रमं ३६ स्निग्धगंभीरनिर्घोषमेकं स्यंदनमास्थितौ । प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ३७ मा भूदाश्रमपीडेति परिमेयपु
रःसरौ । अनुभावविशेषात्तु सेनापरिवृताविव ३८ पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः । रजोभिस्तुरगोत्कीर्णैरस्पृष्टा
श्रीरामः लकवेष्टनौ ३९ हैयंगवीनमादाय घोषवृद्धानुपस्थितान् । नामधेयानि पृच्छंतौ वन्यानां मार्गशाखिनां ४० सेव्यमानौ सुखस्प
र्शैः शालनिर्यासगंधिभिः । पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ४१ सरसीष्वरविंदानां वीचिविक्षोभशीतलं । आमोदमुपजि रामः

२

ष्वंतौ स्वनिश्वासानुकारिणं ४२ मनोभिरामाः श्रृण्वंतौ रथनेमिस्वनोन्मुखैः षड्जसंवादिनीः केकाः द्विधा भिन्नाः शिखंडिभिः ४३ पर
स्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु मृगद्वंद्वेषु पश्यंतौ स्यंदनाबद्धदृष्टिषु ४४ श्रेणीबंधाद्वितन्वद्भिरस्तंभां तोरणस्रजं सार
सैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ४५ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनां अमोघाः प्रतिगृह्णंतावर्घ्यानुपदमाशिषः
४६ कुलकम् कांप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः हिमनिर्मुक्तयोर्योगे चित्राचंद्रमसोरिव ४७ तत्तद्भूमिपतिः पत्न्यै द
र्शयन्प्रियदर्शनः अपि लंघितमध्वानं बुबुधे न बुधोपमः ४८ स दुःप्रापयशाः प्रापदाश्रमं श्रांतवाहनः सायं संयमिनस्तस्य महर्षेर्म
हिषीसखः ४९ वनांतरादुपावृत्तैः स्कंधासक्तसमित्कुशैः अग्निप्रत्युद्गमात्पूतैः पूर्यमाणं तपस्विभिः ५० आकीर्णमृषिपत्नीनामुटजद्वा
रोधिभिः अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ५१ सेकांते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकं विश्वासाय विहंगानामालवालां
बुपायिनां ५२ आतपात्ययसंक्षिप्तनीवारासु निषादिभिः मृगैर्वर्तितरोमंथमुटजांगणभूमिषु ५३ अभ्युत्थिताग्निपिशुनैरतिथीना
श्रमोन्मुखान् पुनानं पवनोद्धूतैर्धूमैराहुतिगंधिभिः ५४ कुलकं अथ यंतारमादिश्य धुर्यान्विश्रामयेति सः तामवारोहयत्प
त्नीं रथादवततार च ५५ तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेंद्रियाः अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ५६ विधेः सायंतनस्यांते स ददर्श तपोनिधिं
अन्वासितमरुंधत्या स्वाहयेव हविर्भुजं ५७ तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननंदतुः ५८ तमा

र०
·३
3

तिथ्यक्रियाशान्तरथक्षोभपरिश्रमं ॥ पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥ ५८ ॥ अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ॥ अर्थ्यामर्थप
तिर्वाचमाददे वदतां वरः ॥ उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ॥ दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदां ॥ ६१ ॥ तव मन्त्रकृतो मन्त्रैर्दूरात्संशमितारि
भिः ॥ प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥ ६२ ॥ हविरावर्जितं होतस्त्वया विधिवदग्निषु ॥ वृष्टिर्भवति सस्यानामवग्रहविशोषिणां ॥ ६३ ॥
पुरुषायुषजीविन्यो निरातङ्का निरीतयः ॥ यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसं ॥ ६४ ॥ त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ॥ सा
नुबन्धाः कथं न स्युः संपदो मे निरापदः ॥ ६५ ॥ किं तु वध्वां तवैतस्यामदृष्टसदृशप्रजं ॥ न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥ ६६ ॥ मत्परं दुर्लभं
मत्वा नूनमावर्जितं मया ॥ पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते ॥ ६७ ॥ नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ॥ न प्रकामभुजः श्राद्धे स्वधासंग्र
हतत्पराः ॥ ६८ ॥ सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ॥ प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥ ६९ ॥ लोकान्तरसुखं पुण्यं त
पोदानसमुद्भवं ॥ संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥ ७० ॥ तया हीनं विधातर्मां कथं पश्यन्न दूयसे ॥ सिक्तं स्वयमिव स्नेहाद्वन्ध्यमा
श्रमवृक्षकं ॥ ७१ ॥ असह्यपीडं भगवन्नृणमन्त्यमवेहि मे ॥ अरुंतुदमिवालानमनिर्वाणस्य दन्तिनः ॥ ७२ ॥ तस्मान्मुच्ये यथा तात संवि
धातुं तथार्हसि ॥ इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥ ७३ ॥ इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ॥ क्षणमात्रमृषिस्तस्थौ सु रामः
प्तमीन इव ह्रदः ॥ ७४ ॥ सोऽपश्यत्प्रणिधानेन संततेः स्तम्भकारणं ॥ भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ॥ ७५ ॥ पुरा शक्रमुपस्थाय तवोर्वीं ·३

पल्वलात् अल्पसरसः उत्तीर्णानि वराहयूथानि शूकरवृंदानि येषु तानि तथा । आवासवृक्षेषु उन्मुखाः अभिमुखाः बर्हिणो मयूरा येषु तानि । मृगैः हरिणैः अध्यासितानि अधिष्ठितानि शाद्वलानि येषु तानि श्यामायमानानि श्यामवर्णानि वनानि पश्यन् ययौ =१६

हरिरेणपः ११ स कीचकैर्मारुतपूर्णरंध्रैः कूजद्भिरापादितवंशकृत्यं शुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं
वनदेवताभिः १२ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधिः तमातपक्लांतमनातपत्रमा-
चारपूतं पवनः सिषेवे १३ शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ऊनं न सत्त्वे-
ष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने १४ संचारपूतानि दिगंतराणि कृत्वा दिनांते निलयाय ग-
न्तुं प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः १५ तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ म-
ध्यमलोकपालः बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना १६ स पल्वलोत्तीर्णवराहयूथा-
न्यावासवृक्षोन्मुखबर्हिणानि ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् १७ आपीनभारोद्व-
हनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो नरेंद्रः उभावलंचक्रतुरंचिताभ्यां तपोवनावृत्तिपथं गताभ्यां १८ वसिष्ठधे-
नोरनुयायिनं तमावर्तमानं वनिता वनांतात् पपौ निमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्यां
१९ पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या तदंतरे सा विरराज धेनुर्दिनक्षपामध्य-
गतेव संध्या २० प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता प्रणम्य चानर्च विशालम-

साधेनुः कोरवनमो... वृक्षा सित्किचकहितिरिव यथा साता क्षिधिना उपपन्ना सहिता श्राद्धा भाति तद्वत् =१६ ... सतानि तुः सतो भवति तत्र ... तयोर्दंपत्योः तदंतरे तयोर्दंपत्योरंतरे =२ साद्यस्य पत्नी ... लोकमं वा ... नत्र... =२

देवतानां पितॄणामतिथीनां क्रिया यया ... सा... =५ आपीनस्य ... =२ निमेषेण आलस्या पक्ष्मपंक्तिः यस्याः सा =२

पुरस्कृता =२ वर्त्मनि मार्गे पृष्ठतो वा अग्रतः =२ ... पार्थिवः ... =२ ... पार्थिवस्य राज्ञः धर्मपत्नी पार्थिवधर्म... ... =२

दिनं च क्षपा च ... =२

... =४

अक्षतं ... =५

८

7

स्याः प्रत्यंगान्तरं द्वारमिवार्थसिद्धेः २१ वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननन्दतुस्तौ भक्त्योपपन्ने

षु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि २२ गुरोः सदारस्य निपीड्य पादौ समाप्य सान्ध्यं च विधिं दि

लीपः दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णां २३ तामन्तिकन्यस्तबलिप्रदीपामन्वा

स्य गोप्ता गृहिणीसहायः क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् २४ इत्थं व्रतं पालय

तः प्रजार्थं समं महिष्या महनीयकीर्तेः सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य २५

अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमा

विवेश २६ सा दुष्प्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन अलक्षिताभ्युत्पतनो नृपेण प्र

सह्य सिंहः किल तां चकर्ष २७ तदीयमाक्रन्दितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं रश्मिष्विवादा

य नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिं २८ स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श

अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं २९ ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्य

स्य शरं शरण्यः जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ३० वामेतरस्तस्य करः प्र

हर्तुर्नखप्रभाभूषितकंकपत्रे सक्तांगुलिः सायकपुंख एव चित्रार्पितारंभ इवावतस्थे ३१ बाहुप्रतिष्टं
भविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः राजा स्वतेजोभिरदह्यतांतर्भोगीव मंत्रौषधिरुद्धवीर्यः ३२
तमार्यगृह्यं निगृहीतधेनुः मनुष्यवाचा मनुवंशकेतुं विस्माययन् विस्मितमात्मवृत्तौ भूपालसिं
हं निजगाद सिंहः ३३ अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् न पादपोन्मू
लनशक्ति रंहः शिलोच्चये मूर्छति मारुतस्य ३४ कैलासगौरं वृषमारुरुक्षोः पादार्पणा
नुग्रहपूतपृष्ठं अवेहि मां किंकरमष्टमूर्तेः कुंभोदरं नाम निकुंभमित्रं ३५ अमुं पुरः पश्यसि देवदा
रुं पुत्रीकृतोसौ वृषभध्वजेन यो हेमकुंभस्तननिःसृतानां स्कंदस्य मातुः पयसां रसज्ञः
३६ कंडूयमानेन कटं कदाचित् वन्यद्विपेनोन्मथिता त्वगस्य अथैनमद्रेस्तनया शुशोच सेना
न्यमालीढमिवासुरास्त्रैः ३७ तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ व्यापारि
तः शूलभृता विधाय सिंहत्वमंकागतसत्ववृत्तिः ३८ तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्ट
कालापरमेश्वरेण उपस्थिता शोणितपारणा मे सुरद्विषश्चांद्रमसी कलेव ३९ सत्वं नि

अन्तीत्यं वक्तव्यं तोहि यस्य सत्त्वं वको हरस्तस्य नास्ति तेन वीरास्त्रेण जडीकृतो निष्प्रयोजनः कृतः = ४
ननु गुरोर्धनरूपं धेनुं पयस्विनीं विनश्यत् उपेक्ष्य अकीर्तिभाक् स न कथं तत्सम्भवेथा मीत्याशङ्क्याह [illegible] यत् रक्षितुं योग्यं वस्तु रक्षितुं योग्यं वस्तु तत्तच्छस्त्रेण अश
शिष्यकर्तृका क्यरक्ष्यं [illegible] यदि भवति तदा तत् वस्तु शस्त्रभृतां शस्त्र
यतः भवान् गुरोः गुरुविषये दर्शिता शिष्यभक्तिर्येन सः = १ धारिणां यशः न क्षिणोति न नाशयति अशक्यरक्षायस्ततत् = १

वर्त्तस्व विहाय लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः। शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः
शस्त्रभृतां क्षिणोति ४० इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य प्रत्याहता
स्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ४१ प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्
पूर्वभंगे वितथप्रयत्नः जडीकृतत्र्यम्बकवीक्षितेन वज्रं मुमुक्षन्निव वज्रपाणिः ४२ संरुद्धचे
ष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं विवक्षुः अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान् भावमतो
ऽभिधास्ये ४३ मान्यः स मे स्थावरजंगमानां सर्गस्थितिप्रत्यवहारहेतुः गुरोरपीदं धनमाहिताग्ने
र्नश्यत्पुरस्तादनुपेक्षणीयं ४४ स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्त्तयितुं प्रसीद दिनावसा
नोत्सुकबालवत्सा विमुच्यतां धेनुरियं महर्षेः ४५ अथान्धकारं गिरिगह्वराणां दंष्ट्रा
मयूखैः शकलानि कुर्वन् भूयः स भूतेश्वरपार्श्ववर्त्ती किंचिद्विहस्यार्थपतिं बभाषे ४६
एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च अल्पस्य हेतोर्बहु हातुमिच्छन् विचार
मूढः प्रतिभासि मे त्वं ४७ भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते जीवन्

९

४

कथं भतेइषुप्रयोगे तत्पूर्वसंगे स एव पूर्वः प्रथमः संगः प्रतिबंधो यस्य तस्मिन् = ४
वितथो विफलः प्रयत्नः प्रयासो यस्य सः = ४

दिनावसाने उत्सुको माता मम आगमिष्यतीत्युत्कंठितो बालवत्सो यस्याः सा = ४
त्वं शाधि = २
एकमेवातपत्रं छत्रं यस्य तत् तादृशं = २

य: स्थावराणां तरुशैलादीनां जंगमानां मनुष्यादीनां सर्गस्थितिप्रत्यवहारे उत्पत्तिस्थितिविनाशे हेतुः कारणं स ईश्वरो मे मम मान्यः पू
ज्यो ऽलंघ्यशासन इत्यर्थः आज्ञानं च सिंह त्वमं का गत [illegible] तिरस्कृत पंतहि विस्तृतं आगम्यतां इत्यत आह गुरोरपीति = ६

प्रत्याहतानि विफलानि अस्त्राणि यस्य सः = १
सिंह = २
संरुद्धा चेष्टा व्यापारो यस्य तस्य प्रतिबद्धव्यापारस्य मम = ४
शरीरस्य वृत्तिं जीवनं = ५
संपादयितुं = ५
पर्वतगुहानां = ४
दंष्ट्राकिरणैः = ४
किं तद्वह एकातपत्रमित्यादि = २

९

तव विनाशे सति

पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ४८ अथैकधेनोरपराधचण्डाद्गुरोः कृशानुप्र-
तिमाद्बिभेषि शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोघ्नीः ४९ तद्रक्ष कल्-
याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहं महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पद-
मैन्द्रमाहुः ५० एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन शिलोच्चयोऽपि क्षितिपा-
लमुच्चैः प्रीत्या तमेवार्थमभाषतेव ५१ निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ५२ क्षतात्किल त्रायत इत्युदग्र-
ः क्षत्रस्य शब्दो भुवनेषु रूढः राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ५३ क-
थं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनां इमामनूनां सुरभेरवेहि रुद्रौजसा तु
प्रहृतं त्वयास्यां ५४ सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः न पार-
णा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ५५ भवानपीदं परवानवैति महान्हि
यत्नस्तव देवदारौ स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ५६ किमप्य-

संबंधः सख्यं आभाषणमालापः पूर्वं कारणं यस्य तत् आहुर्विद्वांसः =२

हिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः एकांतविध्वंसिषु मद्विधानां पिंडेष्वनास्था
खलु भौतिकेषु ५७ संबंधमाभाषणपूर्वमाहुः वृत्तः स नौ संगतयोर्वनांते तद्भूतनाथानुग
नार्हसि त्वं संबंधिनो मे प्रणयं विहंतुं ५८ तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टंभविमु
क्तबाहुः स न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिंडमिवामिषस्य ५९ तस्मिन्क्षणे पालयितुः
प्रजानामुत्पश्यतः सिंहनिपातमुग्रं अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ६० उत्तिष्ठ वत्से
त्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहं ६
१ तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि गुरुप्रसादान्मयि नांतकोऽपि प्रभुः प्रह
र्तुं किमुतान्यहिंस्राः ६२ भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते वत्स वरं वृणीष्व न केवलानां पय
सां प्रसूतिं अवेहि मां कामदुघां प्रसन्नां ६३ ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवी
रशब्दः वंशस्य कर्तारमनंतकीर्तिं सुदक्षिणायां तनयं ययाचे ६४ संतानकामाय तथेति कामं रा
ज्ञे प्रतिश्रुत्य पयस्विनी सा दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति तमादिदेश ६५ वत्सस्य होमा

कथयित्वा =२

र्थविधेश्शेषे ऋषेरनुज्ञामधिगम्य मातः। ऊधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ६५ इत्थं
क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव। तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमे
ण ६६ तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य। प्रहर्षचिह्नानुमितं प्रियायै शशंस वा
चा पुनरुक्तयेव ६७ स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषं। पपौ वसिष्ठेन कृता
भ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ६८ प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्र
युज्य। तौ दंपती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः ६९ प्रदक्षिणीकृत्य हुतं हुताशं ततश्च
होतारमरुन्धतीं च। धेनुं सवत्सां च नृपः प्रतस्थे सन्मङ्गलोदग्रतरप्रभावः ७० श्रोत्राभिरामध्वनिना र
थेन स धर्मपत्नीसहितः सहिष्णुः। ययावनुद्घातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन ७१ तमा
हितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिताङ्गं। नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौ
षधीनां ७२ पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः। भुजे भुजङ्गेन्द्रसमानसारे भू
यः स भूमेर्धुरमाससञ्ज ७३ अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यू

अष्टानां लोकपालानां वपुर्धारयते नृप इति मनुः = २

नरपतेर्दिलीपस्य कुलभूतये संततिलाभाय =

तमेव नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः ७५ इति श्रीरघुवंशे महाकाव्ये श्रीकालिदासकृतौ द्वितीयः सर्गः २

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखं। निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौहृदलक्षणं दधौ १ ततो विशांपतेरनन्यसंततेर्मनोरथं किंचिदिवोन्मुखं अनेन सोढा दुरसस्य दोहदं प्रिया प्रपेदे हृतिप्रियंवदा २ मुखेन सा केतकपत्रपाण्डुना कृशाङ्गयष्टिः परिमेयभूषणा। स्थिताल्पतारां करुणेन्दुमण्डलां विभातकल्पां रजनीं व्यडम्बयत् ३ शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपाण्डुना तनुप्रकाशेन विचेयतारका विभातकल्पा शशिनेव शर्वरी ४ तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलं ५ दिवं मरुत्वानिव भोक्ष्यते महीं दिगन्तविश्रान्तरथो हि तत्सुतः अतोऽभिलाषे प्रथमं तथाविधे मनो बबन्धान्यरसान्विलङ्घ्य सा ६ न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तुषु केषु मागधी इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोसलेश्वरः ७

शरीरसादात् ... तिभूषणा नियस्याः सा। विचेया पारिमेयाः तारका यस्यां सा। = ४

उत्तरकोशलाः उत्तरकोशलास्तेषामुत्तरकोशलानामीश्वरः स्वामी = २

10 ९

दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयं तिरश्चकार भ्रमराभिलीनयोः सुजातयोः पंकज
कोशयोः श्रियं ८ क्रमेण निस्तीर्य च दोहदव्यथां ९ प्रचीयमानावयवा रराज सा पुराणपत्रापगमा
दनन्तरं लतेव सन्नद्धमनोज्ञपल्लवा १० निधानगर्भामिव सागराम्बरां शमीमिवाभ्यंतरलीनपाव
कां नदीमिवान्तःसलिलां सरस्वतीं नृपः ससत्वां महिषीममन्यत ११ प्रियानुरागस्य मनःसमुन्न
तेर्भुजार्जितानां च दिगंतसंपदां यथाक्रमं पुंसवनादिकाः क्रियाः धृतेश्च धीरः सदृशीर्व्यध
त्त सः १२ सुरेन्द्रमात्राश्रितगर्भगौरवात् प्रयत्नमुक्तासनया गृहागतः तयोपचारांजलिखिन्न
हस्तया ननन्द पारिप्लवनेत्रया नृपः १३ कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भ
भर्मणि पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव १४ ग्रहैस्ततः पंचभि
रुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदं असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरि
वार्थमक्षयं १५ दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे बभूव सर्वं
शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशां १६ अरिष्टशय्यां परितो विसारि

णा सुजन्मनस्तस्य निजेन तेजसा निशीथदीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव
१७ जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसम्मिताक्षरं अदेयमासीत्त्रयमेव भूपतेः श-
शिप्रभं छत्रमुभे च चामरे १८ संवीक्ष्य पुत्रस्य चिरात्सितं मुखं निधानकुम्भस्य युवेव दुर्गतः मुदा शरीरे प्रबभूव
नात्मनः पयोधिरिन्दूदयमूर्छितो यथा १९ निवातपद्मस्तिमितेन चक्षुषा नृपस्य कान्तं पिबतः सु-
ताननं महोदधेः पूर इवेन्दुदर्शनात् गुरुः प्रहर्षः प्रबभूव नात्मनि २० स जातकर्मण्यखिले त-
पस्विना तपोवनादेत्य पुरोधसा कृते दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ
२१ सुखश्रवा मंगलतूर्यनिःस्वनाः प्रमोदनृत्यैः सह वारयोषितां न केवलं सद्मनि मागधीपतेः
पथि व्यजृम्भन्त दिवौकसामपि २२ न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महर्षितः
ऋणाभिधानात्स्वयमेव केवलं तदा पितॄणां मुमुचे स बन्धनात् २३ श्रुतस्य यायादयमन्तमर्भकस्तथा प-
रेषां युधि चेति पार्थिवः
अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसम्भवं २४ पितुः प्रयत्नात्स समग्रसम्पदः शु-
भैः शरीरावयवैर्दिने दिने पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः २५ उमावृषांकौ

काकश्रुकश्रकवालोरयोगादयनामकस्यमरः पुरुहूतः पुरंदरः इत्यमरः पुतनाः पुत्रगोत्रिकं तमौतमरः शारजन्मनाजयंतेन तपाकशाक पुरंदरयोः
जयंतः पाकशासनिः इत्यमरः पुलोमजा शची इन्द्राणी इत्यमरः कूणाकूतेन तस्याधाराइयंतदीयातो
पोतः पाकोर्भकोडिंभः पृथुकः शावकः शिशुस्तु इत्यमरः

शारजन्मनाजयंतेन शचीपुरंदरौ तथाऽन्यस्मै चेतु तेन माती धी नं दंतुसंलसंहृदयेन तत्समौ २३
रथांगनाम्नोरिव भावबंधनं बभावयत्त्रि परस्परांशयं विभक्तो मैपिकस्तु तेन न तस्य यौः परस्परस्यो परिनुब
हीयत २४ यदाहि शक्तिमाशुष्यमो दितवंबोचायये तदीयामेव नेत्र्यां शान्ते
मूः शुलिपातशिक्षया विनु मुंदते न तत्तान सौरकं रूपेतंमकं मैरोप्यशरीरयुतो
गजो स्मुरवेलिविचंतनि वोकृतं तु चिउपातसमीलितलोचनोऽन्यपाद्भिरालुते स्पर्शरसंसकृतायोयो
स्ममूर्ति नितिनपरा च्छेउन्ना नास्थितेरमेवोस्थितिमन्मत्वयं लक्षणमिमे टेनगुणागणव त्रिनापतिः श्रजाना
मिवसर्गमालनः २६ सभूतचूडेक्षलकाकपक्षकैरमात्यपुत्रैस्सवयोभिरन्वितः लिपेर्यथावद्ग्रहणे
नवाङ्मयं नदीमुखेनेव समुद्रमाविशत् २७ प्रयोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गु
रुप्रियं अबंध्ययन्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति २८ धियः समग्रैस्स गुणैरुदा
रधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः
३० त्वचं स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मन्त्रवित् न केवलं तद्गुरुरेकपार्थिवः क्षि
तावभूदेकधनुर्धरोऽपि सः ३१ महोक्षतां वत्सतरः स्पृशन्निव द्विपेन्द्रभावं कलभः श्रयन्निव रघुः

चंव तोला खंडकेः वालानां तु शिखा प्रोक्ता काकपक्षः शिखंडकः इतिहलायुधः =६
वस्तूपि पावेन तेउवहितापमुक्ता
लिपेः यथावद्ग्रहणे न पंचाशद्वर्णमातृकायायथावत्क्रम
तोनसम्यग्वोधने पायम्भूतेन वाङ्मयं नदजातं =६
शिक्षितवंतः =५
हस्तिशावकः =१
दम्पः दम्यवत्सतरौ समादि इत्यमरः =१

शारजन्मा षडाननः इत्यमरः =१

उपांतयोर्नेत्रांत
योः संमीलितिलो
चनेन पेशलसः =५
मर्यादापालकः
राजा =६
निष्पन्नचूडाक
र्मा =६
संसर्गि =४

शरीरयोगात्
यते ते तेः =४
स्वस्वपरि मेदम
वता शिरो ते
नाकस्य तेन
लोमवाले तो
ब्रसलवर जस्त
अपे लक्ष्णपे
त्वे न वर्तेन
वते ते तेगुणा तेन
पवनाइपि आति वे
गिभिः =२
हरितादिशोवीश्वरः
सूर्यः वनातिपा
तिभिर्हरिद्भिर्निजा
श्वैः हरितकुनिवे
वते योजित
श्वेयेरितिविश्वः =२

क्रमाद्यौवनभिन्नशैशवः पुपोष गांभीर्यमनोहरं वपुः ३२ अथास्य गोदानविधेरनन्तरं विवाह
दीक्षां निरवर्तयद्गुरुः नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ३३ युवा युगव्यायतबाहुरंसलः
कपाटवक्षाः परिणद्धकंधरः वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ३४ अथ प्रजानां
चिरमात्मना धृतां नितान्तगुर्वीं लघयिष्यता धुरं निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभा
क् ३५ नरेन्द्रमूलायतनादनन्तरं तदास्पदं श्रीर्युवराजसंज्ञितं अगच्छदंशेन गुणाभिलाषिणी नवावतारं
कमलादिवोत्पलं ३६ विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव बभूव तेनातितरां सुदुःस
हः कटप्रभेदेन करीव पार्थिवः ३७ नियुज्य तं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतं अपूर्णमेकेन शतक्रतूप
मः शतं क्रतूनामपविघ्नमाप सः ३८ ततः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः धनुर्भृतामग्रत एव र
क्षितां जहार शक्रः किल गूढविग्रहः ३९ विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तद्व
सिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभावा ददृशेऽथ नंदिनी ४० तदंगनिष्यंदजलेन लोचने प्रमृज्य पुण्येन पुरस्कृ
तः सतां अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः ४१ स पूर्वतः पर्वतपक्षशातनं ददर्श देवं
नरदेवसंभवः पुनः पुनः सूतनिषिद्धचापलं हरन्तमश्वं रथरश्मिसंयतं ४२ शतैस्तमक्ष्णामनिमेषवृ

यमात्मिलें न दृच्चं प्राकविस्तु सिंह अश्वा जितुमर्थु स्माहि कपिल गोपुहरि
नीकपिलेन विद्वि समर: =१

कथंभूत: रघु: ४ किं कुर्वन्निव स्वरेण

त्रिमिह हरिं विदित्वा हरिभिश्च वाजिभिः अवोचदेनं गगनस्पृशा रघुः स्वरेणाधीरेण निवर्तयन्निव ४३ मखांशभा
जां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र सदा निगद्यसे अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय
कथं प्रवर्तसे ४४ त्रिलोकनाथेन सता मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा स चेत्स्व
यं कर्मसु धर्मचारिणां त्वमन्तरायी भवसि च्युतो विधिः ४५ तदङ्गमग्र्यं मघवन्महाक्रतोरमुं तु
रंगं प्रतिमोक्तुमर्हसि पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिं ४६ इति प्रगल्भं रघुणा स
मीरितं वचो निशम्याधिपतिर्दिवौकसां निवर्तयामास रथं सविस्मयः प्रचक्रमे च प्रतिवक्तु
मुत्तरं ४७ यदात्थ राजन्यकुमार तत्तथा यशस्तु रक्ष्यं परतो यशोधनैः जगत्प्रकाशं तदशेषमि
ज्यया भवद्गुरुर्लङ्घयितुं ममोद्यतः ४८ हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः त
था विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः ४९ अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य संततेः ५० ततः प्रहस्या
पभयः पुरंदरं पुनर्बभाषे तुरगस्य रक्षिता गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ५१
स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरासनं अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेण विडम्बितेश्वरः
५२ रघोरवष्टम्भमयेन पत्त्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः नवाम्बुदानीकमुहूर्तलां

स्तम्भ स्वरूपेण =१

कथंभूत: तेन वदतिस्म =२

निश्चयः =२
आलीढेन यथा ली
ढ स्थान वस्थान भे
देन शोभिते इति
तथा भूतेन =२

नवाम्बुदानीक मुहूर्तलाञ्छ
अवष्टम्भमयेन कुद्धरूपेण =१ हस्तं गृहीत्वा नवेलाञ्छने
कथंभूतेन धनु हृदयस्तु तोरणम् =१
षि =२

कथंभूतं मनुष्यशो
णितं स्वैरनास्वा
दितं =१

हेरावतताडनेन कर्कशाः कठिना अंगुलयो यस्य तस्मिन् =२

भुजे कथंभूते भुजे शच्याः पत्रविशेषका पत्रक्रियारचना तया अंकिते चिह्निते =३

पीतोऽयमास

कथंभूतः मार्गणः

छनेधनुष्यमोघं समधत्त मार्गणं ५३ नरेंद्रसूनोस्स बृहद्भुजांतरं प्रविश्य भीमासुरशोणितोचितः प
प्रावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितं ५४ हरेः कुमारोऽपि कुमारविक्रमः सुरद्वि
पास्फालनकर्कशांगुलौ भुजे शचीपत्रविशेषकांकिते स्वनामचिह्नं निचखान सायकं ५५
जहार चान्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजं चुकोप तस्मै स भृशं सुरश्रियः प्रस
ह्य केशव्यपरोपणादिव ५६ तयोरुपांतस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः बभूव
युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च सायकैः ५७ अतिप्रबंधप्रहितास्त्रवृष्टिभिस्त
माश्रयं दुःप्रसहस्य तेजसः शशाक निर्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवाद्भिरंबुदः ५८
ततः प्रकोष्ठे हरिचंदनांकिते प्रमथ्यमानार्णवधीरनादिनीं रघुः शशांकार्धमुखेन पत्रि
णा शरासनज्यामलुनाद्बिडौजसः ५९ स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य वि
द्विषः महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामंडलमस्त्रमाददे ६० रघुर्भृशं वक्षसि तेन ता
डितः पपात भूमौ सहसैनिकाश्रुभिः निमेषमात्रादवधूय च व्यथां सहोत्थितः सैनिकहर्ष
निस्वनैः ६१ तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः तुतोषः वीर्या
तिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ६२ असंगमद्रिष्वपि सारवत्तया न मे त्वदन्ये

१३
सवा त्रिलोकेशा
हेनद्रवं =२
मयूरपत्राणि
यस्मिन् तेन =४

13

कार्तिकेयवत्
विक्रमः पराक्र
मो यस्य सः =२
सदृशः तस्मै र
घवे =

१३

नविघ्नोढमायुधं अचेदिमां प्रीतमते तुरंगमाहरं हरणी ब्रवितितमाहहत्रहरी ६३ ततो निषं
गादसमग्रमुद्धृतं सुवर्णपुंखद्युतिरंजितांगुलिं दिलीपसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्र
त्यवदत्सुरेश्वरं ६४ अमोच्यमश्वं यदि मन्यसे प्रभो ततस्समाप्ते विधिनैव कर्म्मणि अजस्र
दीक्षाप्रयतस्समद्गुरुः क्रतोरशेषेण फलेन युज्यतां ६५ यथा च वृत्तांतमिमं सद
गतस्त्रिलोचनैकांशतया दुरासदः तवैव संदेशहराद्विशांपतिः शृणोति नाकेश त
था विधीयतां ६६ तथेति कामं प्रतिशुश्रुवान्रघोर्यथागतं मातलिसारथिर्ययौ नृपस्य
नातिप्रमनाः सद्गृहं सुदक्षिणासूनुरपि न्यवर्त्तत ६७ तमभ्यनंदत्प्रथमं प्रबोधितः प्र
जेश्वरः शासनहारिणा हरेः परामृशन्हर्षजडेन पाणिना तदीयमंगं कुलिशव्रणांकि
तं ६८ इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः समारुरुक्षुर्दिवमा
युषः क्षये ततान सोपानपरंपरामिव ६९ अथ स विषयव्यावृत्तात्मा यथाविधि सू
नवे नृपतिककुदं दत्वा यूने सितातपवारणं मुनिवनतरुच्छायां देव्या तया सह शिश्रिये

14

गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतं ॥७०॥ इति श्रीरघुवंशे महाकाव्ये कविकालिदास
कृतौ रघुराज्याभिषेको नाम तृतीयः सर्गः ॥३॥ स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ
दिनान्ते निहितं तेजः सवित्रेव हुताशनः १ न्यस्तशस्त्रं दिलीपं च तं च शुश्रुवुषां पतिं रा
ज्ञामुक्तमनाराचैर्हृदि शल्यमिवार्पितं २ दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितं पूर्वं प्र
धूमितो राज्ञां हृदये ऽग्निरिवोत्थितः ३ पुरुहूतध्वजस्येव तस्योन्नयनपंक्तयः नवाभ्युत्था
नदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ४ सममेव समाक्रान्तं द्वयं द्विरदगामिना तेन सिंहासनं पित्र्य
मखिलं चारिमण्डलं ५ छायामण्डललक्ष्येण तमदृश्या किल स्वयं पद्मा पद्मातपत्रेण
भेजे साम्राज्यदीक्षितं ६ परिकल्पितसान्निध्या काले काले च वन्दिषु स्तुत्यं स्तुतिभिरर्थ्या
भिरुपतस्थे सरस्वती ७ मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः तथाप्यनन्यपूर्वेव
तस्मिन्नासीद्वसुंधरा ८ नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितं पूर्व एवाभवत्पक्षस्तस्मिन्नाभव २४
दुत्तरः ९ मंदोत्कंठाः कृतास्तेन गुणाधिकतया गुरौ फलेन सहकारस्य पुष्पोद्गम इव प्रजाः

निश्चयेन

वायुपार्थः = २

नभस्वद्वातपवनमेतप्रभरः = १

रघुः

१० स हि सर्वस्य लोकस्य युक्तदंडतया मनः आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ११
पंचानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः नवे तस्मिन्महीपाले सर्वं नवमिवाभवत् ११ यथा प्र-
ल्हादनाच्चंद्रः प्रतापात्तपनो यथा तथैव सोभूदन्वर्थो राजा प्रकृतिरंजनात् १२ कामं कर्णांत-
विश्रांते विशाले तस्य लोचने चक्षुष्मत्ता च शास्त्रेण सूक्ष्मकार्यार्थदर्शिना १४ लब्धप्रश-
मनस्वस्थमथैनं समुपस्थिता पार्थिवश्रीर्द्वितीयेव शरत्पंकजलक्षणा १५ निर्वृष्टलघुभिर्मे-
घैर्मुक्तवर्त्मा सुदुस्सहः प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः १६ पुंडरीकातपत्रस्तं विक-
सत्काशचामरः ऋतुर्विडंबयामास न पुनः प्राप तच्छ्रियं १७ प्रसादसुमुखे तस्मिंश्चंद्रे च विशदप्र-
भे तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः १८ वार्षिकं संजहारेंद्रो धनुर्जैत्रं रघुर्दधौ प्रजार्थसा-
धने तौ हि पर्यायोद्यतकार्मुकौ १९ अधिज्यमादधकर्त्तुं समयो यो रघोरिति स्वं धनुः शंकितेनेव सं-
हृतं मघवता २० हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु विभूतयस्तदीयानां पर्यस्ता यशसा

श्रेतो = ४

विकसंति काशानि काशा यस्मिन् चामरो यस्य सः = ५

रघौ इंद्रे = २

विलसंति काशानि यस्मिन् विलसत्काशरूपं चामरं यस्य सः विलसत्काशचामरः = ४

कर्णांतं गत्वा कर्णांतं विश्रांते करणांते विश्रांते = १२

पंकजं लक्षणं यस्याः = ५

पुंडरीकमेव आतपत्रं = ५

प्रसादः सुमुखं यस्य प्रसन्नमुखः = ५

वार्षिकं धनुः = २

ज्याकाजाया यस्य तिष्ठति तेन = २

पुंडरीकमातपत्रं यस्य सः = ५

(पर्यायाः उद्यतः पर्यायोद्यतः पर्यायाः उद्यते कार्मुके ययोः पर्यायोद्यतकार्मु)
(के तौ पर्यायोद्यतकार्मुकौ = २) हंसानां श्रेणिः हंसः

तस्याः इदं तदीयं तेषां तदीयानां रघुसंबंधिनां = २

ज्ञातानि संबंधाय ज्ञानि पयसा स येन = २

श्रेणीषु = २ हंसानां श्रेणिषु पंक्तिषु = १

पर्यायेण क्रमेण उद्यतौ कार्मुकौ धनुषी ययोस्तौ = २

प्रिव २१ तस्य गोप्तुर्द्विरेफाणां कर्मोन्मूलननिपातिनां खरसंवादिभिः केन्द्रैः शालिगोप्योऽजगुर्यशः
२२ इक्षुच्छायानिषादिन्यस्तस्य गोप्तुर्गुणोदयं आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः २३ प्रससा
दोदयादंभः कुंभयोनेर्महौजसः रघोरभिभवाशंकि चुक्षुभे द्विषतां मनः २४ मदोदग्राः ककुद्मंतः स
रितां कूलमुद्रुजाः लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमं २५ प्रसवैः सप्तपर्णानां मदगंधिभि
राहताः असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः २६ सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् यात्रा
यै चोदयामास तं शक्तेः प्रथमं शरत् २७ तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ प्रदक्षिणार्चि
र्व्याजेन हस्तेनेव जयं ददौ २८ स गुप्तमूलप्रत्यंतः शुद्धपार्ष्णिरयान्वितः षड्विधं बलमादाय प्रत
स्थे दिग्जिगीषया २९ अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः पृषतैर्मंदरोद्धूतैः क्षीरोर्मि
य इवाच्युतं ३० स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा अहितानानिलोद्धूतैस्तर्जयन्निव केतुभिः ३१ र
जोभिः स्यंदनोद्धूतैर्गजैश्च घनसंनिभैः भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलं ३२ प्रताप

प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरं ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः ३३ पुरोगैः कलुषा-
स्तस्य सहप्रस्थायिभिः कृशाः पश्चात्प्रस्थायिभिः पङ्काश्चक्रिरे मार्गनिम्नगाः ३४ मरुपृष्ठान्युदम्भां-
सि नाव्याः सुप्रतरा नदीः विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ३५ स सेनां महतीं कर्षन्पूर्वसागरगा-
मिनीं बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ३६ त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ३७ पौरस्त्यानेवमाक्रामंस्तांस्तान् जनपदाञ्जयी प्रा-
प तालीवनश्याममुपकण्ठं महोदधेः ३८ अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव आत्मा संरक्षि-
तः सुह्मैर्वृत्तिमाश्रित्य वैतसीं ३९ वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् निचखान जयस्-
तम्भान् गङ्गास्रोतोन्तरेषु सः ४० आपादपद्मप्रणताः कलमा इव ते रघुं फलैः संवर्धयामासुरुत्-
खातप्रतिरोपिताः ४१ स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः उत्कलादर्शितपथः कलिङ्गा-
भिमुखो ययौ ४२ स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् अङ्कुशं द्विरदस्येव यन्ता गम्भीरवे-

द्विपैः ४३ प्रतिजग्राह कालिंगस्तमस्त्रैर्गजसाधनैः पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ४४ द्वि
षां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनं सन्मंगलस्नात इव प्रतिपेदे जयश्रियं ४५ वायव्यास्त्रविनि
16 र्धूतात्पक्षाद्विद्वान्महोदधेः गजानीकात्स कालिंगं तार्क्ष्यस्सर्पमिवाददे ४६ ताम्बूलीनां दलैस्
त्त्र रचितापानभूमयः नालिकेरासवं योधाः शात्रवं च पपुर्यशः ४७ गृहीतप्रतिमुक्तस्य स धर्म
विजयी नृपः श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीं ४८ ततो वेलातटेनैव फलवत्पूगमालिना
अगस्त्याचरितामाशामनाशास्यजयो ययौ ४९ स सैन्यपरिभोगेन गजदानसुगन्धिना कावे
रीं सरितां पत्युः शंकनीयामिवाकरोत् ५० भयोत्सृष्टविभूषाणां तेन केरलयोषितां अल
केषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ५१ बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः हारीता
मारीचोद्भ्रान्त मलयाद्रेरुपत्यकाः ५२ आजानेयखुरक्षुण्णसंपक्वैलालतोद्भवं धावत्सैस्सपदि
व्योमकीटकोशावलिरजः ५३ भोगिवेष्टनमार्गेषु चंदनानां समर्पितं नास्रसत्करिणां ग्रै

मरिचोद्भ्रान्त=२

कीटकानां तत्र त्रिकोशसि नाजेतु वि शीघ्रमली कोशाः निवासभूतं=२

कलबोनकश्रीविलक्षमरः=२

चंदनानां चंदनद्रुमानां भोगिवेष्टनमार्गेषु सर्पवेष्टनीनि मुः=२

१६

श्रीकासु भवं ग्रैवं कंठबंधनं=१

तद्दे पुस्त्वाधीनानिस्वापवनानि चंदनाणि चंदनं १ द्वापवाली =२
पश्चिमदिशातस्या जयाय उद्यतेः नलतोधाः सुपपातो वा १० =५
पांड्यानां जनपदानां राजानः पांड्याः तेपांड्याः =१ चिरकालेन निमीलितं =१
मरुलामारुतोद्भूतं इति केतकं =५

त्रिपदी... स्तंभ... दिनिरते
तेशीला त्रिपदी ... दिनस्ते
... गजनाम... बंधने =२

ग्रहंक्षिं =५

केतकानां ... केतकी
... =२
... =१
... ...
... =४
... ... =२

वं त्विषि दीर्घदर्शिनामपि ५४ दिशि मंदायते तेजो दक्षिणस्यां रवेरपि तस्यामेव रघोः पांड्याः प्रतापं न वि
षेहिरे ५५ ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ते निपत्य ददुस्तस्मै यशः स्वमिव संचितं ५६ स
निर्विश्य यथाकामं तटेष्वालीनचंदनौ स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ५७ असह्य
विक्रमः सह्यं दूरान्मुक्तमुदन्वता नितंबमिव मेदिन्याः स्रस्तांशुकमलंघयत् ५८ तस्यानीकै
र्विसर्पद्भिरपरांतजयोद्यतैः रामास्त्रोत्सारितोप्यासीत्सह्यलग्न इवार्णवः ५९ मरुलामारुतोद्भू
तमगमत्केतकं रजः तद्योधवारबाणानामयत्नपटवासतां ६० अभ्यभूयत वाहानां चरतां
गात्रसिंजितैः वर्मभिः पवनोद्भूतराजतालीवनध्वनिः ६१ खर्जूरीस्कंधनद्धानां मदोद्गारसुगंधिषु
कटेषु करिणां पेतुः पुंनागेभ्यः शिलीमुखाः ६२ अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ
अपरांतमहीपालव्याजेन रघवे करं ६३ मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणां त्रिकूटमेव तत्र
ोच्चैर्जयस्तंभं चकार सः ६४ पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना इंद्रियाख्यानिव रिपूं
स्तत्वज्ञानेन संयमी ६५ यवनीमुखपद्मानां सेहे मधुमदं न सः बालातपमिवाब्जानामकालज

मत्ता ना ... नौरदनोत्की
... दल ... ना ... मस्ता
... ... विक्रमलक्षणां
... ...
... ...
... =२

यवनीनां यवनस्त्रीणां मुखानि पद्मानीव यवनीमुखपद्मानि तेषां =१
... =१

लदोदयः ६६ संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्य-
भूत् ६७ भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीं तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ६८
अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः प्रणिपातप्रतीकारः संरम्भो हि महात्मनां ६९ विन-
यन्ते स्म तद्योधा मधुभिर्विजयश्रमं आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ७० ततः प्रतस्थे
कौबेरीं भास्वानिव रघुर्दिशं शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ७१ जितान् जय्यानेव
तौ स्वारथपुरस्सरान् महाम्बरिमितैर्वाजिभिः शाखबेरुणात्तस्पदं ७२ विनीताध्वश्रमास्तस्य सिन्धु-
तीरविचेष्टनैः दुधुवुर्वाजिनः स्कन्धान् लग्नकुंकुमकेसरान् ७३ तत्र हूणावरोधानां भर्तृषु व्यक्त-
विक्रमं कपोलपाटनादेशि बभूव रघुचेष्टितं ७४ काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः
गजालानपरिक्लिष्टैरक्षोटैः सह नामिताः ७५ तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः शिबि-
भुक्तं बिशं नाथमुदन्वत निवापगाः ७६ ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः वर्द्धयन्निव
तत्कूटानुद्धूतैर्धातुरेणुभिः ७७ शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंभ्रमं गुहाशयानां सिं-

हृत्वा पर्वतीयलोकितं ७८ भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः गङ्गाशीकरिणो मार्गे मरुतस्तं सि-
षेविरे ७९ विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः दृषदो वासितोत्सङ्गा निषण्णमृगनाभि-
भिः ८० सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ८१
तस्योत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ८२ विमर्द्दस्स
हतैस्तत्र पार्वतीयैरभूद्घोरः नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलः ८३ शरै[illegible]
संकेतान्स कृत्वा विरतोत्सवान् जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ८४ परस्परेण वि-
ज्ञातस्तेषूपायनपाणिषु राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ८५ तत्राक्षोभ्यं यशोरा-
शिं निवेश्यावरुरोह सः पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियं ८६ चकम्पे तीर्णलौहित्ये तस्मि-
न्प्राग्ज्योतिषेश्वरः तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ८७ न प्रसेहे स रुद्धार्कमधारा-
वर्षदुर्दिनं रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीं ८८ तमीशः कामरूपाणामत्याखण्डल-
विक्रमं भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ८९ कामरूपेश्वरस्तस्य हेमपीठाधिदेवता र[illegible]

वारिमुचामिव यथा वारिमुचां मेघानां तोयादानं जलग्रहणं विसर्गाय दानाय भवति = २

रेखा ध्वजकुलिशातपत्राणि चिह्नानि ... = ४

चिरकालेयाव नविरहेन उत्सुकी उत्कंठिता अवरोधाः ... = ६

रघुवंश
१५
18

पुष्पोपहारेण छायामानर्च पादयोः ८४ इति जित्वा दिशो जिष्णुर्न्यवर्त्तत रथोद्धतं रजो विश्राम
यन्राज्ञां छत्रशून्येषु मौलिषु ८५ स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणं आदानं हि विसर्गा
य सतां वारिमुचामिव ८६ सत्रान्ते सचिवसखः पुरस्क्रियाभिर्गुर्वीभिः शमितपराजयव्यली
कान् काकुत्स्थश्चिरविरहोत्सुकावरोधान्राजन्यान्स्वपुरनिवृत्तयेनुमेने ८७ ते रेखाध्वजकुलि
शातपत्रचिह्नं सम्राजश्चरणयुगं प्रसादलभ्यं प्रस्थानप्रणतिभिरङ्गुलीषु चक्रुर्मौलिस्रक्
च्युतमकरंदरेणुगौरं ८८ यज्ञान्ते तमवभृथाभिषेकपूतं सत्कारैः शमितपराजयव्यली
काः श्रीमंतो मुकुटवनितानितांतदिग्भ्यः स्वानि स्वान्यविविशुर्भुजः पुराणि जग्मुः ८९
श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ रघुदिग्विजयो नाम चतुर्थः सर्गः ४ तमध्वरे विश्वजिति क्षिती
शं निःशेषविश्राणितकोशजातं उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशि
ष्यः १ स मृण्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः श्रुतप्रकाशं यशसाप्र
काशः प्रत्युज्जगामातिथिमातिथेयः २ तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्र

मानधनाग्रयायी विशांपतिर्विष्टरभाजमारात्कृतांजलिः कृत्यविदित्युवाच ३ अप्यग्रणीर्मंत्रकृतामृषी
णां कुशाग्रबुद्धे कुशली गुरुस्ते यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ४ कायेन वाचा मन
सापि शश्वद्यत्संभृतं वासवधैर्यलोपि आपाद्यते न व्ययमंतरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत् ५ आ
धारबंधप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषं कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रम
पादपानां ६ क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु तदंकशय्याच्युतनाभिना
ला कच्चिन्मृगीणामनघा प्रसूतिः ७ निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापांजलयः पितृणां ता
न्युंछषष्ठांकितसैकतानि शिवानि वस्तीर्थजलानि कच्चित् ८ नीवारपाकादि कडंगरीयैरामृश्यते ज
ानपदैर्न कच्चित् कालोपपन्नातिथिकल्प्यभागं वन्यं शरीरस्थितिसाधनं वः ९ अपि प्रसन्नेन मह
र्षिणा त्वं सम्यग्विनीयानुमतो गृहाय कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते
१० अनुग्रहेणाभिगमाभिलेन तवार्हतस्तु प्रतिमेन चेतः अप्याज्ञया शासितुरात्मना वा प्राप्तोसि
संभावयितुं वनान्मां ११ इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य स्वार्थोपपत्तिं
तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे

स्वस्वार्थः स्वार्थः स्वार्थस्योपपत्तिः तां =१

दृष्टिमावरीतुं नालमित्यर्थः ॥२

तीर्थेन तपस्विजनतर्पितं स्वं ... प्रतिपादितार्द्धिः

सार्वभौम मतया ... ॥२

प्रतिपादितर्द्धि

त्वमिति वाचं वरतन्तुशिष्यः ... ॥२

तिदुर्बलानां [illegible] ॥ १२ ॥ सर्वत्र नो वार्त्तमवेहि राजन्नाथे कुतस्त्वय्यशुभं प्र- कुलेशुभंप्रजा ॥२

जानां सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ॥ १३ ॥ भक्तिः प्रतीक्ष्येषु कुलोचि-

महाभाग ... तानां ... तसंबोधने कि ... हे महाभाग ॥२ ता ते पूर्वान्महाभाग तयातिशेषे व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः यथा ... तेन परिग्रहं ... तः ॥४

॥ १४ ॥ शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवा-

१९ रइवावशिष्टः ॥ १५ ॥ तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये स्वस्त्यस्तु ते निर्ग-

लिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ॥ १६ ॥ स्थाने भवानेकनराधिपः सन्नकिंचनत्वं म- ... तस्य ... ॥६

... ॥५ खजं व्यनक्ति पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥ १७ ॥ एतावदु-

क्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य किं वस्तु विद्वन्गुरवे प्रदेयं त्वया कियद्वे-

॥२ ति तमन्वयुङ्क्त ॥ १८ ॥ ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय वर्णाश्रमा- वर्णाश्रमाणां ... तस्मै गुरुः ॥२

णां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ॥ १९ ॥ समाप्तविद्येन मया महर्षिर्वि-

ज्ञापितोऽभूद्गुरुदक्षिणायै स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् १९

यथावत् ... तस्मै ॥२ ... तेन विवर्जित ... तस्मै ॥२

चिरकाले ... अस्खलितः ... ॥२

निर्बंधनप्रार्थनातिशयेन संजातः कोपो यस्य सः ॥१ सपर्यायाः विधिः सपर्याविधिः सपर्याविधेः भाजनं सपर्याविधिभाजनं तेन ॥२
गुरुदक्षिणायाः ... तरस्य भावः ... तरत्वं तस्मात् ॥३

त् ॥ २० ॥ निर्बंधसंजातरुषार्थकार्श्यमचिंतयित्वा गुरुणाहमुक्तः। वित्तस्य विद्यापरि-
संख्यया मे कोटीश्चतस्रो दश चाहरेति ॥ २१ ॥ सोहं सपर्याविधिभाजनेन म-
त्वा भवंतं प्रभुशब्दशेषं। अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिःक्रयस्य ॥ २२ ॥ इत्थं
द्विजेन द्विजराजकांतिरावेदितो वेदविदां वरेण। एनोनिवृत्तेंद्रियवृत्तिरेनं जगाद भूयो
जगदेकनाथः ॥ २३ ॥ गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामं। गतो
वदान्यांतरमित्ययं मे मा भूत्परीवादनवावतारः ॥ २४ ॥ स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थो-
ग्निरिवाग्न्यगारे। द्वित्राण्यहान्यर्हसि सोढुमर्हन् यावद्यते साधयितुं त्वदर्थं ॥ २५ ॥ तथेति तस्या-
वितथं प्रतीतः प्रत्यग्रहीत्संगरमग्रजन्मा। गामात्तसारां रघुरप्यवेक्ष्य निःक्रष्टुमर्थं चकमे कुबे-
रात् ॥ २६ ॥ वसिष्ठमंत्रोक्षणजात्प्रभावादुदन्वदाकाशमहीधरेषु। मरुत्सखस्येव बलाह-
कस्य गतिर्विजघ्ने न हि तद्रथस्य ॥ २७ ॥ अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रग-
र्भं। सामंतसंभावनयैव धीरः कैलासनाथं तरसा जिगीषुः ॥ २८ ॥ प्रातः प्र-

जन्मसंस्कारात् ... जायते इति द्विजः द्विजानां राजा द्विजराजः ... चंद्रवत्कांतिर्यस्य सः ॥४
परीवादस्य न वावतारः परीवादनवावतारः ... ॥६
श्रुतस्य निःक्रियः श्रुतनिःक्रयस्तस्य ॥३
यथा सामंतमात्रं जेतुं निर्याते तथा धनदं जितीषुः ॥१

२०

याणाभिमुखाय तस्मै सविस्मयाः कोशगृहे नियुक्ताः हिरण्मयीं कोशगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः २९ तं भूपतिर्भासुरहेमरा-
शिं लब्धं कुबेरादभियास्यमानात् दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नं ३० जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनं-
द्यसत्वौ गुरुप्रदेयाधिकनिःस्पृहोर्थी नृपोर्थिकामादधिकप्रदश्च ३१ अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमनाः महर्षिः स्पृशन्करेणान-
तपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ३२ किमत्र चित्रं यदि कामसूर्भूः वृत्ते स्थितस्याधिपतेः प्रजानां अचिंतनीयस्तु तव प्रभावो मनीषि-
तं द्यौरपि येन दुग्धा ३३ आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते पुत्रं लभस्वात्मगुणानुरूपं भवंतमीड्यं भवतः पिते-
व ३४ इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशं राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः ३५
ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारं अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ३६ रूपं तदोजस्वि त-
देव वीर्यं तदेव नैसर्गिकमुन्नतत्वं न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ३७ उपात्तविद्यं विधिवद्गुरु-
भ्यस्तं यौवनोद्भेदविशेषकांतं श्रीः साभिलाषापि गुरोरनुज्ञां धीरेव कन्या पितुराचकांक्ष ३८ अथेश्वरेण क्रथकैशिका-
नां स्वयंवरार्थं स्वसुरिंदुमत्याः आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः ३९ तं श्लाघ्यसंबंधमसौ विचिंत्य दार-
क्रियायोग्यदशं च पुत्रं प्रस्थापयामास ससैन्यमेनं ऋद्धां विदर्भाधिपराजधानीं ४० तस्योपकार्यारचितोपचारा वन्येतरा जा-

[illegible]

न्यदोप रजोभिः मार्गे निवासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः ४१ स नर्मदारोधसि सीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले निवेश-
यामास विलंघिताध्वा क्लान्तं रजोधूसरकेतुमेतत् ४२ अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितान्तःसलिलप्रवेशः नि-
र्धौतदानामलगण्डभित्तिर्वन्यः सरित्तो गज उन्ममज्ज ४३ निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु नी-
लोर्ध्वरेखाशबलेन शंसन्दन्तद्वयेनाश्मविकुण्ठितेन ४४ युग्मं संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दं
बभौ स भिन्दन्बृहतस्तरंगान्वार्यर्गलाभंग इव प्रवृत्तः ४५ शैलोपमः शैवलमञ्जरीणां जालानि कर्षन्नुरसा स पश्चा-
त् पूर्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्तटमुत्ससर्प ४६ ॥ तस्यैकनागस्य कपो-
लभित्त्योर्जलावगाहक्षणमात्रशान्ता वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिन-
श्रीः ४७ सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयं विलंघिताधोरणतीव्रय-
त्नाः सेनागजेन्द्रा विमुखा बभूवुः ४८ स छिन्नबन्धद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन रामापरित्रा-
णविहस्तयोधं सेनानिवेशं तुमुलं चकार ४९ तमापतन्तं नृपतेरवध्यो वन्यः करीति श्रुतवा-
न्कुमारः स्फुरत्प्रभामण्डलमध्यवर्ति कान्तं वपुर्व्योमचरं प्रपेदे ५१ अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थै-
रवकीर्य पुष्पैः उवाच वाग्मी दशनप्रभाभिः संवर्धितोरस्थलतारहारः ५२ मतंगशापादवलेपमूलादवाप्तवानस्मि मतंगजत्वं अवेहि गं [illegible]

निवर्तयिष्यन्विशिखेन कुम्भे [illegible]

[illegible]

प्रमोदितः = २

रघुवंश०
२२ २१

[illegible] अवेहि गन्धर्वपतेस्तनूजं प्रि-
यंवदं मां प्रियदर्शनस्य ५३ स चानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत् उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृ-
तिर्जलस्य ५४ इक्ष्वाकुवंशप्रभवो यदा ते भेत्स्यत्यजः कुंभमयोमुखेन संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत्स
तपोनिधिर्मां ५५ संमोचितः सत्त्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन प्रतिप्रियं चेद्भवतो न कुर्यां वृथा हि मे स्यात्स्वपदोपल-
ब्धिः ५६ संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमंत्रं गांधर्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ५७
अलं ह्रिया मां प्रति यन्मुहूर्तं दयापरोऽभूः प्रहरन्नपि त्वं तस्मादुपच्छंदयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यं ५८ तथेत्युपस्पृ-
श्य पयः पवित्रं सोमोद्भवायाः सरितो नृसोमः उदङ्मुखः सोऽस्त्रविदस्त्रमंत्रं जग्राह तस्मान्निगृहीतशापात् ५९ एवं तयोरध्वनि दैवयोगा-
दासेदुषोः सख्यमचिंत्यहेतु एको ययौ चैत्ररथप्रदेशान्सौराज्यरम्यानपरो विदर्भान् ६० तं तस्थिवांसं नगरोपकंठे तदागमारू-
ढगुरुप्रहर्षः प्रत्युज्जगाम क्रथकैशिकेंद्रश्चंद्रं प्रवृद्धोर्मिरिवोर्मिमाली ६१ प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पित-
श्रीः मेने यथा तत्र जनः समेतो वैदर्भमागंतुमजं गृहेशं ६२ तस्याधिकारपुरुषैः प्रणतैः प्रदिष्टां प्राग्द्वारवेदिविनिवेशितहेम-
कुंभां रम्यां रघुप्रतिनिधिः स नवोपकार्यां बाल्यात्परामिव दशां मदनोऽध्युवास ६३ तत्र स्वयंवरसमाहृतराजलोकं कन्याललाम
कमनीयमजस्य लिप्सोः भावावबोधकलुषा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव ६४ तं कर्णभूषण

सोमोद्भवायाः सा नर्मदा = ६

निपीडितं नवी स्तनमंडलं ... रस्य द विमर्दैः रुग्णा गतो वेतालिकानां नोलि ... बधमनो हरा... प्रबोधयन्तु
सि बाधिचरुदारवाचः ६५ रात्रिर्गता मतिमतां वर मुंच शय्यां ... विषवेन नु धूर्जगतो विभागा... मेकत
त्र वि... तिगुरु बिंब निहुतस्त्वाभवानेपरधुर्य पदावलेवी ६६ निद्रावशेन भवतो ... बेदस्य मा...
वर्धते लुके ... मवल... निशि... दितेव ल ली बिनास्यति ... न दिगन्तलेखी ... पित्व वरान न ... चिं विइहाति कं
६७ ... नुग्लायुग ... प्रिषितेन नतो वृत्लघुः परस्परं तुल्यमहिमाहतो ... नरतारमन
... वपुर्वानन ... ६८ ... मनोकुहानां ... तेम... सिद्धे ... श्रुति
नेः स्वान्ता विकं परगु ... न बि... ता ... वायुमो ... पूर्ण ... तमस ... वालिका ... तंदुमप
... वे पुनिर्हेतत ... शुलिकाबिम्बाद्दहिमांशुना ... निपर ... तथा ... नातिसमं तमस ... नार्ह
रिवले दीपं ७० ... कुमतेन ... तावद ... नतमोनिरस्तं ... नाग्रस
रितान्तु पिवीर ... किंवा ... स्वयमुज्झितेति ७१ ... हेतु ... बिनीतति ... से
वेस्याः पुरस्ते ... कर्बिता ... यथा बिबाति ... गाढ ... रिकृ ... वेदेन को
ऽन्याः ७२ दीर्घ ... मी निपीय ... मधुपेषु निद्रां ... वनमाह ... युदे ... श्रपाः ... मानि नय
विद्युत ... नानि ... निमेष ... लौकलानि ... ७३ भवति बि... भक्ति ... पुष्पापहाराः
... किरणापरिवेषो ... दीपाः प्रथमापि ... बोध प्रयुक्ता ... विमुक्ते ... मंजु

रघुवं० ५ २२

वाक्यैर्जनरःस्तुः ७४ इति विरचितवाग्भिर्बन्दिपुत्रैः कुमारः सपदि विगतनिद्रस्तल्पमुज्झांचकार मदप
टुनिनदद्भिर्बोधितो राजहंसैः सुरगज इव गांगं सैकतं सुप्रतीकः ७५ अथ विधिमवसाय्य शा
स्त्रदृष्टं दिवसमुखोचितमञ्चिताक्षिपक्ष्मा कुशलविरचितानुरूपवेषः क्षितिपसमाजमगात्स्वयं
वरस्थं ७६ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ [illegible]

स तत्र मंचेषु मनोज्ञवेषान्सिंहासनस्थानुपचारवत्सु वैमानिकानां मरुतामपश्यदाकृ
ष्टलीलान्नरलोकपालान् १ रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वांगमिवेश्वरेण काकुत्स्थमालोकयतां
नृपाणां मनो बभूवेन्दुमतीनिराशं २ वैदर्भनिर्दिष्टमसौ कुमारः कॢप्तेन सोपानपथेन मंचं शिलाविभंगैर्मृगराजशा
वस्तुंगं नगोत्संगमिवारुरोह ३ परार्ध्यवर्णास्तरणोपपन्नमासेदिवान्रत्नवदासनं सः भूयिष्ठमासीदुपमेयका
न्तिर्मयूरपृष्ठाश्रयिणा गुहेन ४ तासु श्रिया राजपरंपरासु प्रभाविशेषोदयदुर्निरीक्ष्यः स
हस्रधात्मा व्यरुचद्विभक्तः पयोमुचां पंक्तिषु विद्युतेव ५ तेषां महार्हासनसंस्थितानामुदारने
पथ्यभृतां स मध्ये रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः ६ नेत्रव्रजाः पौ
रजनस्य तस्मिन्विहाय सर्वान्नृपतीन्निपेतुः मदोत्कटे रेचितपुष्पवृक्षा गंधद्विपे वन्य इव द्विरेफाः
७ अथ स्तुते बन्दिभिरन्वयज्ञैः सोमार्कवंश्ये नरदेवलोके संचारिते चागुरुसारयोनौ धूपे
समुत्सर्पति वैजयन्ती ८ पुरोपकण्ठोपवनाश्रयाणां कलापिनामुद्धतनृत्यहेतौ प्रध्मातशंखे प

२२

तो दिगन्तांस्तनूर्ध्वस्वनेन मूर्छन्ति विमानतूर्ये एवं मनुष्यवाह्यं चतुरस्रयानमध्यास्य कन्या परिवारशोभि विवे
श मंचान्तरराजमार्गं पतिंवराक्लृप्तविवाहवेषा १० तस्मिन्विधानातिशये विधातुः क
न्यामये नेत्रशतैकलक्ष्ये निपेतुरन्तःकरणैर्नरेन्द्रा देहैः स्थिताः केवलमासनेषु ११ तां प्रत्यभिव्यक्तमनोरथानां महीप
तीनां प्रणयाग्रदूत्यः प्रवालशोभा इव पादपानां शृंगारचेष्टा विविधा बभूवुः १२ कश्चित्कराभ्यामुपगूढनाल
मालोलपत्राभिहतद्विरेफं रजोभिरन्तःपरिवेषबन्धि लीलारविन्दं भ्रमयांचकार १३ विस्रस्तमंसादपरो विला
सी रत्नानुविद्धांगदकोटिलग्नं प्रालम्बमुत्कृष्य यथावकाशं निनाय साचीकृतचारुवक्त्रः १४ आकुंचिताग्रांगु
लिना ततोऽन्यः किंचित्समावर्जितनेत्रशोभः तिर्यग्विसंसर्पिनखप्रभेण पादेन हैमं विलिलेख पीठं १५
निवेश्य वामं भुजमासनार्धे तत्संनिवेशादधिकोन्नतांसः कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्प
रोऽभूत् १६ विलासिनीविभ्रमदन्तपत्रमापाण्डुरं केतकपत्रमन्यः प्रियानितम्बोचितसंनिवेशैर्विपाटयामास युवा न
खाग्रैः १७ कुशेशयाताम्रतलेन कश्चित्करेण रेखाध्वजलांछनेन रत्नांगुलीयप्रभयानुविद्धानुदीरया
मास सलीलमक्षान् १८ कश्चिद्यथाभागमवस्थितेऽपि स्वसंनिवेशाद्व्यतिलंघिनीव वज्रांशुगर्भांगुलि
रन्ध्रमेकं व्यापारयामास करं किरीटे १९ ततो नृपाणां श्रुतवृत्तवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी प्राक्सं
न्निकर्षं मगधेश्वरस्य नीत्वा कुमारीमवदत्सुनन्दा २० असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्र
तिष्ठः राजा प्रजारंजनलब्धवर्णः परंतपो नाम यथार्थनामा २१ कामं नृपाः सन्ति सहस्रशोऽन्ये राजं

रघुवंश

[illegible]

[illegible]

२३

न्वतीमाहुरनेन भूमिं नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः २२ क्रियाप्रबन्धादयमा
ध्वराणामजस्रमाहूतसहस्रनेत्रः शच्याश्चिरं पाण्डुकपोललम्बान्मन्दारशून्यानलकांश्चकार २३ अने
न चेदिच्छसि गृह्यमाणं पाणिं वरेण्येन कुरु प्रवेशे प्रासादवातायनसंश्रितानां नेत्रोत्सवं पुष्पपु
राङ्गनानां २४ एवं तयोक्ते तमवेक्ष्य किंचिद्विस्रंसिदूर्वाङ्कमधूकमाला ऋजुप्रणामक्रिययैव तन्वी प्र
त्यादिदेशैनमभाषमाणा २५ तां सैव वेत्रग्रहणे नियुक्ता राजान्तरं राजसुतां निनाय समीर
णोत्थेव तरंगलेखा पद्मान्तरं मानसराजहंसी २६ जगाद चैनामयमङ्गनाथः सुराङ्गनाप्रार्थितयौ
वनश्रीः विनीतनागः किल सूत्रकारैरैन्द्रं पदं भूमिगतोऽपि भुङ्क्ते २७ अनेन पर्यासयताश्रुबिन्दून्मु
क्ताफलस्थूलतमान्स्तनेषु प्रत्यर्पिताः शत्रुविलासिनीनामाक्षिप्य सूत्रेण विनैव हाराः २८ नि
सर्गभिन्नास्पदमेकसंस्थमस्मिन्द्वयं श्रीश्च सरस्वती च कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्या
णि तयोस्तृतीया २९ अथाङ्गराजादवतार्य चक्षुर्याहीति जन्यामवदत्कुमारी नासौ न काम्यो
न च वेद सम्यग्द्रष्टुं न सा भिन्नरुचिर्हि लोकः ३० ततः परं दुष्प्रसहं द्विषद्भिर्नृपं नियुक्ता प्रतिहारभूमौ नि
दर्शयामास विशेषदृश्यमिन्दुं नवोत्थानमिवेन्दुमत्यै ३१ अवन्तिनाथोऽयमुदग्रबाहुर्विशालवक्षा
स्तनुवृत्तमध्यः आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव यत्नोल्लिखितो विभाति ३२ अस्य प्रयाणेषु समग्रशक्ते
वसन्नदूरे किल चन्द्रमौलेः तमिस्रपक्षेऽपि सह प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदोषान् ३४ असौ महा

रग्रेसरैर्वाजिभिरुत्थितानि कुर्वन्ति सामन्तशिखामणीनां प्रभाप्ररोहास्तमयं रजांसि ३३ असौ महाकालनिकेतनस्य ५२

२३

राम:

हेदुःमत्रियः कार्तवीर्यः नृपः अंतःशरीरेष्वपि प्रजानां चित्तेष्वपि अविनयं प्रत्यादिदेश निराचकार कार्तवीर्यः किं कुर्वन् अकार्यस्य
चिंतासमकालमेव तुल्यकालमेव पुरस्तात् प्रादुर्भवन् चापधरः किंभूतः कार्तवीर्यः ॥ १४ ॥
कालेनिकेतेन स बैसन्लदूरोकिसी इंदुमती (नं) अनेन यूना सह पार्थिवेन रंभोरु कच्चिन्मनसो रुचिस्ते सिप्रातरंगानि
लकंपितासु विहर्तुमुद्यानपरंपरासु ३५ तस्मिन्नभिद्योतितबंधुपद्मे प्रतापसंशोषितशत्रुपंके बबंध सा नोत्तमसौकुमार्या
कुमुद्वती भानुमतीव भावं ३६ तामग्रतस्तामरसांतराभामनूपराजस्य गुणैरनूनां विधाय सृष्टिं ललितां विधातु
र्जगाद भूयः सुदतीं सुनंदा ३७ संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः अनन्यसाधारणराज
न शब्दो बभूव योगी किल कार्तवीर्यः ३८ अकार्यचिंतासमकालमेव प्रादुर्भवंश्चापधरः पुरस्तात् अंतःशा
रीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता ३९ ज्याबंधनिस्पंदभुजेन यस्य विनिश्वसद्वक्त्रपरंपरेण
कारागृहे निर्जितवासवेन लंकेश्वरेणोषितमाप्रसादात् ४० तस्यान्वये भूपतिरेष जातः प्रतीप इत्यागम
वृद्धसेवी येन श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टं ४१ आयोधने कृष्णगतं सहायमवाप्य
यः क्षत्रियकालरात्रिं धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्रसारां ४२ अस्यांकलक्ष्मीर्भव दीर्घबाहो
र्माहिष्मतीवप्रनितंबकांचीं प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः ४३ तस्याः प्रकामं प्रियदर्श ४२
नोपि न स क्षितीशो रुचये बभूव शरत्प्रमृष्टांबुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ४४ सा शूर
सेनाधिपतिं सुषेणमुद्दिश्य लोकांतरगीतकीर्तिं आचारशुद्धोभयवंशदीपं शुद्धांतरक्ष्या जगदे कुमा
री ४५ नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण सिद्धाश्रमं शांतमिवेत्य सत्त्वैर्नैसर्गि
कोप्युत्ससृजे विरोधः ४६ यस्यात्मगेहे नयनाभिरामा कांतिर्हिमांशोरिव संनिविष्टा हर्म्याग्रसंरू
ढतृणांकुरेषु तेजोविषह्यं रिपुमंदिरेषु ४७ यस्यावरोधस्तनचंदनानां प्रक्षालनाद्वारिविहारकाले कालिं

दकन्या मथुरां गतापि गंगोर्मिसंसक्तजलेव भाति ४८ त्रस्तेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौकसा यः वक्ष
स्थलव्यापिरुचिं दधानः सकौस्तुभं ह्रेपयतीव कृष्णं ४९ संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तरपुष्पशय्ये
वृन्दावने चैत्ररथादनूने निर्विश्यतां सुन्दरि यौवनश्रीः ५० अध्यास्य चांभःपृषतोक्षितानि शैलेयगन्धीनि शिलातला
नि कलापिनां प्रावृषि पश्य नृत्यं कान्तासु गोवर्धनकन्दरासु ५१ नृपं तमावर्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भ
वित्री महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव ५२ अथांगदाश्लिष्टभुजं भुजिष्या हेमांगदं नाम कलिंग
नाथं आसेदुषीं सादितशत्रुपक्षं बालामबालेन्दुमुखीं बभाषे ५३ असौ महेन्द्रादिसमानसारः पतिर्महेन्द्रस्य महोदधे
श्च यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेन्द्रः ५४ ज्याघातरेखे सुभुजो भुजाभ्यां बिभर्ति यश्चापभृतां
पुरोगः रिपुश्रियः सांजनबाष्पसेके बन्दीकृतानामिव पद्धती द्वे ५५ यमात्मनः सद्मनि संनिकृष्टो मन्द्रध्वनित्याजितया
मतूर्यः प्रासादवातायनदृश्यवीचिः प्रबोधयत्यर्णव एव सुप्तं ५६ अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्म
रेषु द्वीपान्तरानीतलवंगपुष्पैरपाकृतस्वेदलवा मरुद्भिः ५७ प्रलोभिताप्याकृतिलोभनीया विदर्भराजावरजा तयैवं तयामुवंदमा:६
तस्मादपावर्तत दूरकृष्टा नीत्येव लक्ष्मीः प्रतिकूलदैवात् ५८ अथोरगाख्यस्य पुरस्य नाथं दौवारिकी देवसरूपमेत्य इत
श्चकोराक्षि विलोकयेति पूर्वानुशिष्टां निजगाद भोज्यां ५९ पाण्ड्योयमंसार्पितलम्बहारः कॢप्ताङ्गरागो हरिचन्दनेन
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ६० विन्ध्यस्य (पर्वतस्य) संस्तम्भयिता महाद्रेः निःशेषपीतोज्झितसिन्धुनाथः
(कथा) प्रीत्याश्वमेधावभृथार्द्रमूर्तेः सौस्नातिको यस्य भवत्यगस्त्यः ६१ अस्त्रं हरादाप्तवता दुरापं येनेन्द्रलोकविजयाय दृप्तः पुराज २४
नस्थानविमर्दशंकी संधाय लंकाधिपतिः प्रतस्थे ६२ अनेन पाणौ विधिवद्गृहीते महाकुलीनेन महीव गुर्वी रत्नानु

विभ्राजीव मेखलायाः द्वितीयाः सपत्नी तव दक्षिणस्याः ६३ तांबूलवल्लीपरिणद्धपूगास्विलालतालिंगितचंदनासु तमा-
लपत्रास्तरणासु रंतुं प्रसीद शश्वन्मलयस्थलीषु ६४ इंदीवरश्यामतनुर्नृपोसौ त्वं रोचनागौरशरीरयष्टिः अन्योन्यशोभा-
पुनर्वाः ३ परिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ६५ स्वसुर्विदर्भाधिपतेस्तदीयो लेभेन्तरं चेतसि नोपदेशः दिवाकरादर्शन-
बद्धकोशे नक्षत्रनाथांशुरिवारविंदे ६६ संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा नरेंद्रमार्गाट्ट इव प्रपेदे
दूरीचकार ६ विवर्णभावं स स भूमिपालः ६७ तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोभूत् वामेतरः संशयमस्य
बाहुः केयूरबंधोच्छ्वसितैर्नुनोद ६८ तं प्राप्य सर्वावयवानवद्यं व्यावर्तितान्योपगमात्कुमारी न हि प्रफुल्लं सहकारमेत्य वृ- निवृत्ता
क्षांतरं कांक्षति षट्पदाली ६९ तस्मिन्समावेशितचित्तवृत्तिमिंदुप्रभामिंदुमतीमवेक्ष्य प्रचक्रमे वक्तुमनुक्रमज्ञा सवि- उपचक्रमे
स्तरं वाक्यमिदं सुनंदा ७० इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोभूत् काकुत्स्थशब्दं यत उन्नतेच्छाः श्ला-
घ्यं दधत्युत्तरकोशलेंद्राः ७१ महेंद्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः चकार बाणैरसुरांगनानां गंडस्थ-
लीः प्रोषितपत्रलेखाः ७२ ऐरावतास्फालनविश्लथं यः संघट्टयन्नंगदमंगदेन उपेयुषः स्वामपि मूर्तिमग्र्यामर्धा-
सनं गोत्रभिदोधितष्ठौ ७३ जातः कुले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपतिर्दिलीपः अतिष्ठदेकोनशतक्रतुत्वे शक्राभ्य-
सूयाविनिवृत्तये यः ७४ यस्मिन्महीं शासति वाणिनीनां निद्रां विहारार्धपथे गतानां वातोपि नास्रंसयदंशुकानि को
लंबयेदाहरणाय हस्तं ७५ पुत्रो रघुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता चतुर्दिगावर्जितसंभृतां यो मृत्पा-
त्रशेषामकरोद्विभूतिं ७६ आरूढमद्रीनुदधीन्वितीर्णं भुजंगमानां वसतिं प्रविष्टं ऊर्ध्वं गतं यस्य न चानुबंधि यशः परिच्छेत्तुमिय-

न्यशाले ७७ असौ कुमारस्तमजोनुयातस्त्रिविष्टपस्येव पतिं जयंतः। गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येण दम्यः सदृशीं बिभर्त्ति ७८
कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः। त्वमात्मनस्तुल्यमिमं वृणीष्व रत्नं समागच्छतु काञ्चनेन ७९ ततः
सुनंदावचनावसाने लज्जां तनूकृत्य नरेन्द्रकन्या। दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत्संवरणस्रजेव ८० सा (कुमारी) यूनि तस्मि
न्नभिलाषबंधं शशाक शालीनतया न वक्तुम्। रोमांचलक्ष्येण स गात्रयष्टिं भित्वा निराक्रामदरालकेश्याः ८१ तथा
गतायां परिहासपूर्वं सख्यां सखी वेत्रभृदाबभाषे। आर्ये व्रजामोन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ८२ सा (कुमारी) चूर्णगौरं
रघुनंदनस्य धात्रीकराभ्यां करभोपमोरूः। आसंजयामास यथाप्रदेशं कंठे गुणं मूर्त्तमिवानुरागं ८३ तया स्रजा मंगलपुष्प
मय्या विशालवक्षःस्थललंबया सः। अमंस्त कंठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः ८४ शशिनमुपगतेयं कौ
मुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुकन्यावतीर्णा। इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणामेकवाक्यं
विवव्रुः ८५ प्रमुदितवरपक्षमेकतस्तत्क्षितिपतिमंडलमन्यतो वितानं। उषसि सर इव प्रफुल्लपद्मं कुमुदवनप्रति
पन्ननिद्रमासीत् ८६ इति श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ कन्यालाभो नाम षष्ठः सर्गः ६ अथो
पयंत्रा सदृशेन युक्तां स्कंदेन साक्षादिव देवसेनां। स्वसारमादाय विदर्भनाथः पुरप्रवेशाभिमुखो बभूव १ सेनानिवे
शान्पृथिवीक्षितोपि जग्मुर्विभातग्रहमंदभासः। भोज्यां प्रति व्यर्थमनोरथत्वाद्रूपेषु वेषेषु च साभ्यसूयाः २ सान्निध्ययोगा २५
त्किल तत्र शच्याः स्वयंवरक्षोभकृतामभावः। काकुत्स्थमुद्दिश्य समत्सरोपि शशाम तेन क्षितिपाललोकः ३ तावत्प्रकी रमः
र्णाभिनवोपचारमिंद्रायुधद्योतिततोरणांकं। वरः स वध्वा सह राजमार्गं प्राप ध्वजच्छायनिवारितोष्णं ४ ततस्तदालोक

नतत्पराणांसो धेषु चामीकरजालवत्सु वन्नू बुरिर्थं उरसुंदरीणां त्यक्ता न्य कार्याणि विवेष्टितानि पञ्चाजो

कमार्गं ब्रुस्याहसाहसा [illegible] त्याकयाचिद् वेष्टनं बांतमाल्यः वृद्धुं न संभावितएव तावत्करेण रुद्धो पिहि

केशपाशः [illegible] साधिकालंबितमथपादमाक्षिप्य काचिद् वरागमेवत्रस्तष्ट जीजागतिरागवाक्षादल

क्तकांकांपदवीं ततानतु विलोचनं दक्षिणमंजनेन संभाव्यतद्वंचितवामनेत्रा तथैव वातायनसन्नि

कर्षं यथौ शलाका मपरा वहंती ८ जालांतरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबंध नीवीं

नाभिप्रविष्टाभरणप्रभेणहस्तेन तस्थाववलंब्यवासः ९ प्रद्धाचिता सत्वरमुत्थितायाः पदे

पदे दुर्निमिते गलंती कस्याश्चिदासीद्रसना तदानीमंगुष्ठमूलार्पितसूत्रशेषा १० ता

सांमुखैरासवगंधगर्भैर्व्याप्तांतराः सांद्रकुतूहलानां विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्र

पत्राभरणाः इवासन् ११ तावद्रघुवंशसिद्धिविरापि वंत्यो नाय्यो नजग्मुर्विषयांतराणि तथाहिशेषेंद्रिय

वृत्तिरासां सर्वात्मना चक्षुरिवप्रविष्टा १२ स्थाने बृता भूपतिभिः परोक्षैः स्वयंवरं साधुममंस्त भोज्या

पद्मेव नारायणमन्यथासौ लभेत कांतं कथमात्मतुल्यं १३ परस्परेण स्पृहणीयशोभं

नचेदिदं द्वंद्वमयोजयिष्यत् अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोऽभविष्यत् १४

रघुवं० ७

रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथा हि बाला गतेयमात्मप्रतिरूपमेव मनो हि जन्मान्तरसंगतिज्ञं १५ इत्युद्गताः पौरवधू
मुखेभ्यः शृण्वन्कथाः श्रोत्रसुखाः कुमारः उद्भासितं मंगलसंविधाभिः संबंधिनः सद्म समाससाद १६ ततोवतीर्याशु करेणुकायाः
स कामरूपेश्वरदत्तहस्तः वैदर्भनिर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमंतः १७ महार्हसिंहासनसंस्थितोसौ सरत्नमर्घ्यं मधु
पर्कमिश्रं भोजोपनीतं च दुकूलयुग्मं जग्राह सार्द्धं वनिताकटाक्षैः १८ दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः वे
लासकाशं स्फुटफेनराजिर्नवैरुदन्वानिव चंद्रपादैः १९ तत्रार्चितो भोजपतेः पुरोधाः हुत्वाग्निमाज्यादिभिरग्निकल्पः
तमेव चाधाय विवाहसाक्ष्ये वधूवरौ संगमयांबभूव ×२० आसीद्वरः कंटकितप्रकोष्ठः स्विन्नांगुलिः संववृते कुमारी तस्मि
न्द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन २२ तयोरपांगप्रतिसारितानि क्रियासमापत्तिनिवर्तितानि ह्रीयंत्र
णामानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि २३ प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकासे
मेरोरुपान्तेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामं २४ नितंबगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन चकार
सा मत्तचकोरनेत्रा लज्जावती लाजविसर्गमग्नौ २५ हविःशमीपल्लवलाजगंधी पुण्यः कृशानोरुदियाय धूमः क
पोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे २६ तदंजनक्लेदसमाकुलाक्षं प्रम्लानबीजांकुरकर्णपूरं
वधूमुखं पाटलगंडलेखमाचारधूमग्रहणाद्बभूव २७ तौ स्नातकैर्बंधुमता च राज्ञा पुरंध्रिभिश्च क्रमशः प्रयुक्तं क

×हस्तेन हस्तं परिगृह्य वध्वाः स राजसूनुः सुतरां चकाशे अनन्तराशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन २१

26

२६

रामः

न्याकुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूतां २८ लिंगैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः वैद
र्भमामंत्र्य ययुस्तदीयां प्रत्यर्प्य पूजामुपदाछलेन २९ स राजलोकः कृतपूर्वसंविदारंभसिद्धौ समयोपलभ्यं आदास्यमानः
प्रमदामिषं तदावृत्य पंथानमजस्य तस्थौ ३० भर्तापि तावत्क्रथकैशिकानामनुष्ठितानंतरजाविवाहः सत्वानुरूपाह
रणीकृतश्रीः प्रास्थापयद्राघवमन्वगाच्च ३१ तिस्रस्त्रिलोकीप्रथितेन सार्द्धमजेन मार्गे वसतीरुषित्वा तस्मादपावर्त्तत
कुंडिनेशः पर्वात्यये सोम इवोष्णरश्मेः ३२ प्रमन्यवः प्रागपि कोशलेंद्रे प्रत्येकमात्तस्वतया बभूवुः अतो नृपाश्चक्षमिरे
समेताः स्त्रीरत्नलाभं न तदात्मजस्य ३४ तमुद्वहंतं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः बलिप्रदिष्टां श्रियमाद
दानं त्रैविक्रमं पादमिवेंद्रशत्रुः ३५ तस्याः स रक्षार्थमनल्पयोधमादिश्य पित्र्यं सचिवं कुमारः प्रत्यग्रहीत्पार्थिववाहिनीं
तां भागीरथीं शोण इवोत्तरंगः ३६ पत्तिः पदातिं रथिनं रथेशस्तुरंगसादी तुरगाधिरूढं यंता गजस्याभ्यपतद्गजस्थं तु
ल्यप्रतिद्वंद्वि बभूव युद्धं ३७ नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयंति स्म कुलोपदेशान् बाणाक्षरैरेव परस्परस्य नामो
र्जितं चापभृतः शशंसुः ३८ उत्थापितः संयति रेणुरश्वैः सांद्रीकृतः स्यंदनवंशचक्रैः विस्तारितः कुंजरकर्णतालैर्नेत्रक्र
मेणोपरुरोध सूर्यं ३९ मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि बभुः पिबंतः परमार्थमत्स्याः पर्यावि

लानीवनवेदकानि ४० रथैरथांगाधुन्निनाविरुद्धैर्विलोलघण्टाक्वणितैर्नगाः स्वस्त्ययनामयूरहंसाद्भुतसूरसंघेः
रथस्थानमपश्यद्वोधवोधः ४१ स्ना श्रवन्तो लोचनमार्गमागुः शिरोजौघकारस्य विच्छेदितस्य शत्रुहन्तास्पृहितो वीर
उन्मावालाहृता न्तूद्धुभिस्वबाहुः ४२ संछिन्नमूलैः कृतजैनरेणुस्त्वस्वोपरि शस्त्रवनावधूतैः उत्पुंगाग्रेषु सज्जना
सँन पूर्वैर्विहितोधूमदृशावनासे ४३ प्रहारमूर्च्छापगमेरथस्थानसंवितन्तुपालम्बिवित्तितालान्वयैः सादितान्न तत्र
र्बकेतं न्तानेव समामर्षितया विरुद्धं ४४ गृध्रपाद्यास्त्रिपरवाणान्नूनाधनुर्ध्वजेतां दृष्ट्वा तनोप्रचक्राः संप्रापुरेवाभ्युत्
वानुहृत्यापूर्वमिदं नागैः फलिलिप्तैः शरवद्धं ४५ न्याधोरणानां गजस्य निपातेश्चिछिंहसिचक्रैर्निद्धिनाशकपरैः लिता
[illegible]कस्पनवरवागकोटीन्यास क्रकेशानि विरेणवेतुः ४६ पूर्वं प्रहर्त्ता न रुघानलव्यः पुनिहाराद्भुमासवसी
तुरेणमस्कोपानि [illegible]नि चन्नदेहं द्रवत्याश्वसंतं रिपुमावकोन्ह ४७ न नुत्थजां वर्मलतां विकोशोर्द्दहन्तु दंते शालिविद्धिः
नद्धिः उद्धृत्तमग्नि समदावबन्धुः गडुनाः विविग्नाः करशीकरेण ४८ शिलीमुखोत्कृत्तशिरः फलाद्ग्रास्यासुतैः
शिरश्चेष्टकोतरन्मरणाश्रितैः शोणितमदूनकुल्यारराशुं त्रुत्यारिबपानलग्नैः ४९ उपान्तयोर्निः कुषिते
विहंगैरक्षिप्यते स्मः शिरितप्रियापि केयूरकोटितताजुदेशार्धिवागुजाधेदमपाचकार ५० ग्रस्तोन्यस्तनोन्म

२७

रामः

धनादस्त्रं तां तावेव सूतौ रथिनौ च कौचित् गदाभ्यामायततांसौ प्रहारे तस्मात् युद्धे बाहुविमर्दनिष्ठौ ५२ परस्परेण क्षत
योः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव अमर्त्यभावेऽपि कयोश्चिदासीदेकाप्सरःप्रार्थितयोर्विवादः ५३ व्यूहावुभौ तावितरेतर
स्माद्भङ्गं जयं चापतुरव्यवस्थं पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्मी ५४ परेण भग्नेऽपि बले महौजा य
यावजः प्रत्यरिसैन्यमेव धूमो निवर्त्येत समीरणेन यतस्तु कक्षस्तत एव वह्निः ५५ रथी निषङ्गी कवची धनुष्मान् दृप्तः स राज
न्यकमेकवीरः विलोडयामास महावराहः कल्पक्षयोद्वृत्तमिवार्णवांभः ५६ स दक्षिणं तूणमुखेन वामं व्यापारयन्
हस्तमलक्ष्यताजौ आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव बाणान्सुषुवे रिपुघ्नान् ५८ रोषोष्ठदष्टाधिकलोहितोष्ठैर्व्यक्तोर्ध्वरेखा भ्रू
कुटीर्वहद्भिः तस्तार गां भल्लनिकृत्तकण्ठैर्हुंकारगर्भैर्द्विषतां शिरोभिः ५९ सर्वैर्बलाङ्गैर्द्विरदप्रधानैः सर्वायुधैः कङ्कट
भेदिभिश्च सर्वप्रयत्नेन च भूमिपालास्तस्मिन्प्रजह्रुर्युधि सर्व एव ६० सोऽस्त्रव्रजैश्छन्नरथः परेषां ध्वजाग्रमात्रेण बभू
व लक्ष्यः नीहारमग्नो दिनपूर्वभागः किंचित्प्रकाशेन विवस्वतेव ६१ प्रियंवदात्प्राप्तमसौ कुमारः प्रायुङ्क्त राजस्वधिराज
सूनुः गान्धर्वमस्त्रं कुसुमास्त्रकान्तः प्रस्वापनं स्वप्ननिवृत्तलौल्यः ६२ ततो धनुःकर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालं त
स्थौ ध्वजस्तम्भनिषण्णदेहं निद्राविधेयं नरदेवसैन्यं ६३ ततः प्रियोपात्तरसेऽधरोष्ठे निवेश्य दध्मौ जलजं कुमारः तेन स्वहस्तार्जितमे
कवीरः पिबन्यशो मूर्तमिवाबभासे ६४ शङ्खस्वनाभिज्ञतया निवृत्तास्तं सन्नशत्रुं ददृशुः स्वयोधाः निमीलितानामिव पंकजानां

स्त्र

मध्ये स्फुरंतं प्रतिमाद्गतांकं ददर्श सत्त्राणलिखितं निद्रेऽपि तासां केतुषु पार्थिवानां यशो हृतं संप्रति राघवेन न जीवितं वः कृपयेति वर्णाः
ददास चापकोटीनिहितैकबाहुः शिरस्त्रनिष्कर्षणभिन्नमौलिः ललाटबद्धश्रमवारिबिंदुर्भीतां प्रियामेत्य वचो बभाषे इतः परानर्भकहार्यशस्त्रान्वैदर्भि प
श्यानुमता मयासि एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः तस्याः प्रतिद्वंद्विभवाद्विषादात्सद्यो विमुक्तं मुखमाबभासे निःश्वासबाष्पापगमात्प्रपन्नः प्रसादमात्मीयमिवात्मदर्शः हृष्टापि सा ह्रीविजिता न साक्षाद्वाग्भिः
सखीनां प्रियमभ्यनंदत् स्थली नवांभःपृषताभिवृष्टा मयूरकेकाभिरिवाभ्रवृंदं ॥७०॥ इति शिरसि स वामं पादमाधाय राज्ञामुदवहदनवद्यां ता-
मवद्यादपेतः रथतुरगरजोभिर्द्युम्ला घ्यजायासमेतं तदुपहितकुटुंबः मूर्त्तीव भूव ॥७०॥ प्रथमपरिगतार्थस्तं रघुः सन्निवृत्तं विजयिनम-
भिनंद्य श्लाघ्यजायासमेतं तदुपहितकुटुंबः शांतिमार्गोत्सुकोऽभून्न हि सतिकुलधुर्ये सूर्यवंश्या गृहाय ॥७१॥ इति श्रीरघुवंशे महाकाव्ये
कविश्रीकालिदासकृतौ कुमारोद्वाहवर्णनो नाम सप्तमः सर्गः ॥७॥ अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः वसुधा-
मपि हस्तगामिनीमकरोदिंदुमतीमिवापरां ॥१॥ दुरितैरपि कर्तुमात्मसात्प्रयतंते नृपसूनवो हि यत् तदुपस्थितम-
ग्रहीदजः पितुराज्ञेति न भोगतृष्णया ॥२॥ अनुभूय वशिष्ठसंभृतैः सलिलैस्तेन सहाभिषेचनं विशदोच्छ्वसितेन मेदि-
नी कथयामास कृतार्थतामिव ॥३॥ स बभूव दुरासदः परैर्गुरुणाथर्वविदा कृतक्रियः पवनाग्निसमागमो ह्ययं स-
हितं ब्रह्म यदस्त्रतेजसा ॥४॥ रघुमेव निवृत्तयौवनं तममन्यंत नवेश्वरं प्रजाः स हि तस्य न केवलां श्रियं प्रतिपेदे सकलान्गुणानपि
पि ॥५॥ अधिकं शुशुभे शुभंयुना द्वितयेन द्वयमेव संगतं पदमृद्धमजेन पैतृकं विनयेनास्य नवं च यौवनं ॥६॥ सदयं बुभुजे म-

२८

२५

के ला वीणा सूनवै अभि
रूपा ... सकां निवे
ना ... प्राप्ति
... सामोति : द
... स्याः ९ ति ... २२

विषयेषु विनाशधर्मसु त्रिदिवस्थेष्वपि निस्पृहोऽभवत् ॥ ८

हारस्यस्तसोदिगामियं बुभुजे दितिः प्रविरोपनतां समेद्धिनी नव पाणिग्रहणां वधूमिव ७ अहमेव मतो महीपतेरिति
सर्वः प्रकृतिष्वचिन्तयत् उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित् ८ न खरो न च भूयसा मृदुः पवमा-
नः पृथिवीरुहानिव स पुरस्कृतमध्यमक्रमो नमयामास नृपाननुद्धरन् ९ अथ वीक्ष्य रघुः प्रतिष्ठितं प्रकृतिष्वा-
त्मजमात्मवत्तया तं स्थ... रिसामामयावदात्मन १० तमरण्यसमाश्रयोन्मुखं शिरसावेष्टनशो-
भिना सुतः पिर्प्य इव त्वचं पुनः प्रतिपेदे व्यपवर्जितां श्रियं १२ स किलाश्रममन्त्यमाश्रितो निवसन्नावसथे पुरा-
द्बहिः समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रिया १३ प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूतने-
श्वरं नभसा निभृतेन्दुना तुलामुदितार्केण समारुरोह तत् १४ यतिपार्थिवलिङ्गधारिणौ ददृशाते रघु-
राघवौ जनैः अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ १६ अजिताधिगमाय मन्त्रिभिः युयुजे
नीतिविशारदैरजः अनपायिपदोपलब्धये रघुराप्तैः समियाय योगिभिः १७ नृपतिः प्रकृतीरवेक्षितुं व्य-
वहारासनमाददे युवा परिचेतुमुपांशु धारणां कुशपूतं प्रवयास्तु विष्टरं १८ समवेक्ष्य तम्भूपतिर्युवा सचि-
वैर्धुसह मर्थसिद्धये अपुनर्जन्मनोपपत्तये प्रवयाः मिमिविनिवृत्तिः १९ अनुरंजयितुं प्रजाः प्रभुः व्य-
वहारासनमाददे नवः प्रशमः शुचिविविक्तमाश्रयः पत्स्वेतु यततेस्म धारणं २० अनायि सामन्तामुपाकितपदो

तमरण्यसमाश्रयोन्मुखं शिरसा वेष्टनशोभिना सुतः पितरं प्रणिपत्य पादयोरपरित्यागमयाचतात्मनः ११ रघुरश्रुमुखस्य तस्य तत्कृतवानीप्सितमात्मजप्रियः न तु सर्प ... ५

वशमेको नृपतीननंतरानपरः प्रणिधानयोग्यया मरुतः पंचशरीरगोचरान् २१ नयं च वकुरासौ दिष्ट
कृत्याप्यरंध्रस्पतत्तानमंडले न्दधयेसमरोपयनानः पामज्योतिरवेक्षितेर रघुः २२ अकरोदचिरेश्वरः
क्षितौ द्विषदारंभफलानि भस्मसात् इतरो दहने स्वकर्मणां ववृते ज्ञानमयेन
२१ वह्निना २३ पणबंधमुखान्गुणानजः षडुपायुंक्त समीक्ष्य तत्फलं रघुरप्यजयद्गुणत्रयं प्रकृतिस्थं समलोष्टकांचनः
२४ न नवः प्रभुराफलोदयात्स्थिरकर्मा विरराम कर्मणः न च योगविधेर्नवेतरः स्थिरधीरा परमात्मदर्शनात् २५
इति शत्रुषु चेंद्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ प्रसितावुदयापवर्गयोरुभयीं सिद्धिमुभाववापतुः २६ अ
थ काश्चिदजव्यपेक्षया गमयित्वा समदर्शनः समाः तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः २७ श्रुत
देहविसर्जनः पितुश्चिरमश्रूणि विसृज्य राघवः विदधे विधिमस्य नैष्ठिकं यतिभिः सार्द्धमनाग्निमग्निचि
त् २८ अकरोत्स तदौर्ध्वदेहिकं पितृभक्त्या पितृकार्यकल्पवित् न हि तेन पथा तनुत्यजस्तनयावर्जितपिंडकां
क्षिणः २९ स परार्ध्यगतेरशोच्यतां पितुरुद्दिश्य सदर्थवेदिभिः शमिताधिरधिज्यकार्मुकः कृतवानप्रति
शासनं जगत् ३० क्षितिरिंदुमती च भामिनी पतिमासाद्य तमग्र्यपौरुषं प्रथमा बहुरत्नसूरभूदपरा वीर
मजीजनत्सुतं ३१ दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतं दशपूर्वरथं यमाख्यया दशकं

गरिगुरुं विद्धैर्बुधैः ३२ रुचिदेवतागणस्वधानुजां शुनयगणनव्रसवैसगणार्थिवः
ग्रनगणत्वमनुपोचिबान्बवरिश्चेर्मुरुदरवोसदीधितिः ३३ वलनमालेनयोप
शुंतरो विदुषांसन्ततयेवकुशु तंवसुतस्यबिभोर्नकेवलं गुणवतापि
परवयोजनं ३४ सकदाचिदबेक्षित वृजः सहदेव्याविजहारमुक्तजानः
गरोपवने श्रीहितो मरुतांपानरश्चितेवनदनीः ३५ ...शोत्सूसिदक्षिणादक्षे [illegible] तगोकर्णनिकेतसमीप
रुपवीणामारितं ... चेरुद [illegible] नादृत्तिल ... ननारद ३६ रुद्रागप्रहरितिकिलतस्यवेगवानविवरसहयेव
मारुतः कुसुमैर्न्दीधितनामपार्थिवैः स्वरुमातोद्यमितेनिवेदितां ३७ भ्रमरैः सुमनोनुसारिभिः विनिकीर्णपरिवादिनी
मुनेः ददृशे पवनावलेपजं सृजतीबाष्पमिवांजनाविलं ३८ ... तिमार्त्तवीमधुगंधवतिम् ... धीरधां नृप
तेरमरस्त्रगमपप्रसादयितोरस्थलकोटिमुस्थितिं ३९ ... नस्थितवतः ... कच्चबिद्धा ... पगुनखा
तिरोपलब्धयेनिमिमीलनक्षितिपालसुंदरी ४० सममेवनराधिवेनसानुगमं ... मनो हनवेलु ... चेतसा ... सहतेलविंदु
नानदीपार्थिविरविद्धितेस्तत्तां ४१ पातातं ॥ वपुषाकरणोज्झितेनसानिपतंतीपतिमप्यपातयन्‌ ननुतैलनिषेकविंदु
नासहदीपार्चिरुपैतिमेदिनीं ४२ उभयोः पिपासुविवर्तनासुसुलेना ... विरामविडितीः विहगाः कमलाकराश्रयाः स
मदुःखोऽइवतत्रचुक्रुशुः ४३ नृपतेर्व्यजनादिभिस्ततोनतुदेशानुत ... वसंस्थितानुवृत्तिकारविशामनसामुपस्तति
शोषहितकल्पायक ... ४४ सनिशम्यनितान्तवत्सलः प्रतिकूलप्रलय ... दुरुगाता ... निलकोहृतपद्मिनीनिलांदयताकमुपस्थुलान

नः ४५ प्रतियोजयितव्यवल्लकीसमवस्थामथ सत्त्वविप्लवात् स निनाय नितान्तवत्सलः परिगृह्योचितमंकमंग
ना ४६ पतिरंकनिषण्णया तया करणापायविभिन्नवर्णया समलक्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चन्द्र
माः ४७ विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरतां अभितप्तमयोपि मार्दवं भजते कैव कथा शरीरि
षु ४८ कुसुमान्यपि गात्रसंगमात्प्रभवन्त्यायुरपोहितुं यदि न भविष्यति हन्त साधनं किमिवान्यत्प्रहरिष्यतो विधेः ४
९ अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता ५० अथ
वा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ५१ स्र
गियं यदि जीवितापहा हृदये किं निहिता न हन्ति मां विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ५२ कृ
तवत्यसि नावधीरणामपराद्धेपि यदा चिरं मयि कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे ५३ ध्रुव
मस्मि शठः शुचिस्मिते विदितः कैतववत्सलस्तव परलोकमसंनिवृत्तये यदनापृच्छ्य गतासि मामितः ५४ दयितां
यदि तावदन्वगाद्विनिवृत्तं किमिदं तया विना सहतां हतजीवितं मम प्रबलामात्मकृतेन वेदनां ५५ सुरतश्र
मवारिबिन्दवो न तु तावद्विरमन्ति ते मुखे अथ चास्तमिता त्वमात्मना धिगिमां देहभृतामसारतां ५६ म
नसापि न विप्रियं मया कृतपूर्वं तव किं जहासि मां ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबन्धना रतिः ५७ कु
सुमोत्खचितान्वलीभृतश्चलयन्भृङ्गरुचस्तवालकान् करभोरु करोति मारुतस्त्वदुपावर्तनशंकि
मे मनः ५८ तदपोहितुमर्हसि प्रिये प्रतिबोधेन विषादमाशु मे ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्त

मोघवृत्तिः ५९ इदमुच्छ्वसितालकं मुखं तव विश्रांतकथं दुनोति मां निशिसुप्तमिवैकपंकजं विरताभ्यंतरषट्पदस्वनं ६०
शशिनं पुनरेति शर्वरी दयिता द्वंद्वचरं पतत्रिणं इति तौ विरहांतरक्षमौ कथमत्यंतगता न मां दहेः ६१ नवपल्लवसंस्तरेपि ते मृ
दु दूयेत यदंगमर्पितं तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणं ६२ इयमप्रतिबोधशायिनीं रसना त्वां प्रथ
मा रहःसखी गतिविभ्रमसादनीरवा न शुचा नानुमृतेव लक्ष्यते ६३ कलमन्यभृतासु भाषितं कलहंसीषु गतं मदालसं
पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमाः ६४ त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वयि वि
रहे तव मे गुरुव्यथं हृदयं न त्ववलंबितुं क्षमाः ६५ मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ अविधाय वि
वाहसत्क्रियामनयोर्गम्यत इत्यसांप्रतं ६६ कुसुमं कृतदोहदस्त्वया यदशोकोयमुदीरयिष्यति अलकाभरणं कथं नु तत्तव
नेष्यामि निवापमाल्यतां ६७ स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभं अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि
शोच्यसे ६८ तव निःश्वसितानुकारिभिर्बकुलैरर्धचितां समं मया असमाप्य विलासमेखलां किमिदं किन्नरकंठि सुप्यते ६९
समदुःखसुखः सखीजनः प्रतिपच्चंद्रनिभोयमात्मजः अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ७० धृतिरस्तमिता
रतिश्च्युता विरतं गेयमृतुर्निरुत्सवः गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ७१ गृहिणी सचिवः सखी मिथः प्रियशि

ष्या ललिते कलाविधौ करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतं ७२ युग्मं मदिराक्षि मदाननोज्झितं मधु पीत्वा
रसवत्कथं नु मे अनुपास्यसि बाष्पदूषितं परलोकोपनतं जलाञ्जलिं ७३ विभवेपि सति त्वया विना सुखमेतावदजस्य गण्यता
म् अहृतस्य विलोभनान्तरैर्मम सर्वे विषयास्त्वदाश्रयाः ७४ विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति अक
३। रोत्पृथिवीरुहानपि स्रुतशाखारसबाष्पदुर्दिनान् ७५ अथ तस्य कथंचिदङ्कतः स्वजनस्तामपनीय सुन्दरीं विससर्ज तदन्त्यमण्ड
नामनलायागुरुचन्दनैधसे ७६ प्रमदामनु संस्थितः शुचा नृपतिः सन्निति वाच्यदर्शनात् न चकार शरीरमग्नि
सात्सह देव्या न तु जीविताशया ७७ अथ तेन दशाहतः परं गुणशेषामुपदिश्य भामिनीं विदुषा विधयो महर्द्धयः पुर एवोपव
नः वितेनिरे ७८ स विवेश पुरीं तया विना क्षणदापायशशाङ्कदर्शनः परिवाहमिवावलोकयन्स्वशुचः पौरवधूमुखाश्रुषु ७९
अथ तं सवनाय दीक्षितः प्रणिधानाद्गुरुराश्रमस्थितः अभिषङ्गजडं विजज्ञिवानिति शिष्येण किलान्वबोधयत् ८० असम
ाप्तविधिर्यतो मुनिस्तव विद्वानपि तापकारणं न भवन्तमुपस्थितः स्वयं प्रकृतौ स्थापयितुं कृतस्थितिः ८१ मयि तस्य
सुवृत्त वर्तते लघुसंदेशपदा सरस्वती शृणु विश्रुतसत्त्वसार तां हृदि चैनामुपधातुमर्हसि ८२ पुरुषस्य पदेष्वजन्मनः सम
तीतं च भवच्च भावि च स हि निष्प्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यतः ८३ चरतः किल दुश्चरं तपस्तृणबिन्दोः परिशङ्कितः पुरा

द्राग्ललितेकलाविसौकरुणाविमुखेनमस्तुनाहरणानाथ्वावद किंनमेहन्त ७२ प्रबुद्धं मदिराद्धमदाननोहृतेमधुपीस्वा
धीसवल्कधवं तु मम अनुपास्यसिवाबपूषितंपरलोकोपनतंकलांकुलितं ७३ विभवेपिसतिलयाविनासुखमेततावदजस्रगान्ध।
तोऽस्फुरितस्यविलोभमनांतरैः ममसदैवविषयास्तदाश्रयाः ७४ विलेपन्निति कोशलाधिपः कारणं ... प्रियाप्रति ...क
३। रोदप्रिवीरुहभावपशुतशाखस बाष्पदुर्दिनात ७५ अथ तस्य कथंचिदंकतः स्वकनीलामलपद्मसुदरी विसस र्जामनंदं
स्पर्शनानामनलाथागुरुचंदने क्षिते ७६ यमदाम तुर्संक्षिप्तः प्रभुवान्नृपतिः समिति या पदर्शनात् न चकार शरीरमग्नि
सात् सहदेव्या न तु जीवितासया ७७ अथ तेन दशाहतः परं गुणशेषामुपदिश्य भामिनी विदुषा विधयो महर्द्धयः पुर एवोपव
नः वितेनिरे ७८ सो विवेश पुरीं न या विना क्षणदापायशशांकदर्शनः परिवाहमिवावलोकयन्स्वशुचः पौरवधूमुखाश्रुषु ७९
नमवेक्ष्य मखाय दीक्षितः प्रभुराप्तानि कुलराश्रमाः स्मृतमाः अभिषंगजगल्मीषितं विशताभिनिविज्ञो सारणकिलान्ववरोधयन् ८० अस
मात्प्रविधिविदं ततो मुनितस्तव ... दानपितापरूपसागानमवं तमुपास्थितो स्वरूपंस्रु ... रूनतस्थितिः ८१ ... पत
स्पसुवृत्तवर्तिने लघु संदेशपदासरस्वती शृणु विश्रुतसत्वसारतोह्र दि चैनामुपधातुमर्हसि ८२ पुरुषस्य पदेष्वजन्मनः सम
तीतं च भवच्च भावि च स हि निष्प्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति ८३ चरतः किल दुश्चरं तपः तृणबिंदोः परिकल्पितः परा
३१

प्रद्धिघायसमायिमेह्नी हरिरस्मै हरिली सुरं गतो ८४ सततः प्रतिति घातमसुना प्युरवा विहतत फ वित्तमं प्रसपङ्कमाउ
षीतितं समवेलाश्लयो र्मिलासुनिः ८५ भगवत्पीरिसनवंऊनः प्रतिकृ लाचरितं क्रमत्पमेइतिचेप मैनं दिलिस्म स्र्शंहल
वानासुरमात्मदर्शनात् ८६ कश्चकेसिकवंशासमवानरभृत्वामहिषीविरायसा कउपलच्छ तीदिवश्रुतेरिवशास्त्राप
निरहितिकारतं ८७ नदलंतदपायिविंतया विपद्युत्पत्तिमतामव स्थितावस्तु चेयमवेश्नतं त्वयाचसुमत्याहि नृपः कल
त्रिलः ८८ उदयेयदवाप्यनुक्रतानुत [illegible] माविः क्रतमात्मनतचयामनसद्उपस्थिते क्ष्रेपुनरकीवतयाप्रकाश्यतां ८
९ हदतान्कुत्तस्वसप्तनः भवतानानु [illegible] शते लभ्यतेपरलोकसुवंभवकर्मभिर्गतियाभिन्नपथाहिदेहिनां ९० अपश्यो
कमनाः कुं दुं विनीमनुरुक्तीपानिरापदं [illegible] तितिः स्वउनाप्सुकिला भिसंततिंदहतिपेनमितिप्रचक्षते ९१ मरणं
प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यतेबुधैः क्षणमप्यवतिष्ठतेश्वसन्यदि जन्तुर्ननुलाभवानसौ ९२ अवगच्छतिमू
ढचेतनः प्रियनाशंहृदिशल्यमर्पितं स्थिरधीस्तुतदेवमन्यते कुशलद्वारतयासमुद्धृतं ९३ स्वशरीरशरीरिणावपि श्रि
तसंयोगविपर्ययौयदा विरहः किमिवानुतापयेद्वदबाह्यैर्विषयैर्विपश्चितः ९४ नपृथग्जनवच्छुचोवशंवशिनामुत्तम
गंतुमर्हसि द्रुमसानुमतोः किमंतरं यदिवायौद्वितयेपिते चलाः ९५ सततथेति विनेतुरुदारमतेः परिगृह्य वचोविससर्जमु

त्रिं वंतदलं व्यवच्छ्य देहलदिशो कथनेश्वरति याति चोतिक मलगुरोः ॥९१॥ तेनाष्टौ परिगमिताः समाः क-
थंचिद्बालत्वादवितथसूनृतेन सूनोः । सादृश्यप्रतिकृतिदर्शनैः प्रियायाः स्वप्नेषु क्षणलवेषु त्सवैश्च ॥९२॥
३२ तस्य प्रसह्य हृदयं किल शोकशङ्कुः प्लक्षप्ररोह इव सौधतलं बिभेद । प्राणान्तहेतुमपि तं भिषजामसाध्यं लाभं प्रियानुगमने त्व-
रया स मेने ॥९३॥ सम्यग्विनीतमथ वर्महरं कुमारमादिश्य रक्षणविधौ विधिवत्प्रजानाम् । रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः प्रायोप-
वेशनमतिर्नृपतिर्बभूव ॥९४॥ तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वोर्देहत्यागादमरगणनालेख्यमासाद्य सद्यः । पूर्वाकारा-
धिकचतुरया सङ्गतः कान्तयासौ लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥९५॥ इति श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ
अजविलापो नाम अष्टमः सर्गः ॥८॥ पितुरनन्तरमुत्तरकोसलान्समधिगम्य समाधिजितेन्द्रियः । दशरथः प्रशशास महारथो यम-
वतामवतां च धुरि स्थितः ॥१॥ अधिगतं विधिवद्यदपालयत्प्रकृतिमण्डलमात्मकुलोचितम् । अभवदस्य ततो गुणवत्तरं सनगरं नग-
रन्ध्रकरौजसः ॥२॥ उभयमेव वदन्ति मनीषिणः समयवर्षितया कृतकर्मणाम् । बलनिषूदनमर्थपतिं च तं श्रमनुदं मनु-
दण्डधरान्वयम् ॥३॥ जनपदे न गदः पदमादधावभिभवः कुत एव सपत्नजः । क्षितिरभूत्फलवत्यजनन्दने शमरतेऽमरतेजसि पा-
र्थिवे ॥४॥ दशदिगन्तजिता रघुणा यथा श्रियमपुष्यदजेन ततः परम् । तमधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमम् ॥५॥

समतया वसुवृष्टिविसर्जनैर्नियमनादसतां च नराधिपः । अनुययौ यमपुण्यजनेश्वरौ सवरुणावरुणाग्रसरं रुचा ६ नमृगयाभि
रतिर्दुरोदरं न च शशिप्रतिमाभरणं मधु । तमुदयाय न वा नवयौवना प्रियतमा यतमानमपाहरत ७ न कृपणा प्रभवत्यपि
वासवे न वितथा परिहासकथास्वपि । न च सपत्नजनेष्वपि तेन वागपरुषा परुषाक्षरमीरिता ८ उदयमस्तमयं च रघूद्वहादु
भयमानशिरे वसुधाधिपाः । स हि निदेशमलङ्घयतामभूत्सुहृदयोहृदयः प्रतिगर्जतां ९ जघननिर्विषयीकृतमेखलानु
चितास्रुविलुप्तविशेषकान् । स रिपुदारगणानकरोद्बलादनलकानलकाधिपविक्रमः १० अवनिमेकरथेन वरूथिना जि
तवतः किल तस्य धनुर्भृतः । विजयदुन्दुभितां ययुरर्णवा घनरवा नरवाहनसंपदः ११ अजयदेकरथेन स मेदिनीमुदधिनेमिमधि
× ज्यशरासनः ॥ ज्य[illegible]नः । जयमघोषयदस्य हि केवलं गजवती जवतीव्रहया चमूः १२ शमितपक्षबलः शतकोटिना शिखरिणां कुलिशेन पु
रंदरः । स शरवृष्टिमुचा धनुषा द्विषां स्वनवता नवतामरसाननः १३ चरणयोर्नखरागसमृद्धिभिर्मुकुटरत्नमरीचिभिरस्पृशन् । नृपतयः श
तशो मरुतो यथा शतमखं तमखण्डितविक्रमं १४ निववृते स महार्णवरोधसः सचिवकारितबालसुताञ्जलीन् । समनुकम्प्य सपत्नपरि
ग्रहाननलकानलकां नवमां पुरीं १५ उपगतोऽपि च मण्डलनाभितामनुदितान्यसितातपवारणः । श्रियमवेक्ष्य स रन्ध्रचलामभू
दनलसोऽनलसोमसमद्युतिः १६ तमपहाय ककुत्स्थकुलोद्भवं पुरुषमात्मभवं च पतिव्रता । नृपतिमन्यमसेवत देवता सकमला कमलाघव
मर्थिषु १७ तमलभन्त पतिं पतिदेवताः शिखरिणामिव सागरमापगाः । मगधकोसलकेकयशासिनां दुहितरोऽहितरोपितमार्गणं १८ प्रिय

33

॥ श्रीगणेशाय नमः ॥ पृथिवीं शासतस्तस्य पाकशासनतेजसः ॥ किंचिदूनमनूनर्द्धेः शरदामयुतं ययौ ॥ १ ॥ न चो-
पलेभे पूर्वेषां ऋणनिर्मोचसाधनं ॥ सुताभिधानं स ज्योतिः सद्यःशोकतमोपहं ॥ २ ॥ मनोर्वंशश्चिरं तस्मि-
न्नृन्नन्नभिव्यक्तसंततिः ॥ निमज्ज्य पुनरुत्थायन्नदःशोकद्वारीमव तं ॥ ३ ॥ अतिष्ठत्प्रत्ययापेक्षसंततिः स
चिरं नृपः ॥ प्राङ्मन्थादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥ ४ ॥ ऋष्यशृंगादयस्तस्य संतः संतानकांक्षिणः ॥ आ-
रेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः ॥ ५ ॥ तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिं ॥ अभिजग्मुर्नि-
दाघार्ताश्छायावृक्षमिवाध्वगाः ॥ ६ ॥ ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः ॥ अव्याक्षेपो भविष्यन्त्याः का-
र्यसिद्धेर्हि लक्षणं ॥ ७ ॥ भोगिभोगासनासीनं ददृशुस्तं दिवौकसः ॥ तत्फणामंडलोदर्चिर्मणिद्योति-
तविग्रहं ॥ ८ ॥ श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले ॥ अंके निक्षिप्तचरणमास्तीर्णकरपल्लवे ॥ ९ ॥ प्र-
बुद्धपुंडरीकाक्षं बालातपनिभांशुकं ॥ दिवसं शारदमिव प्रारंभसुखदर्शनं ॥ १० ॥ प्रभानुलिप्तश्रीवत्सं ल

लक्ष्म्याः यत्र विभ्रमं विलासं तत्स्य दर्पणं.

क्ष्मीविभ्रमदर्पणं ॥ कौस्तुभाख्यमपां सारं बिभ्रंतं बृहतोरसा ॥ ११ ॥ बाहुभिर्विटपाकारैर्दि-
व्याभरणभूषितैः ॥ आविर्भूतमपां मध्ये पारिजातमिवापरं ॥ १२ ॥ दैत्यस्त्रीगंडलेखानां
लो २ मदरागविलोपिभिः ॥ हेतिभिश्चेतनावद्भिरुदीरितजयस्वनं ॥ १३ ॥ मुक्तशेषविरोधेन कुलिश-
व्रणलक्ष्मणा ॥ उपस्थितं प्रांजलिना विनीतेन गरुत्मता ॥ १४ ॥ योगनिद्रांतविशदैः पावनैरव-
लोकितैः ॥ भृग्वादीननुगृह्णंतं सौखशायनिकानृषीन् ॥ १५ ॥ अष्टभिरादिक्रियाकुल-
कं ॥ प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषां ॥ अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरं ॥ १६ ॥ नमो वि-
श्वसृजे पूर्वं विश्वं तदनु बिभ्रते ॥ अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥ १७ ॥ रसांतराण्येक

२

[निर्विकारः इति] [बुधाः]

रसं यथा दिव्यं पयोऽश्नुते ॥ देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥१८॥ हृदयस्थमनासन्नमका

[हमागवत् इति]

मं त्वां तपस्विनं ॥ दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥१९॥ अमेयो मितलोकस्त्वमनर्थी प्रार्थ

[जयितुं शीलं यस्य] [जगतः] [उपाधितः]

नावहः ॥ अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणं ॥२०॥ एकः कारणतस्त्वं तामवस्थां प्रप

द्यसे ॥ नानात्वं रागसंयोगात्स्फटिकस्येव ते स्मृतं ॥२१॥ सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमा

त्मभूः ॥ सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥२२॥ सप्तसामोपगीतं त्वां सप्तार्णवजलेशयं ॥

सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयं ॥२३॥ अभ्यासनिगृहीतेन मनसा हृदयाश्रयं ॥ ज्यो

तिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ॥२४॥ चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ॥ च

तुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥२५॥ अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ॥ २

स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥२४॥ शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः ॥ प
र्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्त्तितुं ॥२५॥ बहुधाप्यागमैर्भिन्नाः पंथानः सिद्धिहेतवः ॥
त्वय्येव निपतंत्योघा जाह्नवीया इवार्णवे ॥२६॥ त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणां ॥ गति
स्त्वं वीतरागाणामभूयः संनिवृत्तये ॥२७॥ प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ॥ आप्तवागनुमा
नाभ्यां साध्यं त्वां प्रति का कथा ॥२८॥ केवलं स्मरणेनापि पुनासि पुरुषं यदा ॥ अनेन वृत्तयः शेषा नि
वेदितफलास्त्वयि ॥२९॥ उदधेरिव रत्नानि तेजांसीव विवस्वतः ॥ स्तुतिभ्यो व्यतिरिच्यंते दूराणि चरि
तानि ते ॥३०॥ अनवाप्तमवाप्तव्यं न ते किंचिन विद्यते ॥ लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः
॥३१॥ महिमानं यदुत्कीर्त्य तव संह्रियते वचः ॥ श्रमेण तदशक्त्या वा न गुणानामियत्तया ॥३२॥ इति प्र

२ सादयामासुस्ते सुरास्तमधोक्षजं ॥ भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ॥ ३४ ॥ तस्मै कु-
३ शलसंप्रश्नव्यञ्जितप्रीतये सुराः ॥ भयमप्रलयोद्वेलादाचख्युर्नैरृतोदधेः ॥ ३५ ॥ अथ वेलासमा-
दिना॰ सन्नशैलरन्ध्रानुनादिना ॥ स्वरेणोवाच भगवान्परिभूतार्णवध्वनिः ॥ ३६ ॥ पुराणस्य कवेस्तस्य वर्णस्था-
नसमीरिता ॥ बभूव कृतसंस्कारा चरितार्थैव भारती ॥ ३७ ॥ बभासे दशनज्योत्स्ना सा विभोर्वदनोद्गता ॥
निर्यातशेषा चरणाद्गङ्गेवोर्ध्वप्रवाहिनी ॥ ३८ ॥ जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ ॥ अ-
ङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ ॥ ३९ ॥ विदितं तप्यमानं च तेन मे भुवनत्रयं ॥ अकामोपनतेने-
व साधोर्हृदयमेनसा ॥ ४० ॥ कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा ॥ स्वयमेव हि वातो-
ऽग्नेः सारथ्यं प्रतिपद्यते ॥ ४१ ॥ स्वासिधारापरिहृतः कामं चक्रस्य तेन मे ॥ स्थापितो दशमो मूर्धा लभ्यां- ३

शङ्करं दसा ॥४३॥ त्वष्टुर्वैरात्तिसृणांचित्रमयातनस्य दुरात्मनः ॥ अत्तास्त्रूढं रिपोः स्वं स्वं चेदनेनैवमो-
हिनः ॥४४॥ धातारं तपसा प्रीतं ययाचे स हि राक्षसः ॥ दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मु-
खः ॥४५॥ सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमं ॥ करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःक-
मलोच्चयं ॥४६॥ अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पुनः ॥ मायाविभिरनालीढमादास्य-
ध्वे निशाचरैः ॥४७॥ वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतां पथि ॥ पुष्पकालोकसंक्षोभं मे-
घावरणतत्पराः ॥४८॥ मोक्ष्यसे सुरबन्दीनां वेणीर्वीर्यविभूतिभिः ॥ शापयन्त्रितपौलस्त्यबला-
त्कारकचग्रहैः ॥४९॥ रावणावग्रहक्लान्तमिति वागमृतेन सः ॥ अभिवृष्य मरुत्सस्यं कृ-
ष्णमेघस्तिरोदधे ॥५०॥ पुरुहूतप्रभृतयः सुरकार्योद्यताः सुराः ॥ अंशैरनुययुर्विष्णुं पुष्पैर्वा-

४ गुरुभिर्वन्द्यमानः ॥५०॥ अथ तस्य विशांपत्युरन्ते काम्यस्य कर्मणः ॥ पुरुषः प्रबभूवाग्नेर्विस्मयेन स-
हर्त्विजां ॥५१॥ हैमपात्रीगतं दोर्भ्यामादधानः पयश्चरुं ॥ अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहं ॥
५२ ॥ प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः ॥ वृषेव पयसां सारमाविष्कृतमुदन्वता ॥५३॥
अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः ॥ प्रसूतिं चकमे तस्मिंस्त्रैलोक्यप्रभवोऽपि यत् ॥
५४ ॥ स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितं ॥ द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपं ॥५५॥
अर्चिता तस्य कौशल्या प्रिया केकयवंशजा ॥ अतः संभाविताभ्यां तां सुमित्रामैच्छदीश्वरः ॥५६॥
ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः ॥ चरोरर्धार्धभागाभ्यां तामयोजयतामुभे ॥५७॥ सा हि प्रण-
यवत्यासीत्सपत्न्योरुभयोरपि ॥ भ्रमरी वारणस्येव मदनिस्यन्दरेखयोः ॥५८॥ ताभिर्गर्भः प्र- ७

सर्वस्वेनाः सोमः नाभिः नवनाडीभिः डकांविकाय युगवत्
जाम्बूनदेन्द्रदेवांशंसंभवं ॥ सोमिभिरिवनाडीभिरन्ततास्वाभिरन्वयं ॥८०॥ समन्मांपन्नस
सोमपंक्तिम्
न्नास्ताः वमुरोपांतुरान्विषः ॥ प्रतनीतफलाश्चारंभाः सस्पानामिर्वसंपदः ॥८१॥ गुणैर्दद्दहे श्चुरात्मा
स्त्रियः
नेसवाः स्वप्रेषुवामनैः ॥ छत्रसिंहं खगदाशाङ्गचक्रलांछितमूर्तिभिः ॥८२॥ हिमवत्सथमा
स्प्रात्मा गहदेव पत्मान्वलकौस्तुभं
जालेंगगनेचविततन्वता ॥ उदसंतेसमस्तुपलेनवेगाह्रिश्चवयोमुक्ता ॥८३॥ विभ्रतताकौस्तुभम
न्यासंस्तनोन्तरविलेविते ॥ वधूपास्पंतलक्ष्मीचपयत्नयजनहस्तयाः ॥८४॥ हन्ताभिषकैर्दि
गंगायां वेद वह्निः सेवकापाल्तः
मायांविस्नातासिचसंनुभिः ॥ ब्रह्मषिभिर्दर्त्तब्रसन्ग्रणंह्निहस्वपतस्थिरैः ॥८५॥ तांभक्तया
विधानत्स्वकृत्वाप्रस्तुत्वाश्रीनामोपपार्थिवः ॥ मनेपरार्द्धमीतात्मानंगुरुत्वेनंजगद्गुरोः ॥८६॥ वि
भक्तात्माविमुक्तासामैकः कुन्तिर्वनेकधा ॥ उवाचसंप्रतिमाचेट्ःशसन्नानामपार्थिवं ॥८७॥

५ ग्र्याग्र्यमहिषी राज्ञः प्रसूतिसमये सती ॥ पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः ॥६८॥ रामेत्यभि
5 रामेण वपुषा तस्य नोदितः ॥ नामधेयं गुरुश्चक्रे जगत्प्रथममंगलं ॥६९॥ रघुवंशप्रदीपेन तेनाप्रतिम
तेजसा ॥ रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् ॥७०॥ शय्यागतेन रामेण माता शातोदरी ब
भौ ॥ सैकताम्भोजबलिना जाह्नवीव शरत्कृशा ॥७१॥ कैकेय्यास्तनयो जज्ञे भरतो
नाम शीलवान् ॥ जनयित्रीमलंचक्रे यः प्रश्रय इव श्रियं ॥७२॥ सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सु
षुवे यमौ ॥ सम्यगाराधिता विद्या प्रबोधविनयाविव ॥७३॥ निर्दोषमभवत्सर्वमाविष्कृतगुणं
जगत् ॥ अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमं ॥७४॥ तस्योदये चतुर्मूर्तेः पौलस्त्यचकिते
श्वराः ॥ विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥७५॥ कृशानुरपधूमत्वात्प्रसन्नत्वात्प्रभाक ५

उभौवी द्वितौ रामोऽपि निक्षमये
रः ॥ रक्षोविघ्नकृतां वीरस्तामेव विश्रुद्धस्य चाभिदे ॥ ७६ ॥ दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रि

पतिताः कादम्बीयानां दशरथस्य जातपुत्रस्य
यः ॥ मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः ॥ ७७ ॥ पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः ॥

पपात
आरंभं प्रथमं चक्रुर्देवदुंदुभयो दिवि ॥ ७८ ॥ संतानकमयी वृष्टिर्भवने चास्य पेतुषी ॥ सन्मंग

प्रथमक्रिया दुग्धपायिनः
लोपचाराणां सैवादिरचनाभवत् ॥ ७९ ॥ कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः ॥ आनंदे

शिक्षया वृद्धिं
नाग्रजेनेव समं ववृधिरे पितुः ॥ ८० ॥ स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा ॥ मुमूर्छ सहजं ते

गजादिकेन अग्नीनां उद्द्योत प्रकाशयामासुः नन्दनवनं
जो हविषेव हविर्भुजां ॥ ८१ ॥ परस्परविरुद्धास्ते तद्रघोरनघं कुलं ॥ अलमुद्द्योतयामासुर्देवार।

वृक्षतादयः
ण्यमिवर्तवः ॥ ८२ ॥ समानेऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ ॥ तथा भरतशत्रुघ्नौ प्रीत्या द्वंद्वं बभू

चतुर्णामध्ये रामलक्ष्मणयोः भरतशत्रुघ्नयोः
वतुः ॥ ८३ ॥ तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन ॥ यथा वायुविभावस्वोर्यथा चंद्रसमुद्रयोः ॥ ८४ ॥

प्रसादेन विनयेन ग्रीष्मान्ते
ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च ॥ मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ॥ ८५ ॥ स चतु

६

ढिवमो भक्त्याङ्कं पृथिवीपतेः॥ धर्मार्थकाममोक्षाणामवतार इवाङ्गवान्॥८४॥ गुणैराग-

धयामासुस्ते गुरुं गुरुवत्सलाः॥ तमेव चतुरन्तेशं रत्नैरिव महार्णवाः॥८५॥ सुरगज इव दन्तै-

र्भग्नदैत्यासिधारैर्नय इव पणबन्धव्यक्तयोगैरुपायैः॥ हरिरिव युगदीर्घैर्दोर्भिरंशैस्

तदीयैः पतिरवनिपतीनां तैश्चकासे चतुर्भिः॥८६॥ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ

रामावतारो नाम दशमः सर्गः॥१०॥ कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये॥ का-

कपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते॥१॥ कृच्छ्रलब्धमपि लब्धवर्णभाक्तं

दिदेश मुनये सलक्ष्मणम्॥ अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थिता॥

२॥ यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसत्क्रियाम्॥ तावदाशु विहिता मरुत्स-

पुष्पसहितजलवर्षिभिः मेघैः
खैः सपुष्पजलवर्षिभिर्घनैः ॥३॥ तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपे
प्रवासं करिष्यतोः निपेतुः स्थितिशेषः
ततुः ॥ भूपतेरपि तयोः प्रवत्स्यतोर्नम्रयोरुपरि बाष्पबिन्दवः ॥४॥ लक्ष्मणानुचरमेव राघवं ने
इच्छति स्नेहरचयः आशीः
तुमैच्छदृषिरित्यसौ नृपः ॥ आशिषं प्रयुयुजे न वाहिनीं सा हि रक्षणविधौ तयोः क्षमा ॥५॥ तौ
काकपक्षौ
पितुर्नयनजेन वारिणा किंचिदुक्षितशिखण्डकावुभौ ॥ धन्विनौ तमृषिमन्वगच्छतां पौरदृष्टिकृ
यतोः
तमार्गतोरणौ ॥६॥ मातृवर्गचरणस्पृशौ मुनेस्तौ प्रपद्य पदवीं महौजसः ॥ रेजतुर्गतिवशात्प्र
सूर्यस्य चैत्रवैशाखौ
वर्तिनौ भास्करस्य मधुमाधवाविव ॥७॥ वीचिलोलभुजयोस्तयोर्गतं शैशवाच्चपलमप्य
वर्षासमये नयलोपः सामर्थ्यात्
शोभत ॥ तोयदागमइवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितं ॥८॥ तौ बलातिबलयोः प्रभा
मन्त्रयोः ऋषिनोपदेशयोः रत्नबद्धभूमिस्तत्रयोग्यौ
वतो विद्ययोः पथि मुनिप्रदिष्टयोः ॥ मम्लतुर्न मणिकुट्टिमोचितौ मातृपार्श्वपरिवर्तिनाविव

७ व॥ ९॥ सर्ववृत्तकथनैः पुराविदः सानुजः पितृसखस्य राघवः ॥ उह्यमान इव वाहनोचितः पा

7 दचारगतमप्ययत्नवान् ॥१०॥ तौ सरांसि रसवद्भिरंबुभिः कूजितैः श्रुतिसुखैः पतत्रिणः ॥

वायवः सुरभिपुष्परेणुभिश्छायया च जलदाः सिषेविरे ॥११॥ नांभसां कमलशोभिनां तथा

शाखिनां न च परिश्रमच्छिदां ॥ दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः ॥१२

॥ स्थाणुदग्धवपुषः तपोवनं प्राप्य दाशरथिरात्तकार्मुकः ॥ विग्रहेन मदनस्य चारुणा

सोऽभवत्प्रतिनिधिर्न कर्मणा ॥१३॥ तौ सुकेतुसुतया खिलीकृते कौशिकाद्विदितशापया

पथि ॥ निन्यतुः स्थलनिवेशिताटनी लीलयैव धनुषी अधिज्यतां ॥१४॥ ज्यानिनादमनुगृ

ह्णती तयोः प्रादुरास बहुलक्षपाछविः ॥ ताडका चलकपालकुंडला कालिकेव निविडाब ७

लाकिनी ॥ १५॥ तीव्रवेगधुतमार्गहृक्षया प्रेतचीवरवसा स्वनोग्रया ॥ अभ्यभावि भरताग्रज
स्तया वात्ययेव पितृकाननोत्थया ॥ १६॥ उद्यतैकभुजयष्टिमायतीं श्रोणिलंबिपुरुषांत्र
ताडका=२ मेखलां ॥ तां विलोक्य वनितावधे घृणां पत्रिणा सह मुमोच राघवः ॥ १७॥ यच्चकार विवरं
शिलाघने ताडकोरसि स रामसायकः ॥ अप्रविष्टविषयस्य रक्षसां द्वारतामगमदंतकस्य
तत् ॥ १८॥ बाणभिन्नहृदया निपेतुषी सा स्वकाननभुवं न केवलां ॥ विष्टपत्रयपराजयस्थि
रां रावणश्रियमपि व्यकंपयत् ॥ १९॥ राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी
दु=२ ॥ गंधवद्रुधिरचंदनोक्षिता जीवितेशवसतिं जगाम सा ॥ २०॥ नैर्ऋतघ्नमथ मंत्रवन्मुनेः प्रापदस्त्र
मवदानतोषितात् ॥ ज्योतिरिंधननिपाति भास्करात् सूर्यकांत इव ताडकांतकः ॥ २१॥ वामना

८ अमपदं ततः परं पावनं अक्षतेमु वेपिवान्ब्धेः॥ हृष्टमनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि विभुर्बभूव
राघवः॥ २२॥ स्वाश्रमस्यादमुनिरात्मनस्ततः शिष्यवर्गपरिकल्पिताहणं॥ बद्धपल्लवपुटाञ्जलि
8 द्रुमं दर्शनोत्सुकमृगं तपोवनं॥ २३॥ तत्र दीक्षितमृषिं ररक्षतुर्विघ्नतो दशरथात्मजौ शरैः
॥ लोकमन्धतमसात्क्रमोदितौ रश्मिभिः शशिदिवाकराविव॥ २४॥ वीक्ष्य वेदिमथ रक्तबिन्दुभि
र्बन्धुजीवपृथुभिः प्रदूषितां॥ संभ्रमोऽभवदपोढकर्मणामृत्विजां च्युतविकङ्कतस्रुचां॥ २५॥
उन्मुखः सपदि लक्ष्मणाग्रजो बाणमाश्रयमुखात्समुद्धरन्॥ रक्षसां बलमपश्यदम्बरे गृध्र
पक्षपवनेरितध्वजं॥ २६॥ तत्र यावधिपती मखद्विषां तौ शरव्यमकरोत्स नेतरान्॥ किं महोरग
विसर्पिविक्रमो राजिलेषु गरुडः प्रवर्तते॥ २७॥ सोऽस्त्रमुग्रजवमस्त्रकोविदः संदधे धनुषि वायु ८

[ग्रस्तेन शैलवत्पर्वतवद्गुरुं स्थूलम्]
दैवतं॥ तेन शैल[illegible]गुरुमप्य[illegible]पातयत्पाण्डुपत्रमिव ताडकासुतं॥२८॥ यः सुबाहुरिति राक्षसोऽप

[सुबाहुं कुशली विहगानां दत्तवान्]
रस्तत्र तत्र विससर्प मायया॥ तं क्षुरप्रशकलीकृतं कृती पत्रिणां व्यभजदाश्रमाद्बहिः॥२९॥

[रामलक्ष्मणयोः रणे साधुः स्तुत्य याचकाः विश्वामित्रस्य बद्धमौनस्य]
इत्यपास्तमखविघ्नयोस्तयोः सांयुगीनमभिनंद्य विक्रमं॥ ऋत्विजः कुलपतेर्यथाक्रमं वाग्यत

[निष्पादितवन्तः रामलक्ष्मणौ प्राप्तावभृथस्नानेन स्नातः विश्वामित्रः]
स्य निरवर्त्तयन्क्रियाः॥३०॥ तौ प्रणामचलकाकपक्षकौ भ्रातरावभृथसाप्लुतौ मुनिः॥ आशिषा

[स्पृष्टवान् दर्भैः पाटितं तलं यस्य स तेन हस्तेन विश्वामित्रं आहूतवान् जनकराजा विश्वामित्रः नगरीं]
मनुपदं समस्पृशद्दर्भपाटिततलेन पाणिना॥३१॥ तं न्यमंत्रयत संभृतक्रतुर्मैथिलः स मिथिलां

[लक्ष्य रामलक्ष्मणौ तस्य जनकस्य धनुः तत्र तद्धनुःश्रवणोत्पन्नं कौतुहलं विश्वामित्ररामलक्ष्मणैः कल्याणेषु]
व्रजन्वशी॥ राघवावपि निनाय बिभ्रतौ तद्धनुःश्रवणजं कुतूहलं॥३२॥ तैः शिवेषु वसतिर्गता

[संध्यासमये येषु गौतमस्य पत्नी अहिल्या प्राप्]
ध्वभिः सायमाश्रयतरुष्वगृह्यत॥ येषु दीर्घतपसः परिग्रहो वासवक्षणकलत्रतां ययौ॥

[यस्मात् सुदरं गौतमपत्नी शरीरं खलु पापहारिणां]
३३॥ प्रत्यपद्यत चिराय यत्पुनश्चारुगौतमवधूः शिलामयी॥ स्वं वपुः स किल किल्बिषच्छि

[रामलक्ष्मणसहितं प्राप्तं विश्वामित्रं श्रुत्वा राजा जनानां मनुष्याणां नाथः ईश्वरः]
दां रामपादरजसामनुग्रहः॥३४॥ राघवान्वितमुपस्थितं मुनिं तं निशम्य जनको जनेश्वरः॥ अर्थ

साद्रमवलोकनेपानमुच्यते=२

कामसहितं स पर्ययादेह वृद्धमिव धर्ममभ्यगात् ॥ ३५ ॥ तौ विदेहनगरीनिवासिनां गां गताविव दिवः पु-
नर्वसू ॥ मन्यते स्म पिबतां विलोचनैः पक्ष्मपातमपि वञ्चनां मनः ॥ ३६ ॥ यूपवत्यवसिते क्रि-
याविधौ कालवित्कुशिकवंशवर्धनः । राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयांबभूव सः ॥
३७ ॥ तस्य वीक्ष्य ललितं वपुः शिशोः पार्थिवः प्रथितवंशजन्मनः । स्वं विचिन्त्य च धनुर्दुरानमं
पीडितो दुहितृशुल्कसंस्थया ॥ ३८ ॥ अब्रवीच्च भगवन्मतङ्गजैर्यद्बृहद्भिरपि कर्म दुष्करं ॥ तत्र
नाहमनुमन्तुमुत्सहे मोघवृत्ति कलभस्य चेष्टितं ॥ ३९ ॥ ह्रेपिता हि बहवो नरेश्वरास्तेन तात धनुषा
धनुर्भृतः ॥ ज्यानिघातकठिनत्वचो भुजान्स्वान्विधूय धिगिति प्रतस्थिरे ॥ ४० ॥ प्रत्युवाच तमृषि-
र्निशम्यतां सारतोऽयमथवा गिरा कृतं ॥ चाप एव भवतो भविष्यति व्यक्तशक्तिरशनिर्गिराविव ॥ ४१ ॥

गिरा साधनीया नास्तीत्यर्थः
गीर्व्यक्तेत्यर्थः=२

रम्यमाप्तवचनात्सपौरुषं काकपक्षधरेपि राघवे ॥ श्रद्दधे त्रिदशगोपमात्रके दाहशक्तिमिव कृष्ण
वर्त्मनि ॥४२॥ आदिदेश गणशोऽथ पार्श्वगान्कार्मुकाभिहरणाय मैथिलः ॥ तेजसस्य धनुषः प्रवृ
त्तये तोयदानिव सहस्रलोचनः ॥४३॥ ग्यातुयाचं जनकस्य राघवे भ्रमहस्तिपारकुक्षचक्षुषः ॥ आन
यन्ति मुदितास्म ते धनुर्दुर्वलं तु बहुसारवत्तया ॥४४॥ तत्प्रसुप्तभुजगेन्द्रभीषणं प्रेक्ष्य दाशरथिराद
दे धनुः ॥ विद्रुतक्रतुमृगानुसारिणं येन बाणमसृजद्वृषध्वजः ॥४५॥ [illegible] ॥ भाज्यमानमतिमात्रकर्षणा =मानंर्मति=४
त्तेन वज्रपरुषस्वनं धनुः ॥ भार्गवाय दृढमन्यवे पुनः क्षत्रमुद्यतमिव न्यवेदयत् ॥४६॥ आत
तज्यमकरोत्स संसदा विस्मयस्तिमितनेत्रमीक्षितः ॥ शैलसारमपि नातियत्नतः पुष्पचापमि
व पेशलं स्मरः ॥४७॥ [illegible] मैथिलः सपदि सत्यसंगरो राघवाय तनयामयोनिजां सन्निधौ द्यु

१० तिमततस्ययोनिधैर्येगिनसाहितिकर्म्मिंवातितस्यश्वान् ॥४८॥ प्राहिणोच्चमहितंमहारथः कोशला
धिपतयेपुरोधसं ॥ भृत्यभाविदुहितुः परिग्रहाद्दिश्यतांकुलमिदंनिमेरिति ॥४९॥ अन्वियेष
सदृशींचसस्नुषांप्रापचैनमनुकूलवाग्द्विजः ॥ सद्यएवसुकृतांहिपच्यतेकल्पवृक्षफलधर्
म्मिकांक्षितं ॥५०॥ उत्सुकश्चसुतदारकर्म्मणा सोऽभवज्जुहरुपागतश्रुतं ॥ गोतमस्यतनयोऽनुकू
लवान्प्रार्थितंहिसुकृतामकालहृत् ॥५१॥ तस्यकल्पितपुरस्क्रियाविधेः शुश्रुवान्वचनमग्रज
न्मनः ॥ उच्चचालबलभित्सखोवलीसैन्यरेणुमुषितार्कदीधितिः ॥५२॥ आससादमिथिलांसवे
ष्टयन्पीडितोपवनपादपैर्बलैः प्रीतिरोधमसहिष्टसापुरीस्त्रीवकान्तपरिभोगमायतं ॥५३॥
तौसमेत्यसमयेस्थितावुभौभूपतीवरुणवासवोपमौ ॥ कन्यकातनयकौतुकक्रियांस्वप्रभावसदृ १०

नात्र युक्तमिति विवाहदोषः किंतु भिन्नोदरत्वादुक्तं पितृव्यपुत्रे सापत्न्ये परनारीसुते पुत्रावि विवाहविधानपक्षाद्दोषपरिवेत्तान दूषितौ ॥२॥

विस्तारयामासुः सीतां रामः वाल्मीकिकन्यां भरतशत्रुघ्नौ
श्रीविततेन तुः ॥५४॥ मैथिलीमुदवहद्रघूद्वहो लक्ष्मणोऽनु तदनुजामथोर्मिलां यौ तयोरवरजौ वरौजसौ
मांडवीश्रुतकीर्तिरिवनी उद्वाहाः
तौ कुशध्वजसुते सुमध्यमे ॥५५॥ ते चतुर्थसहितास्त्रयो बभुः सूनवो नववधूपरिग्रहाः ॥ सा-
दानमेवविधि दंडाः तस्य दशरथस्य यथा लक्ष्मणभरतशत्रुघ्नैः
मदानविधिभेदविग्रहाः सिद्धिमंत इव तस्य भूपतेः ॥५६॥ ता नराधिपसुता नृपात्मजैस्ते च ताभिरगमन्
धातु योग
कृतार्थतां ॥ सोऽभवद्वरवधूसमागमः प्रत्ययप्रकृतियोगसन्निभः ॥५७॥ एवमात्तरतिरात्मसंभवांस्तान् — आत्तः प्राप्तः रतिः प्रीतिः यस सः ॥४

दशरथः ॥४ विवाह मिथिलायां प्रयाणेषु सत्सु दशरथस्य कदाचित्
न्निवेश्य चतुरोऽपि तत्र सः ॥ अध्वसु त्रिषु विसृष्टमैथिलः स्वां पुरीं दशरथो न्यवर्तत ॥५८॥ तस्य जातु
पवनाः प्रतिकूलगामिनः मार्गे क्लिशंति स्म बाहुल्येन सेनां
मरुतः प्रतीपगा वर्त्मसु ध्वजतरुप्रमाथिनः ॥ चिक्लिशुर्भृशतया वरूथिनीमुत्तटा इव नदीरयाः
जलैः व्याप्तिशीलाः सूर्यः गरुडशमितस्य सर्पस्य
स्थलीं ॥५९॥ लक्ष्यते स्म तदनंतरं रविर्बद्धभीमपरिवेषमंडलः ॥ वैनतेयशमितस्य भोगिनो भो-
भ्रष्टः सिकराः स्त्रियः
गवेष्टित इव च्युतो मणिः ॥६०॥ श्येनपक्षपरिधूसरालकाः सांध्यमेघरुधिरार्द्रवाससः ॥ अंगना
श्येनपक्षः श्येनपक्षवत् परिधूसरा अलकाः यासां ताः ॥२ संध्यासमये भवाः सांध्याः सांध्यमेघवत् रुधिरेणार्द्राणि वासांसि यासां ताः ॥२

११

सूर्यः महाभयं
इवरजस्वला दिशो नो बभूवुरवलोकनक्षमाः ॥६१॥ भास्करश्च दिशमध्युवास यां तां श्रिताः प्रति
हरुः तर्पलोचितं प्रेरयन्त्यः परशुरामं जंबुकाः
भयं ववाशिरे । क्षत्रशोणितपितृक्रियोचितं चोदयन्त्य इव भार्गवं शिवाः ॥६२॥ तत्प्रतीपपवनादि
दुःनिमित्तं किल ज्ञात्वा कृत्यज्ञः वशिष्ठं दशरथः लघुकृतवान् पीडां
वैकृतं प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित् । अन्वयुङ्क्त गुरुमीश्वरः क्षितेः स्वन्तमित्यलघयत्स तद्व्यथां ॥

शीघ्रं सः समूहः प्रकटीबभूव खलु सेनामुखे नेत्राणि लोकैः विभावनीय
६३ तेजसः सपदि राशिरुत्थितः प्रादुरास किल वाहिनीमुखे । यः प्रमृज्य नयनानि सैनिकैर्लक्ष
चिरकालात् पितुरागतं यज्ञोपवीतलक्षणं मातुरागतं मात्रिकं
णीयपुरुषाकृतिश्चिरात् ॥६४॥ पित्र्यमंशमुपवीतलक्षणं मात्रिकं च धनुरूर्जितं दधत् ॥ यः ससोम
द्विजिह्वैः सह वर्तमानः स्थितः परशुरामेण आत्मीयस्य आज्ञायाः
इव घर्मदीधितिः सद्विजिह्व इव चन्दनद्रुमः ॥६५॥ येन रोषपरुषात्मनः पितुः शासने स्थितिभिदोऽपि
कंपायमानाया जनन्याः शिरश्छेदनेन प्रथमं दया पृथिवी
तस्थुषा ॥ वेपमानजननीशिरश्छिदा प्रागजीयत घृणा ततो मही ॥६६॥ अक्षबीजवलयेन निर्बभौ
दक्षिणकर्णस्थितेन क्षत्रियान्तकरणैकविंशतिः धारयन् भार्गवः
दक्षिणश्रवणसंस्थितेन यः ॥ क्षत्रियान्तकरणैकविंशतेर्व्याजपूर्वगणनामिवोद्वहन् ॥६७॥ तं पि ९

सं२

ततः दक्षिणकर्णेन (left margin)

विशिष्टः सुष्ठु अन्तं यस्य (right margin)

कोपः क्रोधः परुषः ... तातस्य जनकः पिता ... कोमलस्य कठिनस्य ... निर्दयता महीत्यमरः (right margin)

मन्युः शोके च क्रुधि स्त्रियामित्यमरः २

बालाः बालकाः ... पुत्राः ...
दारुणं भीषणं भीष्मं ... इत्यमरः २
छिद्रे ... इत्यमरः २

तुर्वधभवेन मन्युना राजवंशनिधनाय दीक्षितं ॥ बालसूनुरवलोक्य भार्गवं स्वां दशां च विषसाद पार्थि-
वः ॥ ६७ ॥ राम नाम इति तुल्यमात्मजे वर्त्तमानमहिते च दारुणे ॥ हृद्यमस्य भयदायि चाभवद्रत्नजात-
मिव हारसर्पयोः ॥ ६८ ॥ अर्घ्यमर्घ्यमिति वादिनं नृपं सोनवेक्ष्य भरताग्रजो यतः ॥ क्षत्रकोपदहना-
र्चिषं ततः संदधे दृशमुदग्रतारकां ॥ ७० ॥ तेन कार्मुकनिषक्तमुष्टिना राघवो विगतभीः पुरोग-
तः ॥ अंगुलीविवरचारिणं शरं कुर्वता निजगदे युयुत्सुना ॥ ७१ ॥ क्षत्रजातमपकारवैरि मे
तन्निहत्य बहुशः शमं गतः ॥ सुप्तसर्प इव दण्डघट्टनाद्रोषितोस्मि तव विक्रमश्रवात् ॥ ७२ ॥ मैथि-
लस्य धनुरन्यपार्थिवैस्त्वं किलानमितपूर्वमक्षिणोः ॥ तन्निशम्य भवता समर्थये वीर्यशृंग-
मिव भग्नमात्मनः ॥ ७३ ॥ अन्यदा जगति राम इत्ययं शब्द उच्चरित एव मामगात् ॥ व्रीडमावहति

तारका ज्योतिः कनीनिका ... इत्यमरः ४

विक्रमस्त्वतिशक्तिता ... इत्यमरः ३

मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा सापत्रपान्यतः इत्यमरः २

न्यायगामीतियावत्=१
यस्तोऽहृत्तिर्वर्त्तते नयस्य स=२
विपरीताः

१२ मे सम्संश्रुति व्यस्तवृत्ति हृदयोन्मुखे त्वयि ॥ ७४ ॥ विभ्रतोस्त्रमचलेप्य कुंठितं क्षौमतौ मम रिपु

12 समागतौ ॥ तात धेनुहरणाच्च हैहय स्त्वं च कीर्त्तिमपहर्तुमुद्यतः ॥ ७५ ॥ रोषितो यो तकरणौं पिवि

क्रमस्तेन मां वतिनां जितेत्वयि ॥ पावकस्य महिमा स गण्यते कक्षवज्ज्वलति सागरेपियः ॥ ७६ ॥ सकः=२

विद्धि चात्तरसमोजसा हरेरैश्वरं धनुरभाजि यत्त्वया ॥ स्वातमूलमनिलो नदीरयैः पातय

पक्षेन दुरपिले शिष्पुर पि=३
त्यपि मृदुस्तटद्रुमं ॥ ७७ ॥ तन्मदीयमिदमायुधं ज्यया संगमय्य सशरं विकृष्यतां ॥ तिष्ठतु

प्रधनमेवमप्यहं तुल्यबाहुतरसा जितस्त्वया ॥ ७८ ॥ एवमुक्तवति भीमदर्शने भार्गवे स्मितविकंपि

उत्कृताः यार्चिषः यस्मात=२
ताधरः ॥ तद्धनुर्ग्रहणमेव राघवः प्रत्यपद्यत समर्थमुत्तरं ॥ ७९ ॥ कातरोसि यदि चोद्गतार्चिषा

र्तर्जिताः प्रभुधारया मम ॥ ज्यानिघातकठिनांगुलिर्वृथा बध्यतामभययाचनांजलिः ॥ ८० ॥ १२

पूर्वजन्मधनुषा समागतः सोऽतिमात्रलघुदर्शनोऽभवत् ॥ केवलोऽपि सुभगो नवाम्बुदः किं पुनस्त्रि-
दशचापलाञ्छितः ॥ ८१ ॥ तेन भूमिनिहितैककोटि तत् कार्मुकं च बलिनाधिरोपितं ॥ शापवल्लीवि-
हतिं च भार्गवोऽपि धौत इव वासवध्वजः ॥ ८२ ॥ तावुभावपि परस्परस्थितौ वर्द्धमानपरिहीनते-
जसौ ॥ पश्यति स्म जनता दिनात्यये पार्वणौ शशिदिवाकराविव ॥ ८३ ॥ तं कृपामृदुरवेक्ष्य भा-
र्गवं राघवः स्खलितवीर्यमात्मनि ॥ स्वं च संहितममोघमाशुगं व्याजहार हरसूनुसन्निभः ॥ ८४ ॥
न प्रहर्तुमलमस्मि निर्दयं विप्र इत्यभिभवत्यपि त्वयि ॥ शंस किं गतिमनेन पत्रिणा हन्मि लोकमुत ते मखा-
र्जितं ॥ ८५ ॥ प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां न वेद्मि पुरुषं पुरातनं ॥ गां गतस्य तव धाम वैष्णवं कोपि-
तो ह्यसि मया दिदृक्षुणा ॥ ८६ ॥ भस्मसात्कृतवतः पितृद्विषः पात्रसाच्च वसुधां ससागरां ॥ आहि-

श्रीरामजी

पराजितः परमपुरुषेण रामेण
१३ नोजयविपर्ययोऽपि मे श्लाघ्य एव परमेष्ठिना त्वया ॥८७॥ तां गतिं मतिमतां वरेप्सितां पुण्यतीर्थगमना
त्वं पालय मम ... नाभिर्वजहीत्यर्थः मार्गं दुर्गमीकृता अंगीकृतवान्
य रक्ष मे ॥ पीडयिष्यति न मां खिलीकृता स्वर्गपद्धतिरभोगलोलुपं ॥८८॥ प्रत्यपद्यत तथेति रा
रामचंद्रः ... बाणं परशुरामस्य पुण्यकारिणः ... प्रतिबंधकः दुरतिक्रमः
घवः प्राङ्मुखश्च विससर्ज सायकं ॥ भार्गवस्य सुकृतोऽपि सोऽभवत्स्वर्गमार्गपरिघो दुरत्ययः ॥८९॥
रामः परशुरामस्य सन् बलेन बलवतां ... नम्रता
राघवोऽथ चरणौ तपोनिधेः क्षम्यतामिति वदन्समस्पृशत् ॥ निर्जितेषु तरसा तरस्विनां शत्रुषु प्रण
रजोगुणप्रवर्तितं तिरस्कृत्य मातुरागतं पितुरागतं परशुरामे
तिरेव शोभने ॥९०॥ राजसत्वमवधूय मातृकं पित्र्यमस्मि गमितः शमं यदा ॥ नन्वनिंदितफलो मयि
रामचंद्रेण उपकारः उपकारीकृतः गच्छामि रामस्य देवानां कार्यं संपादयिष्यतः
त्वया निग्रहोऽप्ययमनुग्रहीकृतः ॥९१॥ साधयाम्यहमविघ्नमस्तु ते देवकार्यमुपपादयिष्यतः ॥ ऊचि
लक्ष्मणेन सहवर्तिना रामं भार्गवः अंतर्दधे भार्गवे जयिनं ... बलेन ... आलिंग्य
वानिति वचः सलक्ष्मणं लक्ष्मणाग्रजमृषिस्तिरोदधे ॥९२॥ तस्मिन्गते विजयिनं परिरभ्य
राघवं मेने दशरथः ... संतोषप्राप्तिः दावानलेनाभिहतस्य वर्षा पातः
रामं स्नेहादमन्यत पिता पुनरेव जातं तस्याभवत्क्षणशुचः परितोषलाभः कक्षाग्निलंघिततरोरिव वृष्टिपा १३

[redacted]रघुवंशः ११ [redacted]=१

तः ॥९३॥ अथ पथि गमयित्वा क्लृप्तरम्योपकार्ये कतिचिदवनिपालः शर्वरीः शर्वकल्पः ॥ पु
रमविशदयोध्यां मैथिलीदर्शिनीनां कुवलयितगवाक्षां लोचनैरंगनानां ॥९४॥ इति श्रीरघु
वंशे महाकाव्ये कविकालिदासकृतौ भार्गवपराजयो नामैकादशः सर्गः ॥११॥ निर्विष्टविषय
स्नेहः स दशान्तमुपेयिवान् ॥ आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि ॥१॥ तं कर्णमूलमागत्य
रामे श्रीर्न्यस्यतामिति ॥ कैकेयीशंकयेवाह पलितछद्मना जरा ॥२॥ सा पौरान्पौरकांतस्य रामस्याभ्यु
दयश्रुतिः ॥ प्रत्येकं ह्लादयांचक्रे कुल्येवोद्यानपादपान् ॥३॥ तस्याभिषेकसंभारं कल्पितं विधिव
त्सुनः ॥ दूषयामास कैकेयी शोकोष्णैर्नयनाम्बुभिः ॥४॥ सा किलाश्वासिता चंडी भर्त्रा तत्संश्रितौ
वरौ ॥ उद्ववामेंद्रसिक्ता भूर्बिलमग्नाविवोरगौ ॥५॥ तयोश्चतुर्दशैकेन रामं प्रव्राजयत्समाः ॥ द्वि

२५ नीयेन सुतं सस्मार देवमेकफलां प्रियं ॥ ६ ॥ पित्रा दत्तां रुदन् रामः प्राङ्महीं प्रत्यपद्यत । पश्चाद्वनाय ग
च्छेति तदाज्ञां मुदितो ग्रहीत् ॥ ७ ॥ दधतो मङ्गलक्षौमे वसानस्य च वल्कले । ददृशुर्विस्मितास्तस्य मु
खरागं समं जनाः ॥ ८ ॥ स सीतालक्ष्मणसखः सत्याद्गुरुमलोपयन् । विवेश दण्डकारण्यं प्रत्येकं च सतां
मनः ॥ ९ ॥ राजापि तद्वियोगार्त्तः स्मृत्वा शापं स्वकर्मजं । शरीरत्यागमात्रेण शुद्धिलाभममन्यत ॥ १० ॥ वि
प्रोषितकुमारं तद्राज्यमस्तमितेश्वरं । रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥ ११ ॥ अथाना
थाः प्रकृतयो मातृबन्धुनिवेशिनं । मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥ १२ ॥ श्रुत्वा तथाविधं मृ
त्युं कैकेयीतनयः पितुः । मातुर्न केवलं स्वस्याः श्रियोप्यासीत्पराङ्मुखः ॥ १३ ॥ ससैन्यश्चान्वगाद्रा
मं दर्शितानाश्रमालयैः । तस्य पश्यन्ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥ १४ ॥ चित्रकूटवनस्थं च क १५

परिवेत्तानुजोनूढे ज्येष्ठे दारपरिग्रहे इत्यमरः २२

थितस्वर्गतिर्गुरोः ॥ लक्ष्म्या निमन्त्रयांचक्रे तमनुच्छिष्टसंपदा ॥१५॥ स हि प्रथमजे तस्मिन्नकृतश्री-
परिग्रहे ॥ परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः ॥१६॥ तमशक्यमपाक्रष्टुं निदेशात्स्वर्गिणः पि-
तुः ॥ ययाचे पादुके पश्चात्कर्तुं राज्याधिदेवते ॥१७॥ स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत्पु-
रीं ॥ नन्दिग्राममगतस्तस्य राज्यं न्यासमिवाभुनक् ॥१८॥ दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मु-
खः ॥ मातुः पापस्य भरतः प्रायश्चित्तमिवाकरोत् ॥१९॥ रामोऽपि सह वैदेह्या वने वन्येन वर्त्तयन् ॥
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा ॥२०॥ प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिं ॥ कदा-
चिदङ्के सीतायाः शिश्ये किंचिदिव श्रमात् ॥२१॥ ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ॥ प्रि-
योपभोगचिह्नेषु पौरोभाग्यमिवाचरन् ॥२२॥ तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः ॥ आ-

द्वाभ्यां मातृजन्मभ्यां जायते इति द्विजः २

२५ ततः समुत्सृज्य तस्मादैकनेत्रव्ययेन सः ॥२३॥ रामस्त्वासन्नदेशत्वाद्भरतागमनं पुनः । आशंक्योत्सुक
कसारंगांश्चित्रकूटस्थलीं ययौ ॥२४॥ प्रययावातिथेयेषु वसन्नृषिकुलेषु सः । दक्षिणां दिशमृक्षे
15 षु वार्षिकेष्विव भास्करः ॥२५॥ बभौ तमनुगच्छंती विदेहाधिपतेः सुता । प्रतिषिद्धापि कैकेय्या
लक्ष्मीरिव गुणोन्मुखी ॥२६॥ अनसूयातिसृष्टेन पुण्यगंधेन काननं । सा चकारांगरागेण पुष्पो
च्चलितषट्पदं ॥२७॥ संध्याभ्रकपिशस्तत्र विराधो नाम राक्षसः । अतिष्ठन्मार्गमावृत्य रामस्ये
न्दोरिव ग्रहः ॥२८॥ स जहार तयोर्मध्ये मैथिलीं लोकशोषणः । नभोनभस्ययोर्वृष्टिमवग्रह इवांत
रे ॥२९॥ तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीं । गंधेनाशुचिना चेति वसुधायां निचख्न
तुः ॥३०॥ पंचवट्यां ततो रामः शासनात्कुंभजन्मनः । अनपोढस्थितिस्तस्थौ विंध्याद्रिः प्रकृताविव ॥३१॥ २५

लक्ष्मणेन=४

रावणावरजा तत्र राघवं मदनातुरा॥ अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमं॥२२॥ सा सीता
संनिधावेव तं वव्रे कथितान्वया॥ आत्मारूढा हि नारीणामकालज्ञो मनोभवः॥२३॥ कलत्रवा
नहं भद्रे कनीयांसं भजस्व मे॥ इति रामो वृषस्यन्तीं वृषस्कन्धः शशास तां॥२४॥ ज्येष्ठाभिगमना
त्पूर्वं तेनाप्यनभिनन्दिता॥ साभूद्रामाश्रया भूयो नदीवोभयकूलभाक्॥२५॥ संरंभं मैथिलीहा
सः क्षणसौम्यां निनाय तां॥ निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः॥२६॥ फलमस्योपहासस्य
सद्यः प्राप्स्यसि पश्य मां॥ मृगीपरिभवो व्याघ्र्यामित्यवेहि त्वया कृतः॥२७॥ इत्युक्त्वा मैथिलीं भर्तुरङ्के
निर्विशन्तीं भयात्॥ रूपं शूर्पणखा नाम्नः सदृशं प्रत्यपद्यत॥२८॥ पुमे॥ लक्ष्मणः प्रथमं श्रुत्वा को
किलामञ्जुभाषिणीं॥ शिवां घोरस्वरां पश्चाद्बुबुधे विकृतेति तां॥२९॥ पर्णशालामथ क्षिप्रं विध

तासिः प्रविश्य सः ॥ वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥४०॥ सा वक्रनखधारिण्या

वेणुकर्कशपर्वया ॥ अङ्कुशाकारयाङ्गुल्या तावतर्जयदम्बरे ॥४१॥ मुखावयवलूनां तां नैरृ-

तायत्पुरो दधुः ॥ रामाभियायिनां तेषां तदेवाभूदमङ्गलं ॥४२॥ प्रा-

प्य चाशु जनस्थानं खरादिभ्यस्तथाविधां ॥ रामोपक्रममाचख्यौ रक्षःपरिभवं नवं ॥४३॥ उदायुधा-

नापततस्तान्दृप्तान्प्रेक्ष्य राघवः ॥ निदधे विजयाशंसां चापे सीतां च लक्ष्मणे ॥४४॥ एको दाशरथिः

कामं यातुधानाः सहस्रशः ॥ ते तु यावन्त एवाजौ तावांश्च ददृशे स तैः ॥४५॥ असज्जनेन काकुत्स्थः

प्रयुक्तमथ दूषणं ॥ न चक्षमे शुभाचारः स दूषणमिवात्मनः ॥४६॥ तं शरैः प्रतिजग्राह खरत्रि-

शिरसौ च सः ॥ क्रमशस्ते पुनस्तस्य चापात्सममिवोद्ययुः ॥४७॥ तैस्त्रयाणां शितैर्बाणैर्यथापूर्व-

विशुद्धिभिः ॥ आयुर्देहातिगैः पीतं रुधिरं तु पतत्रिभिः ॥४८॥ तस्मिन्रामशरोत्कृत्ते बले महति रक्ष-

सो ॥ ऽक्षिप्तं तं ददर्श न्म यं ककबंधे भ्यो न किंचन ॥४८॥ सा बाणवर्षिणं रामे योधयित्वा सुरद्विषां ॥ गत्र

प्रबोधाय सुष्वाप गृध्रछाया वरूथिनी ॥५०॥ राघवास्त्र विदीर्णानां रावणं प्रति रक्षसां ॥ तेषां स्कंधेण

रवैवैकाः दुःश्रवस्त्रिहरां भवत ॥५१॥ निग्रहात्स्व सुरारातीनां वधाच्च खरदूषणाद्दानुजः ॥ रामेण निहतं मेने

पादं दशसुखः स्वसु ॥५२॥ रक्षसा मृगरूपेण वंचयित्वा स राघवौ ॥ जहार सीतां पक्षीन्द्र प्रयासक्षण

विघ्नितः ॥५३॥ तौ सीतान्वेषिणौ गृध्रं लूनपक्षमपश्यतां ॥ प्राणैर्दशरथप्रीतेरनृणं कंठवर्त्तिभिः ॥५४॥

स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीं ॥ आत्मनः सुमहत्कर्म व्रणैरावेद्य संस्थितः ॥५५॥ तयोस्त

स्मिन्नवीभूतपितृव्यापत्तिदुःखयोः ॥ पितरीवाग्नि संस्कारात्परावर्तन्त क्रियाः ॥५६॥ वधनि

र्धूतशापस्य कबंधस्योपदेशतः ॥ मुमूर्च्छ सख्यं रामस्य समानव्यसने हरौ ॥५७॥ हत्वा स वालिनं वीरं

७ तत्पदे चिरकांक्षिते ॥ धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् [स्थापयामास] ॥ ५८ ॥ इतस्ततश्च वैदेही
मन्वेष्टुं भर्तृचोदिताः ॥ कपयश्चेरुरार्त्तस्य रामस्येव मनोरथाः ॥ ५९ ॥ प्रवृत्तावुपलब्धायां तस्याः सं
[जटायुषोभ्रातुः] पातिदर्शनात् ॥ मारुतिः सागरं तीर्णः संसारमिव निर्ममः ॥ ६० ॥ दृष्टा विचिन्वता तेन लंकायां राक्ष
17 सीवृता ॥ जानकी विषवल्लीभिः परीतेव महौषधिः ॥ ६१ ॥ तस्यै भर्तुरभिज्ञानमंगुलीयं ददौ हरिः ॥
प्रत्युद्गतमिवानुष्णैस्तदानंदाश्रुबिंदुभिः ॥ ६२ ॥ निर्वाप्य प्रियसंदेशैः सीतामक्षवधोद्धतः ॥ स ददाह
पुरीं लंकां क्षणसोढारिनिग्रहः ॥ ६३ ॥ प्रत्यभिज्ञानरत्नं च रामायादर्शयत्कृती [हनुमान्] ॥ हृदयं स्वयमायातं वै
देह्या इव मूर्तिमत् ॥ ६४ ॥ स प्राप हृदयन्यस्तमणिस्पर्शनिमीलितः ॥ अपयोधरसंसर्गां प्रियालिंगननि
र्वृतिं [वेन] ॥ ६५ ॥ श्रुत्वा रामः प्रियोदंतं [वार्त्ता] मेने तत्संगमोत्सुकः ॥ महार्णवपरिक्षेपं लंकायाः परिखालघुं ॥ ६६ ॥ स ७

मतस्य विनाशाय हरिसैन्यैरनुद्रुतः ॥ न केवलं भुवः पृष्ठे रवेर्पि सं वाप्यवर्त्मभिः ॥६७॥ निविष्टैर्मुद्‍घैः
कूलैर्नं प्रवेष्टैर्विभीषणः ॥ स्नेहाद्द्रुह्य सलक्ष्मणं बुद्धिमान् दिश्यपनादितः ॥६८॥ तस्मै निशाचरैश्वर्यं प्र
तिजहेर रघूद्वहः ॥ काले खलु समारब्धाः फलं बध्नन्ति नीतयः ॥६९॥ स सेतुं बन्धयामास प्लवगैर्लव
णाम्भसि ॥ रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ॥७०॥ तेनोत्तीर्य पथा लंकां रोधयामास पिं
गलैः ॥ द्वितीयं हेमप्राकारं कुर्वद्भिरिव वानरैः ॥७१॥ रणः प्रववृते तत्र भीमः प्लवगरक्षसां ॥ दिग्विजृं
भितकाकुत्स्थपौलस्त्यजयघोषणः ॥७२॥ पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः ॥ अतिशस्त्र
नखन्यासः शैलभग्नमतंगजः ॥७३॥ युग्मं ॥ अथ रामशिरश्छेददर्शनोद्भ्रान्तचेतनां ॥ सीतां मायेति शं
सन्ती त्रिजटा समजीवयत् ॥७४॥ कामं जीवति मे नाथ इति सा विजहौ शुचं ॥ प्राङ्मत्वा सत्यमस्यान्तं जीवितास्मि

२८ स्त्रीं तिलभ्जिता ॥७५॥ गरुडापातविश्लेषे विभे मेघनादास्त्रबंधनं ॥ दाशरथ्योः दशलक्षैरिति स्वग्रह
त्तर्मिर्वाभवत् ॥७६॥ ततो विभेदं पौलस्त्यः शक्त्यावहृत्सि लक्ष्मणं ॥ रामस्त्वनाहतोऽप्यासीद्धितीक्षिहृद
18 यः शुचा ॥७७॥ समाहृतिस्समानीतमहौषधिहृतव्यथः ॥ लंकात्स्कीलां पुनश्च्वक्रे विलापाद्यायिकेश
रैः ॥७८॥ नादंस मेघनादस्य धनुश्चंडाप्युधस्त्रभं ॥ मेघस्येवप्राक्कोलानकिंचित्स्पर्यंशोषयत् ॥७९॥ लक्ष्मणे
शेन महती निद्रां त्याजितेऽरलदुर्जयं ॥ रावणः प्रेषयामास युद्धायानुजमात्मनः ॥८०॥ जघीनसंत
=ते= दारे शाकैः पीतुंग्रानेनेकशः ॥ विवेशाच वुरीलिं कोसमारायहरीश्वरं ॥८१॥ कुंभकर्णः कपीडेणतुल्या
वस्त्यः स्वसुः हृतः ॥ स्तरो धरामंदं ग्रीवंटं कध्विन्नमनः शिलः ॥८२॥ अकाले बोधितो भ्राता प्रियस्त
ोहयानुजः ॥ रामे सुमित्रिजीवाहोदीर्घनिद्रां प्रवेशितः ॥८३॥ इतरान्पिरदोसिपेनुर्वानरकोटिषु
॥ रजांसि समरोत्थानि तत्क्षणे तनदीं विवं ॥८४॥ निर्ययावर्थ पौलस्त्यः पुनः युद्धायमहिरात् ॥ ग्र २८

रावणेर्भ्रातरं वाक जगदे दैत्यैर्निश्चयः ॥७५॥ रामं पदातिमालोक्य लंकेशं च वरूथिनं । हरियुग्मरथं तं

स्मै प्रजिघाय पुरंदरः ॥७६॥ तमाधूतध्वजपटं व्योमगंगोर्मिवायुभिः । देवसूतभुजालंबी जैत्रमध्यास्त

राघवः ॥७७॥ मातलिस्तस्य माहेंद्रमामुमोच तनुच्छदं । यत्रोत्पलदलक्लैब्यमस्त्राण्यापुः सुरद्विषां

॥७८॥ अन्योन्यदर्शनप्राप्तविक्रमावसरं चिरात् । रामरावणयोर्युद्धं चरितार्थमिवाभवत् ॥७९॥ भुजो

त्तमांगबाहुल्यादेकोऽपि धनदानुजः । ददृशेऽयथापूर्वो मातृवंश इव स्थितः ॥८०॥ जेतारं लोकपा

लानां स्वमुखैरर्चितेश्वरं । रामस्तुलितकैलासमरातिं बह्वमन्यत ॥८१॥ तस्य स्फुरति पौलस्त्यः सी

तासंगमशंसिनि । निचखानाधिकक्रोधः शरं सव्येतरे भुजे ॥८२॥ रावणस्यापि रामास्तो भित्वा हृ

दयमाशुगं । विवेश भुवमाख्यातुमुरगेभ्य इव प्रियं ॥८३॥ विक्रमव्यतिहारेण सामान्याभूद्द्वयोरपि

मध्यभूमिः
९९ पि। जयश्रीरंतरा वेदिं मत्तवारणयोरिव ॥९४॥ वचसैवं तयोर्वाक्यमस्त्रमस्त्रेण निघ्नतोः । अन्यो
जयार्थिक्रोधयोः
न्यजयसंरंभो ववृधे वादिनोरिव ॥९५॥ कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरैः । परस्परं शरव्राताः
17 पुष्पवृष्टिं न सेहिरे ॥९६॥ अयःशंकुचितां रक्षः शतघ्नीमथ शत्रवे । हृतां वैवस्वतस्येव कूटशा
ल्मलिमक्षिपत् ॥९७॥ राघवो रथमप्राप्तां तामाशां च सुरद्विषः । अर्द्धचंद्रमुखैर्बाणैश्चिच्छेद कदली
मिव ॥९८॥ अमोघं संदधे रामः धनुष्येकं धनुर्द्धरः । ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधं ॥९९॥
तद्व्योम्नि शतधा भिन्नं ददृशे दीप्तिमन्मुखं । वपुर्महोरगस्येव करालफणमंडलं ॥१००॥ तेन मंत्रप्रयु
क्तेन निमेषार्द्धादपातयत् । स रावणशिरःपंक्तिमज्ञातव्रणवेदनां ॥१०१॥ बालार्कप्रतिमेवाप्सु वी
चिभिन्ना पतिष्यतः । रराज रक्षःकायस्य कंठछेदपरंपरा ॥१०२॥ मरुतां पश्यतां तस्य शिरांसि प
तितान्यपि । मनो नातिविशश्वास पुनःसंधानशंकिनां ॥१०३॥ वयसां पंक्तयः पेतुः हतस्योपरि र ९९

यमानिलं दृष्टं द्वादर्कं विलुप्तं हासुवालिपुरम् कृत्हिकतिजके ... निकपिलेतिपुट्टलमरः ॥ २

ह्वसः ॥ तत्रातिहृष्टहितेनोमूर्द्धि दिव्याः कुसुमवृष्टयः ॥ १०४ ॥ अथमदगलितपक्षैर्लोकपालद्विपानाम

नुगतमलिवृन्दैर्गण्डभित्तिर्विहाय ॥ अथ ... वनियमितरत्ने मूर्द्धि पौलस्त्यशत्रोः सुरभि सुरवि

मुक्तं पुष्पवर्षं पपात ॥ १०५ ॥ यंतापि हर्तेः सपदि संहृतकार्मुकज्यमापृच्छ्य राघवमनुष्ठितदेवका

र्य्यं नामांकरावणशरांकितकेतुयष्टिमूर्द्ध्वं रथं हरिसहस्रयुजं निनाय ॥ १०६ ॥ रघुपतिरपिजा

तवेदो ... विशुद्धां प्रगृह्य प्रियां प्रियसुहृदि विभीषणे संक्रमय्य श्रियं वैरिणः रविसुतसहि

तेन तेनानुयातः ससौमित्रिरुद्भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीं ॥ १०७ ॥ इति श्रीरघु

वंशे महाकाव्ये कविकालिदासकृतौ रावणवधो नाम द्वादशः सर्गः ॥ १२ ॥ अथात्मनः शब्दगु

णं गुणज्ञः पदं विमानेन विगाहमानः रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्यु

२० वाचं ॥ २ ॥ वैदेहि त्वं विषण्णा मलयाद्रिभवनं मन्यसे नूनमाकेनिलमंबुराशिं ॥ छायापथेनैव परारत्वस नभमा
काशमाविष्कृतचारुतारं ॥ गुरोर्यियासोः कलिलेन मेघोरसातलं संक्रमिते तुरंगे ॥ नरर्षभेर्वी
२० मवदारयद्भिः सर्वैः किलांयोपरिवर्द्धितोनः ॥ ३ ॥ गर्भं दधत्यर्कमरीचयोस्मादिहद्विमत्राश्नुव
तेवसूनि ॥ अविंधनं वह्निमसौ बिभर्ति प्रह्लादनं ज्योतिरजन्यनेन ॥ ४ ॥ तांतामवस्थां प्रतिप
द्यमानं स्थितं दशव्याप्य दिशो महिम्ना ॥ विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा
॥ ५ ॥ नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ॥ अमुं युगांतोचितयोगनिद्रः संहृत्य
लोकान्पुरुषोधिशेते ॥ ६ ॥ पक्षच्छिदो गोत्रभिदो भयार्त्ताः शरण्यमेनं शतशो महीध्राः ॥ नृपा इ
वोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयंते ॥ ७ ॥ रसातलादादिभवेन पुंसा भुवः प्रयुक्तोद्वहन
क्रियायाः ॥ अस्याच्छमंभः प्रलयप्रवृद्धं मुहूर्त्तवक्त्राभरणं बभूव ॥ ८ ॥ मुखार्पणेषु प्रकृतिप्रगल्भाः २०

त्वयाः स्वयं तरंगाधरदानदक्षः अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिंधूः ९
ससत्वमादाय नदीमुखांभः संमीलयंतो विवृताननत्वं ॥ अमी शिरोभिस्तिमयः सरंध्रैरू
र्ध्वं वितन्वंति जलप्रवाहान् ॥ १० ॥ मातंगनक्रैः सहसोत्पतद्भिर्भिन्नान्द्विधा पश्य समुद्रफेनान् ॥ कपो
लसंसर्पितया य एषां व्रजंति कर्णक्षणचामरत्वं ॥ ११ ॥ वेलानिलाय प्रसृता भुजं
गा महोर्मिविस्फूर्जितनिर्विशेषाः ॥ सूर्यांशुसंपर्कसमिद्धरागैर्व्यज्यंत एते मणिभिः फणस्थैः
॥ १२ ॥ तवाधरस्पर्द्धिषु विद्रुमेषु पर्यस्तमेतत्सहसोर्मिवेगात् ॥ ऊर्ध्वांकुरप्रोतमुखं कथंचित्
क्लेशादपक्रामति शंखयूथं ॥ १३ ॥ प्रवृत्तिमात्रेण पयांसि पातुमावर्तवेगाद्भ्रमता घनेन ॥ आभा
ति भूयिष्ठमयं समुद्रः प्रमथ्यमानो गिरिणेव भूयः ॥ १४ ॥ दूरादयश्चक्रनिभस्य तन्वी तमाल

२१

तालीवनराजिनीला ॥ आभाति वेला लवणांबुराशेः धारानिबद्धेव कलंकलेखा ॥ १५ ॥ वेला

निलः केतकरेणुभिस्ते संभावयत्याननमायताक्षि । मामक्षमं मंडनकालहानेर्वेत्तीव

बिंबाधरबद्धतृष्णम् ॥ १६ ॥ एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः । प्राप्ता मुहू

र्त्तेन विमानवेगात्कूलं फलावर्जितपूगमालं ॥ १७ ॥ कुरुष्व तावत्करभोरु पश्चान्मार्गे मृगप्रे

क्षिणि दृष्टिपातं । एषा विदूरीभवतः समुद्रात्सकानना निःसरतीव भूमिः ॥ १८ ॥ क्वचित्पथा सं निष्पततीवरसिपाठः ॥४

चरते सुराणां क्वचिद्घनानां पततां क्वचिच्च । यथाविधो मे मनसोऽभिलाषः प्रवर्त्तते पश्य त

था विमानम् ॥ १९ ॥ असौ महेंद्रद्विपदानगंधिस्त्रिमार्गगावीचिविमर्दशीतः । आकाशवा

युर्दिनयौवनोत्थानाचामति स्वेदलवान्मुखे ते ॥ २० ॥ करेण वातायनलंबितेन स्पृष्टस्त्वया

(left margin) महांश्चासौ इंद्रश्च महेंद्रः महेंद्रस्य द्विपः महेंद्रद्विपः महेंद्रद्विपस्य दानं महेंद्रद्विपदानं महेंद्रद्विपदानस्य गंधि ... इ ॥२

(right margin) त्रिमार्गगायाः गंगायाः वीचयः ... शीतः ॥२

इति तस्य स्तोके कालि
दास स्य मेनेः

ग्रामीजनस्यानर्म ... धनवो न जानि ॥ यथा ... तोयं यथा ... मंडला नि ॥२२॥
त्वच्चरणारविंद ... त्वच्चरणारविंद विश्ले ... यथा ...
चरणारविंद विश्लेष ... त्वच्चरणारविंद विश्लेष ... ॥ २ ... उद्भिन्नः ... घनः

चंडिकुत हलिन्यां ग्रामुरुत्तीर्णा वामं ... द्वितीयमुद्भिन्नविद्युद्वलयो घनस्त्वं २१ सैषा स्थली यत्र विचिन्व
ताऽत्वां भ्रष्टं मया नूपुरमेकमुर्व्यां अदृश्यत त्वच्चरणारविंदविश्लेषदुःखादिव बद्धमौनं २२ त्वं रक्षसा भी
रुयतोऽपनीता तं मार्गमेताः कृपया लता मे अदर्शयन्वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः
२३ मृग्यश्च दर्भांकुरनिर्व्यपेक्षास्तवागतिज्ञं समबोधयन्मां व्यापारयंत्यो दिशि दक्षिणस्यामुत्पक्ष्मराजी
नि विलोचनानि २४ एतद्गिरेर्माल्यवतः पुरस्तादाविर्भवत्यंबरलेखि शृंगं नवं पयो यत्र घनैर्मया च
त्वद्विप्रयोगाश्रु समं विसृष्टं २५ गंधश्च धाराहतपल्वलानां कादंबमर्धोद्गतकेसरं च स्निग्धाश्च केकाः
शिखिनां बभूवुर्यस्मिन्नसह्यानि विना त्वया मे २६ पूर्वानुभूतं स्मरता च रात्रौ कंपोत्तरं भीरु तवोपगूढं
गुहाविसारीण्यतिवाहितानि मया कथंचिद्घनगर्जितानि २७ आसारसिक्तक्षितिबाष्पयोगान्मामक्षिणो
द्यत्र विभिन्नकोशैः विडंब्यमाना नवकंदलैस्ते विवाहधूमारुणलोचनश्रीः २८ उपांतवानीरवनोपगूढान्या
लक्ष्यपारिप्लवसारसानि दूरावतीर्णा पिबतीव खेदादमूनि पंपासलिलानि दृष्टिः २९ अत्रावियुक्तानि रथा
ङ्गनाम्नामन्योन्यदत्तोत्पलकेसराणि द्वंद्वानि दूरांतरवर्तिना ते मया प्रिये सस्पृहमीक्षितानि ३० इमां तटाशो
कलतां च तन्वीं स्तनाभिरामस्तबकाभिनम्रां त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः सौमित्रिणा साश्रुरहं निषिद्धः

लक्ष्मणेन ॥ १

२२

२१ अमूं विमानान्तरलंबिनीनां श्रुत्वा स्वनं कांचनकिंकिणीनां । प्रत्युद्व्रजंतीव खमुत्पतंत्यो गोदावरीसा
रसपंक्तयस्त्वां २२ एषा त्वया पेशलमध्ययापि घटांबुसंवर्द्धितबालचूता । आह्लादयत्युन्मदकृष्णसा
रा दृष्टा चिरात्पंचवटी मनो मे २३ अत्रानुगोदं मृगयानिवृत्तस्तरंगवातेन विनीतखेदः । रहस्त्वदुत्संगनिषण्णमूर्द्धा
स्मरामि वानीरगृहेषु सुप्तः २४ भ्रूभंगमात्रेण पदान्मघोनः प्रभ्रंशयां यो नहुषं चकार । तस्याविलांभःपरिशु
द्धिहेतोर्भौमो मुनेः स्थानपरिग्रहोयं २५ त्रेताग्निधूमाग्रमनिंद्यकीर्त्तेस्तस्येदमाक्रांतविमानमार्गं । घ्रात्वा ह
विर्गंधिरजोविमुक्तः समश्नुते मे लघिमानमात्मा २६ एतन्मुनेर्मानिनि शातकर्णेः पंचाप्सरो नाम विहारवारि ।
आभाति पर्यंतवनं विदूरान्मेघांतरालक्ष्यमिवेंदुबिंबम् २७ पुरा स दर्भांकुरमात्रवृत्तिश्चरन्मृगैः सार्द्धमृषि
र्मघोना । समाधिभीतेन किलोपनीतः पंचाप्सरोयौवनकूटबंधं २८ तस्यायमंतर्हितसौधभाजः प्रसक्तसंगी
तमृदंगघोषः । वियद्गतः पुष्पकचंद्रशालाः क्षणं प्रतिश्रुन्मुखरीकरोति २९ हविर्भुजामेधवतां चतुर्णां मध्ये
ललाटंतपसप्तसप्तिः । असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दांतः ४० अमुं सहासप्रहितेक्षणा
नि व्याजार्द्धसंदर्शितमेखलानि । नालं विकर्त्तुं जनितेंद्रशंकं सुरांगनाविभ्रमचेष्टितानि ४१ एषोक्षमाला
वलयं मृगाणां कंडूयितारं कुशसूचिलावं । सभाजने मे भुजमूर्द्ध्वबाहुः सव्येतरं प्राध्वमितः प्रयुंक्ते ४२ वाचं २२

त्रेताग्नित्रितये पुगे इत्यमरः ॥५ विघ्नल्याद्घ्रे लघुरित्यमरः ॥६

वियद्विष्णुपदं वा तु इत्यमरः ॥४ ललाटे पतीति ललाटंतपः । सप्तसप्तिः सूर्यः इत्यमरः ॥२

स्त्री प्रतिश्रुत्प्रतिध्वानयित्यमरः ॥८

[illegible]

[illegible] ॥२

यमित्वात्मलतिं ममैव केपेन किंचित्प्रतिनन्दहामकर्णीः दृष्टिं विमानव्यवधानमुक्तां पुनः सहस्रार्चिषि संनिध
त्ते ४३ अदः शरण्यं शरभंगनाम्नस्तपोवनं पावनमाहिताग्नेः [illegible] चिराय संतर्प्य
समिद्भिरग्निं यो मंत्रपूतां तनुमप्यहौषीत् ४४ छाया विनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेष्वमीषु तस्या
तिथीनामधुना सपर्यां स्थिता सुपुत्रेष्विव पादपेषु ४५ धारास्वनोद्गारिदरीमुखोसौ शृंगाग्रलग्नांबुदवप्रपं
कः बध्नाति मे बन्धुरगात्रि चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः ४६ एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरांतर
भावतन्वी मंदाकिनी भाति नगोपकंठे मुक्तावली कंठगतेव भूमेः ४७ अयं सुजातोनुगिरिं तमालः प्रवाल
मादाय सुगंधि यस्य यवांकुरापांडुकपोलशोभी मयावतंसः परिकल्पितस्ते ४८ अनिग्रहत्रासविनीतस
त्वमपुष्पलिंगात्फलबंधिवृक्षं वनं तपःसाधनमेतदत्रेराविष्कृतोदग्रतरप्रभावं ४९ अत्राभिषेकाय तपो
धनानां सप्तर्षिहस्तोद्धृतहेमपद्मां प्रवर्तयामास किलानुसूया त्रिस्रोतसं त्र्यंबकमौलिमालां ५० वीरा
सनैर्ध्यानजुषामृषीणाममी समध्यासितवेदिमध्याः निवातनिष्कंपतया विभांति योगाधिरूढा इव शाखिनोपि ५१
त्वया पुरस्तादुपयाचितो यः सोयं वटः श्याम इति प्रतीतः राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो वि पद्मरागः संयुक्तः
र८२ भाति ५२ क्वचित्प्रभालेपिभिरिंद्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा अन्यत्र माला सितपंकजानामिंदीवरैरु
त्खचितांतरेव ५३ क्वचित्खगानां प्रियमानसानां कादंबसंसर्गवतीव पंक्तिः अन्यत्र कालागुरुदत्तपत्रा भुव

२३

क्विं भुर्वशैरनकल्पितैर्व ५४ क्वचित्प्रभाचांद्रमसीतमोभिश्छायाविलीनैः शबलीकृतेव अन्यत्र शुभ्रांसर
दभ्रलेखारंध्रेष्विवालक्ष्यनभःप्रदेशा ५५ क्वचिच्च कृष्णोरगभूषणेव भस्मांगरागा तनुरीश्वरस्य पश्यानव
द्यांगि विभाति गंगा भिन्नप्रवाहा यमुनातरंगैः ५६ चतुर्भिः कुलकम् तमिस्रयाशुभ्रनिशेव भिन्नांकुदलं
गिंदीवरमालयेव कृत्तिर्हरेः कृष्णमृग त्वचेव भूतिः स्मरारेरिव केवभासा ५७ दृश्यार्द्रयाशारदमेघले
खा निर्धौतनिस्त्रिंशरुचा दिवेवं गवाक्षजालागुरुधूमराज्या हर्म्यस्थलीले पश्यानवेव ५८ तुषारसंघात
शिलाहिमाद्रेर्जीमंजनप्रस्तरशोभयेव तत्विनीं मानससोऽचराणां श्रेणीवे कादंबविहंगपंक्त्या ५९ नि
तांतशुद्धस्फटिकाद्रियोगादिवैडूर्यकांतारसनावलीव गंगा रवेरात्मजयासमेत्य पुष्पोत्तुदारं वरिमागमे
६० चतुर्भिरिंतक्रियाकुलकम् समुद्रपत्न्यो जलसंनिपाते कृतात्मनां मुक्ते किलाभिवकातं तत्राववो
धेन विनापि भूयः स्तनुत्यजां नास्ति शरीरबंधः ६१ पुरंनिषादाधिप तेरिदं तत्पत्निमयामौलिमणिं विहा
य जटासुवरुणार्ह रुद्रांसुम तुः कैकेयिकामाः फलितास्तवेति ६२ पयोधरैः पुण्यजनांगनानां निर्विष्टहे
मांबुजरेणुं यस्याः ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरंति ६३ जलानि या तीरनि
खातयूपैः वहत्ययोध्यामनुराजधानीं तुरंगमेधावभृथावतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृतानि ६४ यांसैक
तोत्संगसुखोचितानां पुत्रेः पयोभिः परिवर्द्धितानां सामान्यधात्रीमिव मानसं मे संभावयत्युत्तरकोशलानां ६५

२३

हे सीते अद्धा श्रियं पालितसंगराय प्रत्यर्पयिष्यत्यनघां स साधुः हत्वा निवृत्ताय मृधे खरादीन् संरक्षितां त्वामिव लक्ष्मणो मे ॥ ६६ ॥ २

सेयं मदीया जननीव तेन मान्येन राज्ञा शरयूर्वियुक्ता । दूरेऽपि सन्तं शिशिरानिलैर्मां तरङ्गहस्तैरुपगूहतीव
६६ विरक्तसंध्याकपिशं पुरस्ताद्यतो रजः पार्थिवमुज्जिहीते शंके हनूमत्कथितप्रवृत्तिः वार्त्ताप्रवृत्तिर्वृत्तांतः इत्यमरः
प्रत्युद्गतो मां भरतः ससैन्यः ६७ असौ पुरस्कृत्य गुरुं पदातिः पश्चादवस्थापितवाहिनीकः वृद्धैरमात्यैः स
ह चीरवासा मामर्घ्यपाणिर्भरतोऽभ्युपैति ६८ पित्रा विसृष्टां मदपेक्षया यः श्रियं युवाप्यंकगतामभोक्ता
इयन्ति वर्षाणि तया सहोग्रमभ्यस्यतीव व्रतमासिधारं ६९ एतावदुक्तवति दाशरथौ तदीयामिच्छां वि
मानमधिदेवतया विदित्वा ज्योतिःपथादवततार सविस्मयाभिरुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः ७०
तस्मात्पुरःसरविभीषणदर्शितेन सेवाविचक्षणहरीश्वरदत्तहस्तः यानादवातरददूरमहीतलेन मार्गेण भं
गिरचितस्फटिकेन रामः ७१ इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य स भ्रातरं भरतमर्घ्यपरिग्रहान्ते पर्यश्रुरस्वजत
मूर्द्धनि चोपजिघ्रंस्तद्भक्त्यपोढपितृराज्यमहाभिषेके ७२ श्मश्रुप्रवृद्धजनिताननविक्रियांश्च प्लक्षान्प्ररोहज वृत्तांतानि दृष्टांतः ५
टिलानिव मंत्रिवृद्धान् अन्वग्रहीत्प्रणमतः शुभदृष्टिदानैर्वार्त्तानुयोगमधुराक्षरया च वाचा ७३ दुःखैकबंधु
रयमृक्षहरीश्वरो मे पौलस्त्य एव समरेषु पुरःप्रहर्त्ता इत्यादृतेन कथितौ रघुनंदनेन व्युत्क्रम्य लक्ष्मणमुभौ भरतो
ववंदे ७४ सौमित्रिणा तदनु संससृजे स चैनमुत्थाप्य नम्रशिरसं भृशमालिलिंग रूढेन्द्रजित्प्रहरणव्रणक
र्कशेन क्लिश्यन्निवास्य भुजमध्यमुरःस्थलेन ७५ रामाज्ञया हरिचमूपतयस्तदानीं कृत्वा मनुष्यवपुरा

२५

24

सानुप्लवः सहायसहितमरः क्षिपामाद लिदन्दिमादरमरः

हुर्गजेंद्राने येषुत्तरत्सुवहुधामदवारिधाराः शैलाधिरोहणसुखान्युपलेभिरे ते ७६ सानुप्लवः प्रभुरपि क्षण
दाचराणां भेजे रथं दशरथप्रभवानुशिष्टः मायाविकल्परचितैरपि यस्तदीयैर्न स्यंदनैस्तुलितकृत्रिमभक्तिशो रात्यागः स्यंदनो रथः स्यादमरः
भः ७७ भूयस्ततो रघुपतिर्विलसत्पताकमध्यास्त कामगति सावरजो विमानं दोषातनं बुधबृहस्पतियोग
दृश्यस्तारापतिस्तरलविद्युदिवाभ्रवृंदं ७८ तत्रेश्वरेण जगतां प्रलयादिवोर्वीं वर्षात्यये न रुचिमभ्रघनादिवेंदोः
रामेण मैथिलसुतां दशकंठकृच्छ्रात्प्रत्युद्धृतां धृतिमतीं भरतो ववंदे ७९ लंकेश्वरप्रणतिभंगदृढव्रतं
तं वंद्यं युगं चरणयोर्जनकात्मजायाः ज्येष्ठानुवृत्तिजटिलं च शिरोस्य साधोरन्योन्यपावनमभूदुभयं समेत्य ८०
क्रोशार्धं प्रकृतिपुरःसरेण गत्वा काकुत्स्थः [illegible] स्तिमितजवेन पुष्पकेन शत्रुघ्न[illegible]प्रतिविहितोपकार्यमा
र्यः साकेतोपवनमुदारमध्युवास ८१ इति श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ समुद्रवर्णनो नाम त्र
योदशः सर्गः १३ अथ प्र[illegible]णाशादुपशोचनीयं दशांतरं तत्र समं प्रपन्ने अपश्यतां दाशरथी जनन्यौ छे
दादिवोपघ्नतरोर्व्रतत्यौ १ उभावुभाभ्यां प्रणतौ हतारी यथाक्रमं विक्रमशोभिनौ तौ विस्पष्टमस्राध
तयान दृष्टौ ज्ञातौ सुतस्पर्शसुखोपलंभात् २ आनंदजः शोकजमश्रु बाष्पस्तयोरशीतं शिशिरो बिभेद
गंगाशरय्वोर्जलमुष्णतप्तं हिमाद्रिनिस्यंद इवावतीर्णः ३ ते पुत्रयोर्नैर्ऋतशस्त्रमार्गानार्द्रानिवांगे सद
यं स्पृशंत्यौ अपीप्सितं क्षत्रकुलांगनानां न वीरसूशब्दमकामयेतां ४ क्लेशावहा भर्तुरलक्षणाहं सीतेति २७

ग्रीष्म कालेनतत्नम=२ जनन्यौ=२ रामलक्ष्मणयोः=२

५ प्रत्यागतावत्र चिरप्रवासादपश्यतां दाशरथी जनन्यौ कुमुद्वतीशीतमरीचिलेखे रवेर्दिवेवरूपांतरदुर्विभाव्ये ३

नामपुत्रं मुदाहरंती स्वर्गप्रतिष्ठस्य गुरोर्महिष्यावभक्तिभेदेन वधूर्ववंदे ५ उत्तिष्ठ वत्सेत्यनुसानुजोऽ
सौ वृत्तेन भर्ता शुचिना तवैव कृच्छ्रं महत्तीर्णइति प्रियार्हां तामूचतुस्ते प्रियमप्यमिथ्या ६ अथाभिषे
कं रघुवंशकेतोः प्रारब्धमानंदजलैर्जनन्योः निर्वर्त्तयामासुरमात्यवृद्धास्तीर्थाहृतैः कांचनकुंभ
तोयैः ७ सरित्समुद्रान्सरसीश्च गत्वा रक्षःकपींद्रैरुपपादितानि तस्यापतन्मूर्द्ध्नि जलानि जिष्णो
र्विंध्यस्य मेघप्रभवा इवापः ८ तपस्विवेषक्रिययापि तावद्यः प्रेक्षणीयः सुतरां बभासे राजेंद्रनेपथ्य
विधानशोभा तस्योदितासीत्पुनरुक्तदोषा ९ स मौलिरक्षोहरिभिः ससैन्यस्तूर्यस्वनानंदितपौरव
र्गो विवेश सौधोद्गतजालवर्षामुक्तोरणामन्वयराजधानीं १० सौमित्रिणा सावरजेन मंदमाधूतब
बालव्यजनो रथस्थः धृतातपत्रो भरतेन साक्षादुपायसंघात इव प्रवृद्धः ११ प्रासादकालागुरुधूमरा
जिस्तस्याः पुरो वायुवशेन भिन्ना वनान्निवृत्तेन रघूत्तमेन मुक्ता स्वयं वेणिरिवाबभासे १२ श्वश्रूजना
नुष्ठितचारुवेषां कर्णीरथस्थां रघुवीरपत्नीं प्रासादवातायनदृश्यबंधैः साकेतनार्योंजलिभिः प्रणे
मुः १३ स्फुरत्प्रभामंडलमानुसूयं सा बिभ्रती शाश्वतमंगरागं रराज शुद्धेति पुनः स्वपुर्यै संदर्शिता व
ह्निगतेव भर्त्रा १४ वेश्मानि रामः परिबर्हवंति विश्राण्य सौहार्दनिधिः सुहृद्भ्यः बाष्पायमाणो बलिम
न्निकेतमालेख्यशेषस्य पितुर्विवेश १५ कृतांजलिस्तत्र यदंब सत्यान्नाभ्रश्यत स्वर्गफलाद्गुरुर्नः तो

सौधोत्थितलाजसदननिभ मरः ८

नार्यः

स्फुरित्पत्नी ऽनुसूया ८३

ऽनुसूयया दत्त ८३ परिबर्हयुक्तानि ८२

२५ श्चिंतमानं गुरुं तं तवैतिं जहार लज्जां भरतस्य मातुः १६ तथैव सुग्रीवविभीषणादीनुपाचरत्कृत्रिमसंवि
धाभिः संकल्पमात्रोदितसिद्धयस्ते क्रांता यथा चेतसि विस्मयेन १७ सभाजनायोपगतान्स दिव्यान्
मुनीन्पुरस्कृत्य हतस्य शत्रोः शुश्राव तेभ्यः प्रभवादि वृत्तं स्वविक्रमे गौरवमादधानं १८ प्रतिप्रयातेषु तपो
धनेषु सुखादविज्ञातगतार्द्धमासान् सीतास्वहस्तोपहृताग्र्यपूजान्रक्षःकपींद्रान्विससर्ज रामः १९ तच्चा
त्मचिंतासुलभं विमानं हृतं सुरारेः सह जीवितेन कैलासनाथोद्वहनाय भूयः पुष्पं दिवः पुष्पकमन्वमंस्त २०
पितुर्नियोगाद्वनवासमेवं निस्तीर्य रामः प्रतिपन्नराज्यः धर्मार्थकामेषु समां प्रपेदे यथा तथैवावरजेषु
वृत्तिं २१ सर्वासु मातृष्वपि वत्सलत्वात्स निर्विशेषप्रतिपत्तिरासीत् षडाननापीतपयोधरासु नेता च
मूनामिव कृत्तिकासु २२ तेनार्थवांल्लोभपराङ्मुखेन तेन घ्नता विघ्नभयं क्रियावान् तेनास लोकः
पितृमान्विनेत्रा तेनैव शोकापनुदेन पुत्री २३ स पौरकार्याणि समीक्ष्य काले
रेमे विदेहाधिपतेर्दुहित्रा उपस्थितश्चारु वपुस्तदीयं कृत्वोपभोगोत्सुकयेव लक्ष्म्या २४ तयोर्यथा
प्रार्थितमिंद्रियार्थानासेदुषोः सद्मसु चित्रवत्सु प्राप्तानि दुःखान्यपि दंडकेषु संचिंत्यमानान्यसुखा
न्यभूवन् २५ अथाधिकस्निग्धविलोचनेन मुखेन सीता शरपांडुरेण आनंदयित्री परिणेतुरासीदनक्ष
रव्यंजितदोहदेन २६ तामंकमारोप्य कृशांगयष्टिं वर्णांतराक्रांतपयोधराग्रां विलज्जमानां रह २५

विमुक्तवनगमनाद्वारे यस्य सः ५ सर्पाधिराजः शेषः निर्बन्धं सहदुर्हृद विशालौ महद्भुजौ यस्य सः ५ सः ६
दोलाव चलाचले चलावृत्तिर्यस्य सः ४
वंशमानं २

सिभतीतः १४ रामो रमण्योऽभिलाषं २७ सा दृष्टनीवारफलानि हिंस्रैः संबद्धवैखानसकन्यकानि
इयेष भूयः कुशवन्ति गन्तुं भागीरथीतीरतपोवनानि २८ तस्यै प्रतिश्रुत्य रघुप्रवीरस्तदीप्सितं पार्श्वच
रानुयातः आलोकयिष्यन्मुदितामयोध्यां प्रासादमभ्रंलिहमारुरोह २९ ऋद्धापणं राजपथं स पश्यन्
विगाह्यमानां सरयूं च नौभिः विलासिभिश्चाध्युषितानि पौरैः पुरोपकण्ठोपवनानि रेमे ३० स किंवद
न्तीं वदतां पुरोगः स्ववृत्तमुद्दिश्य विशुद्धवृत्तः सर्पाधिराजोरुभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः ३१
निर्बन्धपृष्टः स जगाद सर्वं स्तुवन्ति पौराश्चरितं त्वदीयं अन्यत्र रक्षोभवनोषितायाः परिग्रहान्मानवदे
वदेव्याः ३२ कलत्रनिन्दागुरुणा किलैवमभ्याहतं कीर्त्तिविपर्ययेण अयोघनेनाय इवाभितप्तं वैदेहिबन्धोर्
हृदयं विदद्रे ३३ किमात्मनिर्वादकथामुपेक्षे जायामदोषामुत संत्यजामि इत्येकपक्षाश्रयविक्लवत्वादा
सीत्स दोलाचलचित्तवृत्तिः ३४ निश्चित्य चानन्यनिवृत्ति वाच्यं त्यागेन पत्न्याः परिमार्ष्टुमैच्छत् अपि स्वदेहा
त्किमुतेन्द्रियार्थाद्यशोधनानां हि यशो गरीयः ३५ स संनिपात्यावरजान्हतौजास्तद्विक्रियादर्शनलुप्तहर्षान् कौ
लीनमात्माश्रयमाचचक्षे तेभ्यः पुनश्चेदमुवाच वाक्यं ३६ राजर्षिवंशस्य रविप्रसूतेरुपस्थितः पश्यत कीदृशोऽयं म
त्तः सदाचारशुचेः कलङ्कः पयोदवातादिव दर्पणस्य ३७ पौरेषु सोऽहं बहुलीभवन्तमपां तरङ्गेष्विव तैलबिन्दुं सोढुं न तम

अप्रतिग्राह्यानि स्मरः २
किंवदन्तीं जनश्रुतिं स्मरः ४
विजिता अरयो येन स चासौ भद्रः कल्याणो यस्य सः ५
अपसर्पश्चरः सुभद्रः
वैदेह्या बन्धुः पतिः तस्य हृदयं वैदेहीबन्धोः २
दोलाचलचित्तवृत्तिः
अवरजान् भ्रातॄन् ५
कौलीनं लोकापवादं
अयोघनं लोहमुद्गरः ३

५ तैलबिन्दुः २

२८ वंशमवर्णमीशामालानिकं स्तम्भमिव द्विपेन्द्रः ३८ तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः त्यक्ष्या-
मि वैदेहसुतां पुरस्तात् समुद्रनेमिं पितुराज्ञयेव ३९ अवैमि चैनामनघेति किंतु लोकापवादो बलवान्मतो मे छा-
26 याहि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः ४० रक्षोवधान्तेन च मे प्रयासो व्यर्थः स वैरप्रतिमोचनाय
अमर्षणः शोणितकांक्षया किं पदा स्पृशन्तं दशति द्विजिह्वः ४१ तदेष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनी-
यः यद्यर्थिता निर्गतवाच्यशल्यान्प्राणान्मया धारयितुं चिरं वः ४२ इत्युक्तवन्तं जनकात्मजायां नितान्तरूक्षाभिनि-
वेशमीशं न कश्चन भ्रातृषु तेषु शक्तो निषेद्धुमासीदनुमोदितुं वा ४३ स लक्ष्मणं लक्ष्मणपूर्वजन्मा विलोक्य लो-
कत्रयगीतकीर्तिः सौम्येति चाभाष्य यथार्थभाषी स्थितं निदेशे पृथगादिदेश ४४ प्रजावती दोहदशंसिनी ते
तपोवनेषु स्पृहयालुरेव स त्वं रथी तद्व्यपदेशनेयां प्राप्य वाल्मीकिपदं त्यजैनां ४५ स शुश्रुवान्मातरि भार्गवेन
पितुर्नियोगात्प्रहृतं द्विषद्वत् प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया ४६ अथानुकूलश्रवणप्र-
तीतामत्रंसुभिर्युक्तधुरं तुरंगैः रथं सुमन्त्रप्रतिपन्नरश्मिमारोप्य वैदेहसुतां प्रतस्थे ४७ सा नीयमाना रुचिरान्प्रदे-
शान्प्रियंकरो मे प्रिय इत्यनन्दत् नाबुद्ध कल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्रवृक्षं ४८ जुगूह तस्याः पथि लक्ष्म-
णो यत्सव्येतरेण स्फुरता तदक्ष्णा आप्तेन तीव्रमस्यै गुरु भावि दुःखं ... प्रियदर्शनेन ४९ सा दुर्निमित्तोपगताद्वि- २८

प्राप्ता सद्यः परिम्लानमुखारविन्दां रात्रौ सुमं सा च जल्पभूयादिति पौरशशंसे कर लोर वा हि ५० गुरोर्निदेशा
द्वनितां वनांते साध्वीं सुमित्रातनयो विहास्यन् अवार्यतेवोत्थितवीचिहस्तैर्जह्नोर्दुहित्रा स्थितया पुरस्तात्
५१ रथात्स यंत्रा निगृहीतवाहात्तां भ्रातृजायां पुलिनेवतार्य गंगां निषादाहृतनौविशेषस्ततार संधामिव सत्य
संधः ५२ अथ व्यवस्थापितवाक्कथंचित्सौमित्रिरंतर्गतबाष्पकंठः औत्पातिको मेघ इवाश्मवर्षं महीपतेः शासनमु
ज्जगार ५३ ततोभिषंगानिलविप्रविद्धा प्रभ्रश्यमानाभरणप्रसूना स्वमूर्तिलाभप्रकृतिं धरित्रीं लतेव सी
ता सहसा जगाम ५४ इक्ष्वाकुवंशप्रभवः कथं त्वां त्यजेदकस्मात्पतिरार्यवृत्तः इति क्षितिः संशयितेव तस्यै
ददौ प्रवेशं जननी न तावत् ५५ सा लुप्तसंज्ञा न विवेद दुःखं प्रत्यागतासुः समतप्यतांतः तस्याः सुमित्रात्मजयत्न
लब्धो मोहादभूत्कष्टतरः प्रबोधः ५६ न सावदद्भर्तुरवर्णमार्या निराकरिष्णोर्वृजिनादृतेपि आत्मानमे
व स्थिरदुःखभाजं पुनः पुनर्दुःकृतिनं निनिंद ५७ आश्वास्य रामावरजः सतीं तामाख्यातवाल्मीकिनिके
तमार्गः निघ्नस्य मे भर्तृनिदेशरौक्ष्यं देवि क्षमस्वेति बभूव नम्रः ५८ सीता तमुत्थाप्य जगाद वाक्यं प्रीतास्मि
ते सौम्य चिराय जीव बिडौजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थं परवानसि त्वं ५९ श्वश्रूजनं सर्वमनु
क्रमेण विज्ञापय प्रापितमत्प्रणामः प्रजानिषेकं मयि वर्तमानं सूनोरनुध्यायत चेतसेति ६० वाच्यस्त्वया मद्व

२७

27

नात्मसराजा वह्नौ विशुद्धामपि यत्समक्षं मां लोकवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं कुलस्य ६१ क
ल्याणबुद्धेरथवा तवायं न कामचारो मयि शङ्कनीयः ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्र
सह्यः ६२ उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः त्वय्यास्पदं प्राप्य तया विरोषात्सोढास्मि न
त्वद्भवने वसन्ती ६३ निशाचरोपप्लुतभर्तृकाणां तपस्विनीनां भवतः प्रसादात् भूत्वा शरण्या शरणार्थि
मन्यं कथं प्रपत्स्ये त्वयि दीप्यमाने ६४ किं वा तवात्यन्तवियोगमोघे कुर्यामुपेक्षां हतजीविते स्मिन् स्याद्रक्ष
णीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः ६५ साहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं
यतिष्ये भूयो यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः ६६ नृपस्य वर्णाश्रमपालनं यत्स एव धर्मो
मनुना प्रणीतः निर्वासिताप्येवमतस्त्वयाहं तपस्विसामान्यमवेक्षणीया ६७ तथेति तस्याः प्रतिगृह्य वाचं रामा
नुजे दृष्टिपथं व्यतीते सा मुक्तकण्ठं व्यसनातिभाराच्चक्रन्द विग्ना कुररीव भूयः ६८ नृत्यं मयूराः कुसुमानि वृक्षा
दर्भानुपात्तान्विजहुर्हरिण्यः तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद्रुदितं वनेऽपि ६९ तामभ्यगच्छद्रुदि
तानुसारी कविः कुशेध्माहरणाय यातः निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ७० तमश्रु
नेत्रावरणं प्रमृज्य सीता विलापाद्विरता ववन्दे तस्यै मुनिर्दोहदलिङ्गदर्शी दत्त्वा सुपुत्राशिषमित्युवाच ७१ जाने विसृष्टां

मानिषादप्रतिष्ठां त्वमगमः शाश्वतीः समाः यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्

२७

(समाधेः) (देशान्तरस्थे)
निधानतस्त्वां मिथ्यापवादात्क्षुभितेन भर्त्रा । तन्मा व्यथिष्ठा विषयान्तरस्थं प्राप्तासि वैदेहि पितुर्निकेतं ॥ ७२ ॥ उ
त्खातलोकत्रयकण्टकेऽपि सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि । त्वां प्रत्यकस्मात्कलुषप्रवृत्तावस्त्येव मन्युर्भरताग्रजे मे
॥ ७३ ॥ तवोरुकीर्त्तिः श्वशुरः सखा मे सतां भवोच्छेदकरः पिता ते । धुरि स्थिता त्वं पतिदेवतानां किं तन्न येनासि म
मानुकम्प्या ॥ ७४ ॥ तपस्विसंसर्गविनीतसत्वे तपोवने वीतभया वसास्मिन् । इतो भविष्यत्यनघप्रसूतेरपत्यसंस्का
रमयो वि[धि]स्ते ॥ ७५ ॥ अशून्यतीरां मुनिसन्निवेशैस्तमोपहन्त्रीं तमसां विगाह्य । तत्सैकतोत्संग[बलि]क्रिया
भिः सम्पत्स्यते ते मनसः प्रसादः ॥ ७६ ॥ पुष्पं फलं चार्त्तवमाहरन्त्यो बीजं च काले यमकृष्टरोहि । विनोदयिष्यन्ति नवाभि
षंगामुदारवाचो मुनिकन्यकास्त्वां ॥ ७७ ॥ पयोघटैराश्रमबालवृक्षान्संवर्द्धयन्ती स्वबलानुरूपैः । असंशयं प्राक्त
(पुत्रस्य)
नयोपपत्तेः स्तनन्धयप्रीतिमवाप्स्यसि त्वं ॥ ७८ ॥ अनुग्रहप्रत्यभिनन्दिनीं तां वाल्मीकिरादाय दयार्द्रचेताः । सायं
मृगाध्यासितवेदिपार्श्वं स्वमाश्रमं शान्तमृगं निनाय ॥ ७९ ॥ तामर्पयामास च शोकदीनां तदागमप्रीतिषु तापसी
षु । निर्विष्टसारां पितृभिर्हिमांशोरन्त्यां कलां दर्श इवौषधीषु ॥ ८० ॥ ता इंगुदीस्नेहकृतप्रदीपमास्तीर्णमेध्याजिन
तल्पमन्तः । तस्यै सपर्यानुपदं दिनान्ते निवासहेतोरुटजं वितेनुः ॥ ८१ ॥ तत्राभिषेकप्रयता वसन्ती प्रयुक्तपूजा वि
धिनातिथिभ्यः । वन्येन सा वल्कलिनी शरीरं पत्युः प्रजासन्ततये बभार ॥ ८२ ॥ अपि प्रभुः सानुशयोऽधुना स्यादि

इंगुद्याः वृक्षविशेषस्य स्नेहः तैलस्तत्कृतः प्रदीपो यस्मिन्सः तं ॥

तपस्विकन्यकाः=३ इंगुदी तापसतरुस्त्यमरः=२

उत्कंठितः पश्चात्तापेन सह वर्तमान इति २

२८ तेनुस्तुकः शोकजितां निहन्ता शशंस सीतापरिदेवनान्तमनुष्ठितं शासनमग्रजाय ८३ बभूव रामः सहसा सबाष्प
स्तुषारवर्षीव सहस्यचंद्रः कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः ८४ निगृह्य शोकं स्वयमेव धी
२४ मान्वर्णाश्रमावेक्षणजागरूकः सभ्रातृसाधारणभोगमृद्धं राज्यं रजोरिक्तमनाः शशास ८५ तमेकभा रजोगुणरहित तेजमनं यस्य सः १२
र्यां परिवादभीरोः साध्वीमपि त्यक्तवतो नृपस्य वक्षस्यसंघट्टसुखं वसंती रेमे सपत्नीरहितेव लक्ष्मीः ८६ सीतां
हित्वा दशमुखरिपुर्नोपयेमे यदन्यां तस्या एव प्रतिकृतिसखो यत्क्रतूनाजहार वृत्तांतेन श्रवणविषयप्रापिणा
तेन भर्तुः सा दुर्वारं कथमपि परित्यागदुःखं विषेहे ८७ इति श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ सी
तापरित्यागो नाम चतुर्दशः सर्गः १४ कृतसीतापरित्यागः स रत्नाकरमेखलां बुभुजे पृथिवीपालः पृ
थिवीमिव केवलां १ लवणेन विलुप्तेज्यास्तामिस्रेण तमभ्ययुः मुनयो यमुनाभाजः शरण्यं शरणार्थिनः
२ अवेक्ष्य रामं ते तस्मिन्न प्रजह्रुः स्वतेजसा त्राणाभावे हि शापास्त्राः कुर्वंति तपसो व्ययं ३ प्रतिशुश्राव काकु
त्स्थस्तेभ्यो विघ्नप्रतिक्रियां धर्मसंरक्षणार्थैव प्रवृत्तिर्भुवि शार्ङ्गिणः ४ ते रामाय वधोपायमाचख्युर्विबुध
द्विषः दुर्जयो लवणः शूली विशूलः प्रार्थ्यतामिति ५ आदिदेशाथ शत्रुघ्नं तेषां क्षेमाय राघवः करिष्य
न्निव नामास्य यथार्थमरिनिग्रहात् ६ यः कश्चन रघूणां हि परमेकः परंतपः अपवाद इवोत्सर्गं व्यावर्तयितु २८

उपसर्गः ॥२

मीश्वरः ॥ ७ ॥ अग्रजेन नियुक्तोऽसौ ततो दाशरथी रथी । ययौ वनस्थलीः पश्यन् पुष्पिताः सुरभीरभीः ॥ ८ ॥
रामादेशादनुपदं सेनांगं तस्य सिद्धये । पश्चादध्ययनार्थस्य धातोरधिरिवाभवत् ॥ ९ ॥ आदिष्टवर्त्मा मुनिभिः
मुनिविशेषे ॥२
संगतैस्तपतांवरः । विरराज रथप्रष्ठैर्वालिखिल्यैरिवांशुमान् ॥ १० ॥ तस्य मार्गवशादेका बभूव वसतिर्यतः ।
रथस्वनोत्कर्णमृगे वाल्मीकीये तपोवने ॥ ११ ॥ तमृषिः पूजयामास कुमारं क्लान्तवाहनं । तपःप्रभावसिद्धा
भिर्विशेषप्रतिपत्तिभिः ॥ १२ ॥ तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती । सुतावसूत संपन्नौ कोशदण्डा प्रजावती भ्रातृजायायां ... ॥५
विव क्षितिः ॥ १३ ॥ संतानश्रवणाद्भ्रातुः सौमित्रिः सौमनस्यवान् । प्रांजलिर्मुनिमामन्त्र्य प्रातर्युक्तरथो ययौ ॥ १४ ॥
स च प्राप मधूपघ्नं कुम्भीनस्याश्च कुक्षिजः । वनात्करमिवादाय सत्त्वराशिमुपस्थितः ॥ १५ ॥ धूमधूम्रो वसागन्धि
ज्वालाबभ्रुशिरोरुहः । क्रव्याद्गणपरीवारश्चिताग्निरिव जंगमः ॥ १६ ॥ युग्मं ॥ अपशूलं तमासाद्य लवणं
लक्ष्मणानुजः । रुरोध संमुखीनो हि जयो रन्ध्रप्रहारिणां ॥ १७ ॥ नातिपर्याप्तमालक्ष्य मत्कुक्षेरद्य भोजनं
महामंगले ॥२
दिष्ट्या त्वमसि मे धात्रा भीतेनेवोपपादितः ॥ १८ ॥ इति संतर्ज्य शत्रुघ्नं राक्षसस्तज्जिघांसया । प्रांशुमुत्पाटयामास
मुस्तास्तम्बमिव द्रुमं ॥ १९ ॥ युग्मं ॥ सौमित्रेर्निशितैर्बाणैरन्तरा शकलीकृतः । गात्रं पुष्परजः प्राप न शाखी नैरृतेरितः ॥
२० ॥ विनाशात्तस्य वृक्षस्य रक्षस्तस्मै महोपलं । प्रजिघाय कृतान्तस्य मुष्टिं पृथगिव स्थितं ॥ २१ ॥ ऐन्द्रमस्त्रमुपादाय

२९ शत्रुघ्नेन स तेनाडितः । सिकतात्वादपि परां प्रपेदे परमाणुतां ॥ २२ ॥ तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचरः । एकताल
इवोत्पातपवनप्रेरितो गिरिः ॥ २३ ॥ कार्ष्णेन पत्रिणा शत्रुः स भिन्नहृदयः पतन् । आनिनाय भुवः कंपं जहाराश्र
२३ मवासिनां ॥ २४ ॥ वयसां पंक्तयः पेतुर्हतस्योपरि विद्विषः । तत्प्रतिद्वंद्विनो मूर्ध्नि दिव्याः कुसुमवृष्टयः ॥ २५ ॥ स हत्वा ल
वणं वीरस्तदा मेने महौजसः । भ्रातुः सोदर्यमात्मानमिंद्रजिद्वधशोभिनः ॥ २६ ॥ उपकूले स कालिंद्याः पुरं पौ
रुषभूषणः । निर्ममे निर्ममोर्थेषु मथुरां मधुराकृतिः ॥ २७ ॥ तस्य संस्तूयमानस्य चरितार्थैस्तपस्विभिः । शुशुभे वि
क्रमोदग्रं व्रीडयावनतं शिरः ॥ २८ ॥ या सौराज्यप्रकाशाभिर्बभौ पौरविभूतिभिः । स्वर्गाभिष्यंदवमनं कृत्वेवोप
क्रौद निवेशिता ॥ २९ ॥ तत्र सौधगतः पश्यन्यमुनां चक्रवाकिनीं । हेमभक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये ॥ ३० ॥ सखा द
शरथस्यापि जनकस्य च मंत्रकृत् । संचस्कारोभयप्रीत्या मैथिलेयौ यथाविधि ॥ ३१ ॥ स तौ कुशलवोन्मृष्टगर्भक्लेदौ
तदाख्यया । कविः कुशलवावेव चकार किल नामतः ॥ ३२ ॥ सांगं च वेदमध्याप्य किंचिदुत्क्रांतशैशवौ । स्वकृतिं गा
पयामास कविः प्रथमपद्धतिं ॥ ३३ ॥ इतरेपि रघोर्वंश्यास्त्रयस्त्रेताग्नितेजसः । संयोगात्पतिपत्नीषु पत्नीष्वासन्द्वि अग्नित्रयमिदं त्रेता इत्यमरः ॥२॥
वैर सूनवः ॥ ३४ ॥ शत्रुघातिनि शत्रुघ्नः सुबाहौ च बहुश्रुते । मथुराविदिशे सून्वोर्निदधे पूर्वजोत्सुकः ॥ ३५ ॥ भूयस्तपोव्य
योमार्गं वाल्मीकेरिति सोत्यगात् । मैथिलीतनयोद्गीतनिःस्पंदमृगमाश्रमं ॥ ३६ ॥ वशी विवेश चायोध्यां रथ्यासंस्कारशो २९

लक्ष्मणादयः ॥२॥ स्थापयामास ॥२॥
नगर्यौ ॥२॥

घ्नी । लवणस्स्ववधात्सोरैरध्यगौरवमीप्सितः । ३७ । स ददर्श सभामध्ये सभासद्भिरुपासितं । रामं सीतापरित्यागा
दसामान्यपतिं भुवः । ३८ । तमभ्यनंदत्प्रणतं लवणांतकमग्रजः । कालनेमिवधात्प्रीतस्तुराषाडिव शार्ङ्गिणं । ३ वामनं=२
कुशले=३ ९ । स पृष्टः सर्वतो वार्त्तमाख्यद्राज्ञे न संततिं । प्रत्यर्पयिष्यतः काले कवेराद्यस्य शासनात् । ४० । अथ जानपदो वाल्मीकेः=३
विप्रः शिशुमप्राप्तयौवनं । अवतार्यांकशय्यास्थं द्वारि चक्रंद भूपतेः । ४१ । शोचनीयासि वसुधे या त्वं दशरथाच्च्युता ।
रामहस्तमनुप्राप्ता कष्टात्कष्टतरं गता । ४२ । श्रुत्वा तस्य शुचो हेतुं गोप्ता जिह्राय राघव । नह्यकालभवो मृत्युरिक्ष्वा
कुपदमस्पृशत् । ४३ । स मुहूर्त्तं सहस्वेति द्विजमाश्वास्य दुःखितं । यानं सस्मार कौबेरं वैवस्वतजिगीषया । ४४ । आत्त
विमाने स्थित्वा
शस्त्रस्तदध्यास्य प्रस्थितः स रघूद्वहः । उच्चचार पुरस्तस्य गूढरूपा सरस्वती । ४५ । राजन्प्रजासु ते कश्चिदपचा
रः प्रवर्त्तते । तमन्विष्य प्रशमयेर्भवितासि ततः कृती । ४६ । इत्याप्तवचनाद्रामो विनेष्यन्वर्णविक्रियां । दिशः पपा
त पत्रेण वेगनिष्कंपकेतुना । ४७ । अथ धूमाभिताम्राक्षं वृक्षशाखावलंबिनं । ददर्श किंचित्काकुत्स्थस्तपस्यंतम
धोमुखं । ४८ । पृष्टनामान्वयो राज्ञा स किलाचष्ट धूमपः । आत्मानं शंबुकं नाम शूद्रं सुरपदार्थिनं । ४९ । तपस्यनधि
कारित्वात्प्रजानां तमघावहं । शीर्षच्छेद्यं परिच्छिद्य नियंता शस्त्रमाददे । ५० । स तद्वक्त्रं हिमक्लिष्टकिंजल्कमिव
पंकजं । ज्योतिःकणाहतश्मश्रु कंठनालादपाहरत् । ५१ । कृतदंडः स्वयं राज्ञा लेभे शूद्रः सतां गतिं । तपसा

दुष्करेणापि न स्वमार्गविलंघिना ५२ रघुनाथोप्यगस्त्येन मार्गसंदर्शितात्मना । महौजसा संयुयुजे शरत्कालइवेंदु
ना ५३ कुंभयोनिरलंकारं तस्मै दिव्यपरिग्रहे । ददौ दत्तं समुद्रेणापीतेनेवात्मनिःक्रयं ५४ तं दधन्मैथिलीकं
(निस्स्पर्शेन=२) ठनिर्व्यापारेण बाहुना । पश्चान्निववृते रामः प्राक्परासुर्द्विजात्मजः ५५ तस्य पूर्वोदितां निंदां द्विजः पुत्रसमागतः ।
स्तुत्या निवर्तयामास त्रातुर्वैवस्वतादपि ५६ तमध्वराय मुक्ताश्वं रक्षःकपिनरेश्वराः । मेघाः सस्यमिवांभोभिर
भ्यवर्षन्नुपायनैः ५७ दिग्भ्यो निमंत्रिताश्चैनमभिजग्मुर्महर्षयः । न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयान्यपि
५८ उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ । अयोध्या सृष्टलोकेव सद्यः पैतामही तनुः ५९ श्लाघ्यस्त्यागोपि वैदे
ह्याः पत्युः प्राग्वंशवासिनः । अनन्यजानेः सैवासीद्यस्माज्जाया हिरण्मयी ६० विधेरधिकसंभारस्ततः प्रववृते म
खः । आसन्यत्र क्रियाविघ्ना राक्षसा एव रक्षिणः ६१ अथ प्राचेतसोपज्ञं रामायणमितस्ततः । मैथिलेयौ कु
शलवौ जगतुर्गुरुनोदितौ ६२ वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किन्नरस्वरौ । किं तद्येन मनो हर्तुमलं स्यातां न शृ
ण्वतां ६३ रूपे गीते च माधुर्यं तयोस्तज्ज्ञनिवेदितं । ददर्श सानुजो रामः शुश्राव च कुतूहली ६४ तद्गीतश्रवणैका
ग्रा संसदश्रुमुखी बभौ । हिमनिष्यंदिनी प्रातर्निर्वातेव वनस्थली ६५ वयोवेषविसंवादि रामस्य च तयोस्तदा
जनतावेक्ष्य सादृश्यं नाक्षिकंपं व्यतिष्ठत ६६ उभयोर्न तथा लोकः प्रावीण्येन विसिस्मिये । नृपतेः प्रीतिदानेषु

आलमोले=२
अलंकारं=२

जायंति स्म=५ गुरुणा वाल्मीकिना नोदितौ प्रेरितौ=५

व्रीडापन्ना=१ रूपगीतज्ञेन=२ =सपत्नया=१

वीतस्य हतया यथा ६७ । तयोर्यदनुविज्ञातौ वाक्यचैव कवेः कृतिः । इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंस-
तां ६८ । तत्तदा कर्णाविकण्ठौ रामो राजीवेल्लौ चनः । समहर्षविषादाभ्यां प्रजनेनीतिकोविदः ६९ । अथ सावर-
जो रामः प्राचेतसमुपेयिवान् । ऊरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत् ७० । स तावाख्याय रा-
मस्य मैथिलेयौ तदात्मजौ । कविः कारुणिको वव्रे सीतायाः संपरिग्रहम् ७१ । तात शुद्धा समक्षं नः
स्नुषा ते जातवेदसि । दौरात्म्याद्रक्षसस्तां तु नात्रत्याः श्रद्दधुः प्रजाः ७२ । ताः स्वचारित्रमुद्दिश्य प्रत्याय- २०५
यतु मैथिली । ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया ७३ । इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मु-
निः । शिष्यैरानाययामास स्वसिद्धिं नियमैरिव ७४ । अथेद्युरुत्थ काकुत्स्थः सन्निपात्य पुरौकसः । कवि-
माह्वाययामास प्रस्तुतप्रतिपत्तये ७५ । स्वरसंस्कारवत्यासौ पुत्राभ्यां सह सीतया । ऋचेवोदर्चिषं सूर्यं
रामं मुनिरुपस्थितः ७६ । काषायपरिवीतेन स्वपादार्पितचक्षुषा । अन्वमीयत शुद्धेति शान्तेन वपुषैव

१२ सा ।७७। जनास्तदालोकपथात्प्रतिसंहृतचक्षुषः । स्थिताः अवाङ्मुखाः सर्वे फलिता इव शालयः ।७८। तां
दृष्टिविषये भर्तुर्मुनिरास्थितविष्टरः । कुरु निःसंशयं वत्से स्ववृत्ते लोकमित्यशात् ।७९। अथ वाल्मीकि
अ शिष्येण पुण्यमावर्जितं पयः । आचम्योदीरयामास सीता सत्यां सरस्वतीं ८० । वाङ्मनःकर्मभिः पत्यौ
व्यभिचारो यथा न मे । तथा विश्वंभरे देवि मामन्तर्धातुमर्हसि ।८१। एवमुक्ते तया साध्व्या रंध्रात्सद्योभवा
द्भुवः । शातह्रदमिव ज्योतिः प्रभामंडलमुद्ययौ ।८२। तत्र नागफणोत्क्षिप्तसिंहासननिषादिनी । समुद्ररसना सा
ता०४ क्षात्प्रादुरासीद्वसुंधरा ८३ । सा सीतामंकमारोप्य भर्तृप्रणिहितेक्षणां । मा मेति व्याहरत्येव तस्मिन्पाताल
मभ्यगात् ।८४। अथ कोपान्महीपालो महीनिर्दारणोद्यमं । धिग्धिगित्यालपन्रोषाद्बाणं धनुषि संदधे ।
८५। रसायां तस्य संरंभं सीताप्रत्यर्पणैषिणः । गुरुर्विधिबलापेक्षी शमयामास धन्विनः ।८६। ऋषीन्
विसृज्य यज्ञान्ते सुहृदश्च पुरस्कृतान् । रामः सीतागतं स्नेहं निदधे तदपत्ययोः ।८७। युधाजितस्य संदे २१

शान्त्वदेशं सिंधुनामकं । ददौ दृष्ट्वप्रभावाय भरताय रघूत्तमजः ८८ । भरतस्तत्र गंधर्वान्युधिनि

जित्य केवलं आनीयाश्वगजादयाआसासमस्ता जयदा युधं ८९ । सतत्पुष्कलौ पुत्रौ राजधान्यो

स्तदाख्ययोः अभिषिच्यामिषेकाहौ रामान्तिकमगात्पुनः ९० । अंगदं चन्द्रकेतुं च लक्ष्मणः पार्थि

संभवौ शासनाद्रघुनाथस्य चक्रे काराबधेश्वरौ ९१ । इत्यारोपित पुत्रास्ते जननीनां जनेश्वराः

मर्त्यलोकप्रवल्लाना निवापान्विदधुः क्रमात् ९२ उवेत्य मुनिवेषेण कालः श्रावाचराघवं रहः

संवादितो वयेत्पद्दीवां य स्त्वत्जेरिति ९३ तथेतिप्रतिपल्लाय विदूतात्मान्तपाल्यतः आव

त्वोदिव मेध्वा स्वशासनान्तरमेष्टिनः ९४ विद्वानेपितयोर्द्वास्थ्यः समयं लक्ष्मणोनिनत् भीतो

दुर्वाससः शापात्तु रामसंदर्शनार्थिनः ९५ सगत्वासरयूतीरं देहत्यागेन योगवित् । चकारावित

गर्भ्लक्ष्मणशी ... विपर्ययः ... साधूना ... ९६॥२

३२ यौ भ्रातुः प्रतिज्ञां स्ववंजन्मनः ९६ तस्मिन्नात्मचतुर्भागे तस्मिन्नात्म प्राङ्नाकमधितस्थुषि राघ
वः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव ९७ स निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशं शरावत्यां सतां गो२
सूक्तैर्जनिताश्रुलवं लवं ९८ उदक्प्रतस्थे स्थिरधीः सानुजोऽग्निपुरःसरः अन्वितः पतिवात्सल्या
द्गृहवर्जमयोध्यया ९९ जगृहुस्तस्य चित्तज्ञाः पदवीं हरिराक्षसाः कदम्बमुकुलस्थूलैरभिवृष्टां
प्रजाश्रुभिः १०१ उपस्थितविमानेन तेन भक्तानुकंपिना चक्रे त्रिदिवनिःश्रेणिः सरयूरनुयायिनां १०२ य
द्गोप्रतारकल्पोऽभूत्संमर्दस्तत्र मज्जतां अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे १०३ स विभुर्विबुधांशे
षु प्रतिपन्नात्ममूर्तिषु त्रिदशीभूतपौराणां स्वर्गान्तरमकल्पयत् १०४ निर्वर्त्यैवं दशमुखशिरश्छेदि
कार्यं सुराणां विष्वक्सेनः स्वतनुमविशत्सर्वलोकप्रतिष्ठां लंकानाथं पवनतनयं चोभयं स्थापयित्वा
ले कीर्तिस्तंभद्वयमिव गिरौ दक्षिणे चोत्तरे च १०५ इति श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ स्व
र्गारोहणं नाम पंचदशमः सर्गः १५ ॥ ॥ ॥ ॥ ॥ ३२

॥ अथेतरे सप्त रघुप्रवीरा: ज्येष्ठं पुरोजन्मतया गुणैश्च चक्रुः कुशं रत्नविशेषभाजं
सौभ्रात्रमेषां हि कुलानुसारि १ ते सेतुवार्तागजबंधमुख्यैरभ्युछ्रिताः कर्मभिरप्यवं
ध्यैः । अन्योन्यदेशप्रविभागसीमां वेलां समुद्रा इव न व्यतीयुः २ चतुर्भुजांशप्रभवः स तेषां
दानप्रवृत्तेरनुपारतानां सुरद्विपानामिव सामयोनिर्भिन्नोष्टधा विप्रससार वंशः ३ अथार्द्ध
रात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः । कुशः प्रवासस्थकलत्रवेषामदृष्टपूर्वां वनिता
मपश्यत् ४ सा साधुसाधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात्पुरुहूतभासः । जेतुः परेषां जयश
ब्दपूर्वं तस्यांजलिं बंधुमतो बबंध ५ अथानपोढार्गलमप्यगारं छायामिवादर्शतलं प्रवि
ष्टां । सविस्मयो दाशरथेस्तनूजः प्रोवाच पूर्वार्द्धविसृष्टतल्पः । ६ । लब्धांतरा सावरणेपि
गेहे योगप्रभावो न च लक्ष्यते ते । बिभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागं ७
का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते । आचक्ष्व मत्वा वशिनां रघूणां म

सुप्ताः जनाः यत्र तस्मिन्=५

चतुर्भुजः विष्णुस्तस्यांशो रामादयः प्रभवः उत्पत्तिर्यस्य सः=२

शत्रूणां=५ जयनशीलस्य=५

अर्गलिभिः सहितेन=२

हैमं हिमसंबंधिनं उपरागमिव=२

३२

नः परस्त्रीविमुखप्रवृत्ति ८ तमब्रवीत्सा गुरुणानवद्या या नीतपौरा स्वपदोन्मुखेन त

अलकां कुबेरस्य पुरीं तिरस्कृत्य

स्याः पुरः संप्रति वीतनाथां जानीहि राजन्नधिदेवतां मां ९ वस्वौकसारामभिभूय सा

33

अपि दीना

हं सौराज्यबद्धोत्सवया विभूत्या समग्रशक्तौ त्वयि सूर्यवंश्ये सति प्रपन्ना करुणामव

स्थां १० विशीर्णतल्पाट्टशतो निवेशः पर्यस्तशालः प्रभुणा विना मे विडंबयत्यस्त

कान्तार्थिनी तु या याति संकेतं साभिसारिका इत्यमरः=६

निमग्नसूर्यं दिनांतमुग्रानिलभिन्नमेघं ११ निशासु भास्वत्कलनूपुराणां यः संचरोभू

दभिसारिकाणां नदन्मुखोल्काविचितामिषाभिः स वाह्यते राजपथः शिवाभिः १२ आ

स्फालितं यत्प्रमदाकराग्रैः मृदंगधीरध्वनिमन्वगच्छत् वन्यैरिदानीं महिषैस्तदंभः शृं

वापी

गाहतं क्रोशति दीर्घिकासु १३ वृक्षेशया यष्टिनिवासभंगान्मृदंगशब्दापगमादलास्याः

लास्यं नृत्यं च नर्तने इत्यमरः =४

प्राप्ता दवोल्काहतशेषबर्हाः क्रीडामयूरा वनबर्हिणत्वं १४ सोपानमार्गेषु च येषु रामा नि

मृगैः

क्षिप्तवत्यश्चरणान्सरागान् सद्योहतन्यंकुभिरस्रदिग्धं व्याघ्रैः पदं तेषु निधीयते मे १५

चित्रद्विपाः पद्मवनावतीर्णाः करेणुभिर्दत्तमृणालभंगाः नखांकुशाघातविभिन्नकुंभाः सं ३२

रुधिरेण चित्ते=२

रव्धासिंहप्रहतं वदंति १६ स्तंभेषु योषित्प्रतियातनानामुत्क्रांतवर्णक्रमधूसराणां तन्नू
त्तरीयाणि भवंति संगान्निर्मोकपट्टाः फणिभिर्विमुक्ताः १७ कालांतरश्यामसुधेषु नक्तमि
तस्ततोरूढतृणांकुरेषु तएवमुक्तागुणशुद्धयोपि हर्म्येषु मूर्छंति न चंद्रपादाः १८ आवर्ज्य
शाखाः सदयं च यासां पुष्पाण्युपात्तानि विलासिनीभिः वन्यैः पुलिंदैरिव वानरैस्ताः क्लिश्यंत
उद्यानलता मदीयाः १९ रात्रावनाविःकृतदीपभासः कांतामुखश्रीवियुता दिवापि तिरस्क्रि
यंते कृमितंतुजालैर्विछिन्नधूमप्रसरा गवाक्षाः २० वलिक्रियावर्जितसैकतानि स्नानीयसं
सर्गमनाप्नुवंति उपांतवानीरगृहाणि दृष्ट्वा शून्यानि दूये सरयूजलानि २१ तदर्हसीमां वस कुशावती=५ दुःखिताभवामि=५
तिं विसृज्य मामभ्युपेतुं कुलराजधानीं हित्वा तनुं कारणमानुषीं तां यथा गुरुस्ते परमात्ममूर्त्तिं
२२ तथेति तस्याः प्रणयं प्रतीतः प्रत्यग्रहीत्प्राग्रहरो रघूणां पूरप्यभिव्यक्तमुखप्रसादा शरी द्विजाः=२
रबंधेन तिरोबभूव २३ तदद्भुतं संसदि रात्रिवृत्तं प्रातर्द्विजेभ्यो नृपतिः शशंस श्रुत्वा त
एनं कुलराजधान्याः साक्षात्पतित्वे वृतमभ्यनंदन् २४ कुशावतीं श्रोत्रियसात्स कृत्वा यात्रा

२६

नुकूलेऽहनि सावरोधः। अनुद्रुतो वायुरिवाभ्रवृंदैः सैन्यैरयोध्याभिमुखः प्रतस्थे। २५। साके
तुमालोपवना बृहद्भिर्विहारशैलानुगतेव नागैः। सेना रथोदारगृहा प्रयाणे तस्याभवज्जंग
मराजधानी। २६। तेनातपत्रामलमंडलेन प्रस्थापितः पूर्वनिवासभूमिं। बभौ बलौघः शशि
नोद्धतेव वेलामुदन्वानिव नीयमानः। २७। तस्य प्रयातस्य वरूथिनीनां पीडामपर्याप्तवतीव सो
ढुं। वसुंधरा विष्णुपदं द्वितीयमध्यारुरोहेव रजश्छलेन। २८। उद्यच्छमाना गमनाय पश्चा
त्पुरो निवेशे पथि च व्रजंती। सा यत्र सेना ददृशे नृपस्य तत्रैव सामग्र्यमतिं चकार। २९। तस्य
द्विपानां मदवारिसेकैः खुराभिघातैश्च तुरंगमाणां। रेणुः प्रपेदे पथि पंकभावं पंकोऽपि रेणुत्व
मियाय नेतुः। ३०। मार्गैषिणी सा कटकांतरेषु वैंध्येषु सेना बहुधा विभिन्ना। चकार रेवेव महा
विरावा बद्धप्रतिश्रुंति गुहामुखानि। ३१। स धातुभेदारुणयाननेमिः प्रभुः प्रयाणध्वनिमिश्रतू
र्यः। व्यलंघयद्विंध्यमुपायनानि पश्यन्पुलिंदैरुपपादितानि। ३२। तीर्थे तदीये गजसेतुबंधात्प्र
तीपगामुत्तरतोऽस्य गंगां। अयत्नबालव्यजनीबभूवुर्हंसा नभोलंघनलोलपक्षाः। ३३। स पू
र्वजानां कपिलेन रोषाद्भस्मावशेषीकृतविग्रहाणां। सुरालयप्राप्तिनिमित्तमंभस्त्रैस्रोतसं नौ

२८

तुलितं ववंदे ३४ इत्थं ध्वनन्तः कैश्चिदहोभिरंते कूलं समासाद्य कुशः शरय्वाः । वेदिप्रतिष्ठा
न्वितताध्वराणां यूपानपश्यच्छतशो रघूणां । ३५ आधूय शाखाः कुसुमद्रुमाणां स्पृष्ट्वा च शी
तान्सरयूतरंगान् । तं क्लांतसैन्यं कुलराजधान्याः प्रत्युज्जगामोपवनांतवातः । ३६ अथो
पशल्ये रिपुमग्नशल्यस्तस्याः पुरः पौरसखः स राजा । कुलध्वजस्तानि चलध्वजानि निवेश
यामास बली बलानि ३७ तां शिल्पिसंघाः प्रभुणा नियुक्तास्तथागतां संभृतसाधनत्वात् पु
नर्नवीचक्रुरपां विसर्गान्मेघा निदाघग्लपितामिवोर्वीं । ३८ ततः सपर्यां सपशूपहारां ।
पुरः परार्ध्यप्रतिमागृहायाः । उपोषितैर्वास्तुविधानविद्भिर्निर्वर्तयामास रघुप्रवीरः ।
३९ तस्याः स राजोपपदं निशांतं कामीव कांताहृदयं प्रविश्य । यथार्हमन्यैरनुजीविलो
कं संभावयामास गृहैस्तदीयैः । ४० सा मंदुरासंश्रयिभिस्तुरंगैः शालागृहस्तंभगतै
श्च नागैः । पुराबभासे विपणिस्थपण्या सर्वांगनद्धाभरणेव नारी । ४१ वसन्स तस्यां व
सतौ रघूणां पुराणशोभामधिरोपितायां । न मैथिलेयः स्पृहयां बभूव भर्त्रे दिवो नाप्यलकेश्वरा

निशांतवस्त्यसदनम् इत्यमरः=४

वाजिशाला तु मंदुरा इत्यमरः=३

३५ य ।४२। अथास्य रत्नग्रथितोत्तरीयमेकांतपांडुस्तनलंबहारं । निश्वासहार्यांशुकमाजगाम घर्मः
प्रियावेषमिवोपदेष्टुं ।४३। अगस्त्यचिह्नादयनात्समीपं दिगुत्तरा भास्वति संनिवृत्ते । आनंदशी-
तामिव बाष्पवृष्टिं हिमस्रुतिं हैमवतीं ससर्ज ।४४। प्रवृद्धतापो दिवसोतिमात्रमत्यर्थमेव
35 क्षणदा च तन्वी । उभौ विरोधक्रियया विभिन्नौ जायापती सानुशयाविवास्तां ।४५। दिने दिने शै-
वलवंत्यधस्तात्सोपानपर्वाणि विमुंचदंभः । उद्दंडपद्मं गृहदीर्घिकाणां नारीनितंबद्वयसं बभू-
व ।४६। वनेषु सायंतनमल्लिकानां विजृंभणोद्गंधिषु कुड्मलेषु । प्रत्येकनिक्षिप्तपदः सशब्दं
संख्यामिवैषां भ्रमरश्चकार ।४७। स्वेदानुविद्धार्द्रनखक्षतांके भूयिष्ठसंदष्टशिखं कपोले ।
च्युतं न कर्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात ।४८। यंत्रप्रवाहैः शिशिरैः परीतान्
रसेन धौतान्मलयोद्भवस्य शिलाविशेषानधिशय्य निन्युर्धारागृहेष्वातपमृद्धिमंतः ।४९।
स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायंतनमल्लिकेषु । कामो वसंतात्ययमंदवीर्यः के-
शेषु लेभे बलमंगनानां ।५०। आपिंजरा बद्धरजःकणत्वान्मंजर्युदारा शुशुभेर्जुनस्य । दग्ध्वा
विदेहं गिरिशेन कोपात्खंडीकृता ज्येव मनोभवस्य ।५१। मनोज्ञगंधं सहकारभंगं पुराणशीधुं २५

मैरेयमासवः शीधुरित्यमरः ॥२

नवपाटलं च। संबध्नता कामिजनेषु दोषाः सर्वे निदाघावधिना प्रमृष्टाः। ५२ जनस्य त
स्मिन् समये विगाढे बभूवतुर्द्वौ सविशेषकांतौ। तापापनोदक्षमपादसेवौ स चोदयस्थो न्नृ
पतिः शशी च ५३ अथोर्मिलोलोन्मदराजहंसे रोधोलतापुष्पवहे सरय्वाः। विहर्तुमिच्छा
वनितासखस्य तस्यांभसि ग्रीष्मसुखे बभूव। ५४। स तीरभूमौ विहितोपकार्या मानायिभि
स्तामपकृष्टनक्रां। विगाहितुं श्रीमहिमानुरूपं प्रचक्रमे चक्रधरप्रभावः ५५ सा तीरसोपानपथा
वतारादन्योन्यकेयूरविघट्टिनीभिः। सनूपुरक्षोभपदाभिरासीदुद्विग्नहंसा सरिदंगनाभिः।
५६। परस्पराभ्युक्षणतत्पराणां तासां नृपो मज्जनरागदर्शी। नौसंश्रयः पार्श्वगतां किरातीमुपात्त
वालव्यजनां बभाषे। ५७। पश्यावरोधैः शतशो मदीयैर्विगाह्यमानो गलितांगरागैः। संध्योद
यः साभ्र इवैष वर्णं पुष्यत्यनेकं सरयूप्रवाहः। ५८। विलुप्तमंतःपुरसुंदरीणां यदंजनं नौल
लिताभिरद्भिः। तद्बध्नतीभिर्मदरागशोभां विलोचनेषु प्रतिमुक्तमासां। ५९। एता गुरुश्रोणि
पयोधरत्वादात्मानमुद्वोढुमशक्नुवंत्यः। गाढांगदैर्बाहुभिरप्सु बालाः क्लेशोत्तरं रागवशात्
प्लवंते ६०। अमी शिरीषप्रसवावतंसाः प्रभ्रंशिनो वारिविहारिणीनां। पारिप्लवाः स्रोतसि
निम्नगायाः सेवाललोलांश्छलयंति मीनान्। ६१। आसां जलास्फालनतत्पराणां मुक्ताफल

कूलं रोधश्च तीरं च इत्यमरः ॥ ३
आनायः पुंसि जालं स्यादित्यमरः ॥ ४

२६ स्पर्द्धिषु शीकरेषु । पयोधरोत्सर्पिषु सीर्यमाणः संलक्ष्यते ते न भिदुरोऽपि हारः ६२ आवर्त्तशोभा
न तनाभिकांतेर्भंग्यो भ्रुवां द्वंद्वचराः स्तनानां । जातानि रूपावयवोपमानान्यदूरवर्त्तीनि विलासि
नीनां । ६३ तीरस्थलीवर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनंद्यमानं । श्रोत्रेषु संमूर्छति रक्तमा
36 सां गीतानुगं वारिमृदंगवाद्यं । ६४ संदष्टवस्त्रेष्वबलानितंबेष्विंदुप्रकाशांतरितोडुकल्पाः अ तारकाप्युडु वा स्त्रियामित्यमरः २४
मी जलापूरितसूत्रमार्गा मौनं भजंते रसनाकलापाः । ६५ एताः करोत्पीडितवारिधारा दर्पात्सखी
भिर्वदनेषु सिक्ताः । वक्रेतराग्रैरलकैस्तरुण्यश्चूर्णारुणान्वारिलवान्वमंति । ६६ उद्बंधके
शश्च्युतपत्रलेखो विश्लेषिमुक्ताफलपत्रवेष्टः । मनोज्ञ एव प्रमदामुखानामंभोविहाराकुलि
तोऽपि वेषः । ६७ स नौविमानादवतीर्य रेमे विलोलमाल्यः सह ताभिरप्सु । स्कंधावलग्नोद्धृत
पद्मिनीकः करेणुभिर्वन्य इव द्विपेंद्रः । ६८ ततो नृपेणानुगताः स्त्रियस्ता भ्राजिष्णुना सा
तिशयं विरेजुः । प्रागेव मुक्ता नयनाभिरामाः प्राप्येंद्रनीलं किमुतोन्मयूखं । ६९ वर्णोदकैः
कांचनशृंगसंस्थैस्तमायताक्ष्यः प्रणयादसिंचन् । तथागतः सोऽतितरां बभासे सधातुनिष्यं
द इवाद्रिराजः । ७० तेनावरोधप्रमदासखेन विगाहमानेन सरिद्वरां तां । आकाशगंगार २६

तिर्यक्षु सोभिर्दृतां मकृत्वानं नुजातलीलः। ७१। यत्कुंभयोनेरधिगम्य रामः कुशाय राज्येन समं
जपनेशीलेभूषा
दिदेश। तदस्य जैत्राभरणं विहर्तुरज्ञातपातं सलिले ममज्ज। ७२। स्नात्वा यथाकाममसौ।
सदारस्तीरोपकार्यां गतमात्र एव। दिव्येन शून्यं वलयेन बाहुमुपोढनेपथ्यविधिर्ददर्श। ७३। तत्कालेनेपथ्यानां विधियेन॥२
जयश्रियः संजननं यतस्तदामुक्तपूर्वं गुरुणा च यस्मात्। सेहेस्य न भ्रंशमतो न लोभात्स
तुल्यपुष्पाभरणो हि धीरः। ७४। ततः समाज्ञापयदाशु सर्वानानायिनस्तद्विचये नदीष्णा
न्। वंध्यश्रमास्ते सरयूं विगाह्य तमूचुरम्लानमुखप्रसादाः। ७५। कृतः प्रयत्नो न च देव
लब्धं मग्नं सयस्याभरणोत्तमं ते। नागेन लौल्यात्कुमुदेन नूनमुपात्तमंतर्ह्रदवासिना तत्।
७६। ततः सकृत्वा धनुराततज्यं धनुर्धरः कोपविलोहिताक्षः। गारुत्मतं तीरगतस्तरस्वी।
भुजंगनाथाय समाददेस्त्रं। ७७। तस्मिन्ह्रदः संहितमात्र एव क्षोभात्समाविद्धतरंगहस्तः।
गजेमग्नः
रोधांस्यभिघ्नन्नवपातमग्नः करीव वन्यः परुषं ररास। ७८ तस्मात्समुद्रादिव मथ्यमाना।
दुद्वृत्तनक्रात्सहसोन्ममज्ज। लक्ष्म्येव सार्धं सुरराजवृक्षः कन्यां पुरस्कृत्य भुजंगराजः।
७९। विभूषणं प्रत्युपहारहस्तमुपस्थितं वीक्ष्य विशांपतिस्तं। सोपर्णमस्त्रं प्रतिसंजहार।
शाद्वकारस्तस्यर्थः॥२

३२ प्रकृत्यैनिर्वैधरुषोहिसंतः । ८० । त्रैलोक्यनाथप्रभवंप्रभावात्कुशंद्विषामंकुशमस्त्रविद्वान्
मानोन्नतेनाप्यभिवंद्यमूर्ध्ना मूर्धाभिषिक्तंकुमुदोवभाषे । ८१ । अवैमिकार्यांतरमानुषस्यवि
ष्णोः सुताख्यामपरांतनुंत्वां । सोहंकथंनामतवाचरेयमाराधनीयस्यधृतेर्विघातं । ८२ । करा
37 भिघातोत्थितकंदुकेयमालोक्यबालातिकुतूहलेन । आत्मातिमिकद्योतिरिवांतरिक्षाददत्तजैत्रा
भरणंत्वदीयं । ८३ । तदेतदाजानुविलंबिनातेज्याघाततलेखास्थिरलांछनेन । भुजेनरक्षापरि
घेनभूमेरुपैतुयोगंपुनरंसलेन । ८४ । इमांस्वसारंचयवीयसींमेकुमुद्वतींनार्हसिनानुमं
तुं । आत्मापराधंनुदतींचिरायशुश्रूषयापार्थिवपादयोस्ते । ८५ । इत्यूचिवानुपहृताभरणः
क्षितीशंश्लाघ्योभवान्स्वजनइत्यभिभाषितारं । संयोजयांविधिवदाससमेतवंधुः कन्यामये
नकुमुदः कुलभूषणेन । ८६ । तस्याः स्पृष्टेमनुजपतिनासाहचर्यायहस्तेमंगल्योर्णावलयि
निपुरः पावकस्योच्छिखस्य । दिव्यस्तूर्यध्वनिरुदचरद्व्यश्नुवानोदिगंतान्गंधोदग्रंतदनुववृषुः ।
पुष्पमाश्चर्यमेघाः । ८७ । इत्थंनागस्त्रिभुवनगुरोरौरसंमैथिलेयंलब्ध्वावंधुंतमपिचकुशः पं
चमंतक्षकस्य । एकः शंकामहिपतिरिपोरत्यजद्वैनतेयाच्छांतव्यालमवनिमपरः पौरकांतः श
शास । ८८ । इतिश्रीरघुवंशेमहाकाव्येकविकालिदासकृतौकुमुद्वतीलाभनामषोडशः सर्गः १६ ३२

॥ अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती । पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना १ ।
स पितुः पितृमान्वंशं मातुश्चानुपमद्युतिः । अन्वगात्सवितेवोभौ मार्गावुत्तरदक्षिणौ २ ।
तमादौ कुलविद्यानामर्थमर्थविदां वरः । पश्चात्पार्थिवकन्यानां पाणिमग्राहयत्पिता ।
३ जात्यस्तेनाभिजातेन शूरः शौर्यवता कुशः । अमन्यतैकमात्मानमनेकं वशिनां वशी ।
४ । स कुलोचितमिन्द्रस्य साहायकमुपेयिवान् जघान समरे दैत्यं दुर्जयं तेन चावधि ५ तं
स्वसा नागराजस्य कुमुदस्य कुमुद्वती । अन्वगात्कुमुदानन्दं शशाङ्कमिव कौमुदी ६ तयो
र्दिवस्पतेरासीदेकः सिंहासनार्धभाक् द्वितीयापि सखी शच्याः पारिजातांशभागिनी ७ । त
दात्मसंभवं राज्ये मन्त्रिवृद्धाः समादधुः स्मरन्तः पश्चिमामाज्ञां भर्तुः संग्रामयायिनः ८ ते त मन्त्रिवृद्धाः ८
स्य कल्पयामासुरभिषेकाय शिल्पिभिः । विमानं नवमुद्वेदि चतुस्तम्भप्रतिष्ठितं ९ । तत्रैनं
हेमकुम्भेषु संभृतैस्तीर्थवारिभिः । उपतस्थुः प्रकृतयो भद्रपीठोपवेशितं १० नदद्भिः स्निग्ध
मुखवाद्यैः २२ गंभीरं तूर्यैराहतपुष्करैः अन्वमीयत कल्याणं तस्याविच्छिन्नसंततिः ११ दूर्वायवाङ्कुरप्ल
क्षत्वगभिन्नपुटोत्तरं ज्ञातिवृद्धप्रयुक्तं स भेजे नीराजनाविधिं १२ पुरोहितपुरोगास्तं जि

२६

38

स्नातकश्चाप्लुतव्रतीसम २:२५

र्भजैत्रैरथर्वभिः। उपचक्रमिरे पूर्वमभिषेकं द्विजातयः १३। तस्यौघमहतीमूर्ध्नि निपतं
ती व्यरोचत। सशब्दमभिषेकश्रीर्गंगेव त्रिपुरद्विषः १४। स्तूयमानः क्षणे तस्मिन्नल
क्ष्यत स बंदिभिः। प्रवृद्ध इव पर्जन्यः सारंगैरभिनंदितः १५। तस्य सन्मंत्रपूताभिः स्ना
नमद्भिः प्रतीच्छतः। ववृधे वैद्युतस्याग्नेर्वृष्टिसेकादिव द्युतिः १६। स तावदभिषेकांते
स्नातकेभ्यो ददौ वसु। यावत्तेषां समाप्येरन् यज्ञाः पर्याप्तदक्षिणाः १७। ते प्रीतमनसस्तस्मै
यामाशिषमुदीरयन्। सा तस्य कर्मनिर्वृत्तैर्दूरं पश्चात्कृता फलैः १८। बंधच्छेदं स बद्धा
नां वधार्हाणामवध्यतां। धुर्याणां च धुरो मोक्षमदोहं चादिशद्गवां १९। क्रीडापतत्रिणोप्यस्य
पंजरस्थाः शुकादयः। लब्धमोक्षास्तदादेशाद्यथेष्टगतयोऽभवन् २०। ततः कक्ष्यांतर
न्यस्तं गजदंतासनं शुचि। सोत्तरच्छदमध्यास्त नेपथ्यग्रहणाय सः २१। तं धूपाश्यान
केशांतं तोयनिर्णिक्तपाणयः। आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः २२। तेस्य मुक्ता प्रसाधकाः ८
गुणोन्नद्धं मौलिमंतर्गतस्रजं। प्रत्यूपुः पद्मरागेण प्रभामंडलशोभिना २३। चंदनेनांगरा
गं च मृगनाभिसुगंधिना। समापय्य ततश्चक्रुः पत्रं विन्यस्तरोचनं २४। आमुक्ताभरणः स्र
ग्वी हंसचिह्नदुकूलवान्। आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः २५। नेपथ्यदर्शिनश्छा २६

या। तस्योद्वर्शो हिरण्मये। विरराज नवे स्थैर्ये मेरौ कल्पतरोरिव २६। स राजककुदव्यग्रपाणि
भिः पार्श्ववर्त्तिभिः। ययावुदीरितालोकः सुधर्मानवमां सभां २७। वितानसहितं तत्र भेजे
पैतृकमासनं। चूडामणिभिरुद्घृष्टपादपीठं महीक्षितां २८। बभौ भूयः कुमारत्वादधिरा
ज्यमिवाप्य सः। लेखाभावादुपारूढः सामग्र्यमिव चंद्रमाः २९। शुशुभे तेन चाक्रांतं मंडला
यतनं महत्। श्रीवत्सलक्षणं वक्षः कौस्तुभेनेव कैशवं ३०। प्रसन्नमुखरागं तं स्मितपू
र्वाभिभाषिणं। मूर्त्तिमंतममन्यत विश्वासमनुजीविनः ३१। स पुरं पुरहूतश्रीः कल्पद्रुम
निभध्वजं। क्रममाणश्चकार द्यां नागेनैरावतौजसा ३२। तस्यैकस्योच्छ्रितं छत्रं मूर्ध्नि
तेनामलत्विषा। पूर्वराजवियोगोष्णं कृत्स्नस्य जगतो हृतं ३३। धूमादग्नेः शिखाः पश्चादुद
यादंशवो रवेः। सोऽतीत्य तेजसां वृत्तिं सममेवोत्थितो गुणैः ३४। तं प्रीतिविशदैर्नेत्रैरन्व
युः पौरयोषितः। शरत्प्रसन्नैर्ज्योतिभिर्विभावर्य इवोडुपं ३५। अयोध्यादेवताश्चैनं प्रशस्ता
यतनार्चिताः। अनुदध्युरनुध्येयं सांनिध्यैः प्रतिमागतैः ३६। यावन्नाश्यायते वेदिरभिषे
कजलाप्लुता। तावदेवास्य वेलांतं प्रतापः प्राप दुस्सहः ३७। वशिष्ठस्य गुरोर्मंत्राः सायकास्तस्य
धन्विनः। किं तत्साध्यं यदुभये साधयेयुर्न संगताः ३८। स धर्मस्थसखः शश्वदर्थिप्रत्यर्थि

प्रमादश्च वेतुलवंगात्सामन्तादयः सन्ति सन्नानात्ते क्षिप्रसुखे रहिते तस्मिन्नुक्तं च स्नि यो ऽस्ताः प्रयामानवा क्या रुद्धे च वंचनं महत्त्वं दंडमारुत्ते मर्यादू प्रमाणमेव च स्पति सपदू
प्रमादः=६

२९

नास्वयं । ददर्श संशयच्छेदान् व्यवहारान् नृतां इतः । ३९ ततः परमभिव्यक्तसौमनस्यनिवेदितैः ।
युयोज पाकाभिमुखैर्भृत्यान्विज्ञापनाफलैः । ४० प्रजास्तत्करुणेनघोनभसेवविवर्द्धिताः ।
39 तस्मिंस्तु मन्दयसी रुद्धिं नभस्ये तोयवायवः ॥ ४१ यदुवाच न तन्मिथ्या यद्ददौ न जहार तत् । सोऽभू-
द्गन्धव्रतः शत्रून् नुत्खाय प्रतिरोपयन् ॥ ४२ इत्थं जनितरागास्तु प्रकृतिष्वनुवासरं । अतो
भ्यः सनवो व्यासीद् दृढमूलइवद्रुमः ॥ ४३ अनित्याः शात्रवा वाद्याविप्रकृष्टाश्च ते यतः । अतः
सौम्यतरानि त्यानप्यहृद्यवृम्भजयद्रिपून् ॥ ४४ प्रसादसुमुखे तस्मिन् भ्रुकुटी नापि स्वभावतः । नि-
कषे हेमलेखेव श्रीरासीदनपायिनी ॥ ४५ कातर्यं केवलानीतिः सौर्यं चापलचेष्टितं । अतः स्थि-
तिं समेताभ्यामुभाभ्यामन्वियेषसः ॥ ४६ न तस्य मंडले राज्ञो न्यस्तप्रतिविधिदीधितेः । अदृष्टमं
भूत्किंचिद्धर्मस्येव विवस्वतः ॥ ४७ रात्रिंदिवविभागेषु यदादिष्टं महीक्षिता । तत्सर्वं वियो-
गेषु संविकल्पपराङ्मुखः ॥ ४८ तीक्ष्णादुद्विजते लोको मृदुः सर्वत्र बाध्यते । एतदुध्वा महाराज
मातीक्ष्णो मामृदुर्भवेत् ॥ ४९ मंत्रः प्रतिदिनं तस्य बभूव सह मंत्रिभिः । न जातु सेव्यमानोपि गुप्त
द्वारेण भिद्यते ॥ ५० परेषु स्वेषु च न्तिप्रैरविज्ञातपरस्परैः । सौपसर्पैर्युयोज जागरूकः क्रियाफलं स्व
पन्नपि ॥ ५१ भैक्ष्यमुख्याः समारंभाः गूढशालिसधर्मणः । तस्य गूढं विपेचिरे प्रत्यवेहि निरत्यया प

गर्भशालयः पङ्क्तिः=१ पाकं गताः=१

देहस्यापिनः=६ कामक्रोधलोभमोहहर्षमदमानाः=६ कर्तौरी=७ बाह्यादयो वनचराः पञ्चवः सोपदाः रतिहलायुधः=६

कदाचिदाधंते कदाचित् मंत्री विधते=५

चेचरैः प्रत्येतिपराज्ञानः च तुल्यपदतरे जनाः स्तिः=६ अरिमित्रोदासीनाः=६ ताएवं दीधतयो येनः=६

कदाचिदततः=२

सत्पत्ते सलेन हृदयम् आदिमयतीत्यरत्न ... निरत्ययाः निर्बाधाः=१

वेनोङ्घपनेन=१

अपथ्येन प्रवृत्तेन न जातूपचितोपि सः । हृद्रोन ह्रीमुखेनैव प्रस्थानं तु वलाभसः ॥ ५३ ॥ दुर्गाणि दुर्ग
हाण्यासन्नस्तस्य योद्धुर् विद्विषां । न हि सिंहो गजास्कंदी भयाद्गिरिगुहाश्रयः ॥ ५४ ॥ कामं प्रकृति
वैराग्यं सद्यः शमयितुं क्षमः । यस्य कार्यप्रतीकारः स तन्नैवोपदर्शयत् ॥ ५५ ॥ शक्येष्वेवाभवद्यात्रा त
स्य शक्तिमतः सतः । समीरणसहायोपि नांभःप्रार्थी दवानलः ॥ ५६ ॥ न धर्ममर्थकामाभ्यां ववाधे न
च तेन तौ । नार्थं कामेन कामं वा सोर्थेन सदृशस्त्रिषु ॥ ५७ ॥ हीनान्यनुपकर्तॄणि प्रवृद्धानि विकुर्वते
तेन मध्यमशक्तीनि मित्राणि स्थापितान्यतः ॥ ५८ ॥ परात्मनोर्परिच्छिद्य शक्त्यादीनां वलावलं
ययावेभिर्बलिष्ठश्चेत् परस्मादास्त सोन्यथा ॥ ५९ ॥ कोशेनाश्रयणीयत्वमिति तस्यार्थसंग्रहः ।
अंबुगर्भो हि जीमूतश्चातकैरभिनंद्यते ॥ ६० ॥ परकर्मापहः सोभूदुद्यतः स्वेषु कर्मसु । आवृणो
दात्मनो रंध्रं रंध्रेषु प्रहरन् रिपून् ॥ ६१ ॥ पित्रा संवर्धितो नित्यं कृतास्त्रः सांपरायिकः । तस्य दंडवतो
दंडः स्वदेहान्न व्यशिष्यत ॥ ६२ ॥ सर्पस्येव शिरोरत्नं नास्य शक्तित्रयं परः । स चकर्ष परस्मात्तदय
स्कांत इवायसं ॥ ६३ ॥ वापीष्विव स्रवंतीषु वनेषूपवनेष्विव । सार्थाः स्वैरं तदीयेषु चेरुर्वेश्मस्वि
वाद्रिषु ॥ ६४ ॥ तपो रक्षन् स विघ्नेभ्यस्तस्करेभ्यश्च संपदः । यथास्वमाश्रमैश्चक्रे वर्णैरपि षडंशभा
क् ॥ ६५ ॥ खनिभिः सुषुवे रत्नं क्षेत्रैः सस्यं वनैर्गजान् । दिदेश वेतनं तस्मै रक्षासदृशमेव भूः ।

तीर्थमंत्रगुप्तेहितेनापत्याघ्रप्रतिकृते तत्पर्यंतं दंडनीतिर्निरुच्यते इति कामंदकः=२ एतेषु सर्वेषु साधकफलमापत्यर्थः=२
आप्राहृतं=२

मौलभृत्यकादी संधिविग्रह सामदामादीन्=२ प्रयोक्ता

४० ६६ सबलानां गुणानां च प्रसांप्रत्युरवविक्रमः । बभूवाविनियोगज्ञः साधनीयेषु वस्तुषु ६७
इति क्रमात्प्रयुंजानो दंडनीतिं चतुर्विधां । आतीर्थादप्रतीघातं स तस्याः फलमाददे ६८ कूट
न्यायेन योधिनि युद्धं कुर्वीणः तस्मिन्=२ युद्धविधिज्ञोपि तस्मिन्सन्मार्गयोधिनि भेजेभिसारिकावृत्तिं जयश्रीर्वीरकामिनी ६९ प्रा वीरं कामयते वीरकामिनी जयश्रीः=२
यः प्रतापभग्नत्वादरीणां तस्य दुर्लभः रणो गंधद्विपस्येव दंतभग्नान्यदंतिनः ७० प्रवृद्धौ ही हीनो भवति=४
यते चंद्रः समुद्रोपि तथाविधः स तु तत्समवृद्धिश्च न तयोस्ताविवत्ययं ७१ संतस्तस्याभिगम
लेभिरे=६ नार्दत्यर्थं महतः कृशाः उदधेरिव जीमूताः प्रापुर्दातृत्वमर्थिषु ७२ स्तूयमानः सजिह्राय
स्तुत्यमेव समाचरन् तथापि प्रथे तस्य तत्कारिद्वेषिलोयशः ७३ दुरितं दर्शनेन घ्नंस्तत्त्वार्थे
वर्त्तयन्=६ न नुदंस्तमः प्रजाः स्ववर्द्धयांचक्रे शश्वन्सूर्य इवोदितः ७४ इंदोरगतयः पद्मे सूर्यस्य कुमुदें
आह्लादत्वाद्यः=५ अवकाशं=५ शवः गुणास्तस्य विपक्षेपि गुणिनो लेभिरेंतरं ७५ परामिसंधानपरं यद्यप्यस्य विचेष्टितं जिगीषो
रश्वमेधाय धर्म्यमेव बभूव तत् ७६ एवमुद्यन्प्रभावेन शास्त्रनिर्दिष्टवर्त्मना देवोवृषेव देवानां
परमयोजनार्थत्वात्=२ राज्ञां राजा बभूव सः ७७ पंचमं लोकपालानां तमूचुः साम्ययोगतः भूतानां महतां षष्ठमष्टमं यथा देवाः पौरंदरीं
भूमिधारणत्वात्=२ महेंद्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः विंध्यश्च पारिजातश्च सप्तैते कुलपर्वताः इति विलु=२ कुलभूभृतां ७८ दूरापवर्जितच्छत्रैस्तस्याज्ञां शासनार्पितां दधुः शिरोभिर्भूपाला देवाः पौरं शासनं निर्माल्यं दधते तद्वत्=२
दरीमिव ७९ ऋत्विजः स तथानर्च दक्षिणाभिर्महाक्रतौ यथा साधारणीभूतं नामास्य धनदस्य ४०

बुधाः=२ सोपि दिग्गुणानां साम्यं पृथिव्यादीनां=२

व ॥ ८० ॥ इंद्राद्वृष्टिर्नियमितगदोद्रेकवृत्तिर्यमोऽभूद्यादोनाथः शिवजलपथः कर्मणे नौचरा-
णां । पूर्वापेक्षी तदनुविदधे कोशवृद्धिं कुबेरस्तस्मिन्दंडोपनतचरितं भेजिरे लोकपालाः ॥ ८१ ॥
इति श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ पुत्रेति संग्रहो नाम सप्तदशः सर्गः ॥ १७ ॥
स नैषधस्यार्थपतेः सुतायामुत्पादयामास निषिद्धशत्रुः । अनूनसारं निषधान्नगेंद्रात्
पुत्रं यमाहुर्निषधाख्यमेव ॥ १ ॥ तेनोरुकार्यैः पिता प्रजायै कल्पिष्यमाणेन ननंद यू-
ना । सुवृष्टियोगादिव जीवलोकः सस्येन संपत्तिफलात्मकेन ॥ २ ॥ शब्दादि निर्विश्य
सुखं चिराय तस्मिन्प्रतिष्ठापितराजशब्दः । कौमुद्वतेयः कुमुदावदातैर्द्यामर्जितां
कर्मभिरारुरोह ॥ ३ ॥ पौत्रः कुशस्यापि कुशेशयाक्षः ससागरां सागरधीरचेताः । ए-
कातपत्रां भुवमेकवीरः पुरार्गलादीर्घभुजो बुभोज ॥ ४ ॥ तस्यानलौजास्तनयस्तदंते
वंशश्रियं प्रापनलाभिधानः । यो नड्वलानीव गजः परेषां बलान्यमृद्नान्नलिनाभवक्त्रः ॥
॥ ५ ॥ नभश्चरैर्गीतयशाः स लेभे नभस्तलश्यामतनुं तनूजं । ख्यातं नभःशब्दमयेन

=तस्मिन्=नले=१

४२
41

नाम्नाकोतंनभोमासमिवप्रजानां ६ तस्मैविसृज्योत्तरकौशलानांधर्मोत्तरस्तत्प्रभ
वः प्रभुत्वं मृगैरजर्यंजरसोपदिष्टमदेहबंधायपुनर्बबंध ७ तेनद्विपानामिव
पुंडरीकोराज्ञामजय्योजनिपुंडरीकः शांतेपितर्याहृतपुंडरीकंयंपुंडरीकाक्षमि
वाश्रिताश्रीः ८ सक्षेमधन्वानममोघधन्वापुत्रंप्रजाक्षेमविधानदक्षं क्ष्मांलं
भयित्वाक्षमयोपपन्नंवनेतपःक्षांततरश्चचार ९ अनीकिनीनांसमरेग्रयायी
तस्यापिदेवप्रतिमःसुतोभूत् व्यश्रूयतानीकपदावसानंदेवादिनामत्रिदिवेपि
यस्य १० पितासमाराधनतत्परेणपुत्रेणपुत्रीसयथैवतेन पुत्रस्तथैवात्मज
वत्सलेनसतेनपित्रापितृमान्बभूव ११ पूर्वस्तयोरात्मसमेचिरोढामात्मोद्भ
वेवर्णचतुष्टयस्य धुरंनिधायैकनिधिर्गुणानांजगामयज्वायजमानलोकं १२
वशीसुतस्तस्यवशंवदत्वात्स्वेषामिवासीद्द्विषतामपीष्टः सकृद्विविग्नानपिहिप्र
युक्तंमाधुर्यमीष्टेहरिणान्ग्रहीतुं १३ अहीनगुर्नामसगांसमग्रामहीनबाहुद्रवि

उत्पादितः=२
क्षेमधन्वनः=६
देवानीक इति=६
जितेन्द्रियः=२
देवानीकः=२

स्थाने नलः=१
वने जगाम तपसे=२
देवानीकेन

प्रभुःस्यात=२ निजवाधवानां=२ एकवार=२

ततः शशास सकलां योहीनसंसर्गपराङ्मुखत्वात् युवाप्यनर्थैर्व्यसनैर्विहीनः ॥ १४ ॥ युग्मं ॥
ग्रहीनगुः=२ गुरोः सचिवानंतरमंतरज्ञः पुंसां पुमानाद्य इवावतीर्णः । उपक्रमैरस्खलितैश्चतुर्भिश्चतुर्दि सामदामदंडभेदैः=२
गीशश्चतुरो बभूव ॥ १५ ॥ तस्मिन् प्रयाते परलोकयात्रां जेतर्यरीणां तनयं तदीयं । उच्चैःशि
रस्त्वाज्जितपारिजातं लक्ष्मीः सिषेवे किल पौरिपात्रं ॥ १६ ॥ तस्मादभूद्वीर्यदलाभिधानो द
यान्वितः पद्मदलाभदृष्टिः । कुंदावदातो रिपुदंतिसिंहः पतिः पृथिव्याः कुलकैरवेंदुः ॥ १७ ॥ कुल एव कमलिनी तस्याः इंदुः=५
तस्याभवत्सूनुरुदारशीलः शिलाविधः पट्टविशालवक्षाः । जितारिपक्षोपि विशीलीमु
खैर्यः शालीनतामव्रजदीड्यमानः ॥ १८ ॥ तं मात्मसंपन्नमनिंदितात्मा कृत्वा युवानं यु
वृभोजन=४ वराजमेव । सुखानि सोभुंक्त निरुत्सुकोपरोधि वृत्तं हि राज्ञां मपरुद्धवृत्तं ॥ १९ ॥ तं रागबंधे स्वतंत्र वेष्टितमिव वर्तने=४
ष्विव तृप्तमेव भोगेषु सौभाग्यविशेषभोग्यं । विलासिनीनामरतिक्षमापि जरा वृथा निस्कारणमेव=२
ईषविती=२ मत्सारिणी जहार ॥ २० ॥ हित्वाथ भोगांस्तपसोत्तमेन त्रिविष्टपं प्राप्तवति क्षितीशे तदीत्म
शिलाविधः=१ जः सागरधीरचेताः शशास पृथ्वीं सकलां नसोमः ॥ २१ ॥ उन्नाभ इत्युन्नतनामधेय ॥

इतिराजा=१ प्रसिद्धं=१

ग्मा चारणं=४
तयावोक्तं परेहि विप्रकार्यायः कमीणपारभन्ते स्वयं सोपरुद्ध वृत्तिरव्यातो राजा नसुपपमा भवेत्=२

शिलाविधस्य

४२ स्तस्याथयाथोन्नितनाभिरंध्रः। आसीत्सुतः पंकजनाभकल्पः कृत्स्नस्य नाभिर्नृपमंडलस्य २१ प्रधानभूतः=१

उन्नाभानेतरं=२ ततः परं वज्रधरप्रभावस्तदात्मजः संयति वज्रघोषः। बभूव वज्राकरभूषणायाः पतिः पृथि

४२ व्याः किल वज्रनाभः २२ तस्मिन्गते स्वं सुकृतोपलब्धां तत्संभवं शंखणमर्णवांता उत्खा नामराजानं=२

तशत्रुं वसुधोपतस्थे रत्नोपहारैरुदितैः खनिभ्यः। २४ तस्यावसाने हरिदश्वधामा पित्र्यं प्रप धामतेजो यस्य=८

देपदमश्विरूपः। वेलातटेषूषितसैनिकाश्वं पुराविदो यं व्युषिताश्वमाहुः। २५ आराध्य विश्वे कर्षयिति=५

महेश्वरे=६ श्वरमीश्वरेण तेन क्षितेर्विश्वसमोऽधिजग्मे। पातुं सहो विश्वसहः समग्रां विश्वंभरामात्मज समर्थः=६

मूर्तिरात्मा। २६ अंशे हिरण्याक्षरिपोः स जाते हिरण्यनाभे तनयेन यस्य। द्विषामसह्यः सु

हिरण्यरेता हुतभुक् त्यमरः=५ तरां तरूणां हिरण्यरेतः इव सानिलोऽभूत्। २७ पिता पितॄणामनृणस्तमंते वयस्यनंतानि सु वार्द्धके=५

~~हिरण्यनाभः कीर्तिभिः=४~~ खानि लिप्सुः। राजानमाजानुविलंबिबाहुं कृत्वा कृती वल्कलवान्बभूव। २८ कौशल्य इ नामपुत्रः=४

त्युत्तरकोशलानां पत्युः पतंगान्वयभूषणस्य। तस्यौरसः सोमसुतः सुतोऽभून्नेत्रोत्सवः सोम एष्यापतंगः सूर्यो... नाचिंतामणिः=२

कीर्तिभिः=२ इव द्वितीयः। २९ यशोभिराब्रह्मसभं प्रकाशः स ब्रह्मभूयां गतिमाजगाम। ब्रह्मिष्ठमाधा

य निजेऽधिकारे ब्रह्मिष्ठमेव स्वतनुप्रसूतं। ३० तस्मिन्कुलापीडनिभे विपीडं सम्यङ्महीं

ब्राह्मणभक्तेः=१ ब्रह्मसभापर्यंतं=२ इति प्रसिद्धः=२ मुकुटतुल्ये बाधारहितां

प्रकाशोऽति प्रसिद्धे स्यादित्यमरः=२

शशास तां शासनांकां प्रजाश्चिरं स प्रजसि प्रजेशे नंदुरीनंदजलोद्धितास्ताः २१ पात्री
कृतात्मा गुरुसेवनेन स्पष्टाकृतिः पत्ररथेंद्रकेतोः तं पुत्रिणां पुष्करपत्रनेत्रः पुत्रः समा
रोपयदग्रसंख्यां २२ वंशस्थितिं वंशकरेण तेन संभाव्य भावी स सखा मघोनः उप
स्पृशन्स्पर्शनिवृत्तलौल्यस्त्रिपुष्करेषु त्रिदशत्वमाप २३ तस्य प्रभानिर्जितपुष्करा
गः पौष्यां तिथौ पुष्यमसूत पत्नी यस्मिन्नपुष्यन्नुदिते समग्रां पुष्टिं जनाः पुष्य इव द्विती
ये २४ महीं महेच्छः परिकीर्य सूनौ मनीषिणे जैमिनयेऽर्पितात्मा तस्मात्सयोगादधि
गम्य योगमजन्मनेऽकल्पत जन्मभीरुः २५ ततः परं तत्प्रभवः प्रपेदे ध्रुवोपमेयो ध्रुवसं
धिरुर्वीं यस्मिन्नभूज्ज्यायसि सत्यसंधे संधिर्ध्रुवः सन्नमतामरीणां २६ सुते शिशावे
व सुदर्शनाख्ये दर्शात्ययेंदुप्रियदर्शने सः मृगायताक्षो मृगयाविहारी सिंहादवापद्वि
पदं नृसिंहः २७ स्वर्गामिनस्तस्य तमैकमत्यादमात्यवर्गः कुलतंतुमेकं अनाथदीनाः
प्रकृतीरवेक्ष्य साकेतनाथं विधिवच्चकार २८ नवेंदुना तन्नभसोपमेयं शावैकसिंहेन
च काननेन रघोः कुलं कुड्मलपुष्करेण तोयेन चाप्रौढनरेंद्रमासीत् २९ लोकेन भावी पि

अन्वयकरणस्तेन
पुष्यपरहतं ... पुष्यः ... ज्योतिशास्त्रे
मोक्षाय
अजीजनत्
शिष्यीकृत्य आत्मा येन
अष्टांगयोगसहितः तस्मात् जैमिनेः
एकसंमतत्वात्
बालकः ... यस्मिन् ...
आकेतेन

हस्तिनाक्रामति=२ आधोरणाहस्तिपकाइत्यमरः=२

तुरेव तुल्यः संभावितो मौलिपरिग्रहात्सः । इष्वोऽपि रावन्केलभ्यप्रमाणोऽष्याशाः पुरोवात

४३ 43 मवाप्य मेघः ४० तं राज्यवीथ्यामतिहस्तयंतमाधोरणालंबितमध्यदेशं षड्वर्ष

शीयमपि प्रभुत्वात्प्रैक्षंत पौराः पितृगौरवेण ४१ कामं न सोऽकल्पत पैतृकस्य सिंहा

सनस्य प्रतिपूरणाय तेजोमहिम्ना पुनरावितानात्तेव्याप चामीकरपिंजरेण ४२ तस्मा

स्मादधः किंचिदिवावतीर्णावसंस्पृशंतौ तपनीयपीठं सालक्तकौ भूपतयः प्रसिद्धैर्व

वंदिरे मौलिभिरस्य पादौ ४३ मणौ महानील इति प्रभावादल्पप्रमाणेऽपि यथा न मिथ्या श

ब्दो महाराज इति प्रयुक्तस्तथैव तस्मिन्युयुजेऽर्भकेऽपि ४४ पर्यंतसंचारितचामरस्य क

पोललोलोभयकाकपक्षात् तस्याननादुच्चरितो विवादश्चस्खाल वेलास्वपि नार्णवानां ४५

निर्वृत्तजांबूनदपट्टबंधे न्यस्तं ललाटे तिलकं दधानः तेनैव शून्यान्यरिसुंदरीणां मुखा

नि स स्मेरमुखश्चकार ४६ शिरीषपुष्पाधिकसौकुमार्यः खेदं स यायादपि भूषणेन

नितांतगुर्वीमपि सोऽनुभावाद्धुरं धरित्र्या विभरांचकार ४७ न्यस्ताक्षरामक्षरभूमि

कायां कार्त्स्न्येन गृह्णाति लिपिं न यावत् तावत्फलानि श्रुतवृद्धयोगात्सर्वाण्युपायु

ग्रत्वार्यवनितायां ते जो विशेषात्=२ शालादिनाश्रुत्वोयोगात्=१

Margin notes:

सर्वोस्यसिंहासनं=५

नमस्कुः=६

विकसितमुखं यस्य सः=२

रमणीमारणात्=२

पुलोवपर्यंते=४

सर्वाविपिंगलेन=४

लालास्तेन रंजितौ=५

आदेशः=५

पाराश्रमं=२४२

संस्कृतः खड्गादिमुष्टिः त्सरुरित्यमरः =२

क्रमः स दंडनीतेः ४८ उरस्यपर्याप्तनिवेशभागा प्रौढीभविष्यंतमुदीक्ष्यमाणा संजा
तलज्जेव तमातपत्रछायाछलेनोपजुगूह लक्ष्मीः ४९ अनश्नुवानेन युगोपमान
मबद्धमौर्वीकिणलांछनेन अस्पृष्टखड्गत्सरुणापि चासीद्रक्षावती तस्य भुजेन भू
मिः ५० न केवलं गच्छति तस्य काले ययुः शरीरावयवा विवृद्धिं वंश्या गुणाः खल्वपि
लोककांताः प्रारंभसूक्ष्माः प्रथिमानमापुः ५१ स पूर्वजन्मांतरदृष्टपाराः स्मरन्निवा
क्लेशकरो गुरूणां तिस्रस्त्रिवर्गाधिगमस्य मूलं जग्राह विद्याः प्रकृतीश्च पित्र्याः ५२
व्यूह्य स्थितः किंचिदिवोत्तरार्धमुन्नद्धचूडांचितसव्यजानुः आकर्णमाकृष्टसवाणध
न्वा व्यरोचतास्त्रेषु विनीयमानः ५३ अथ मधु वनितानां नेत्रनिर्वेशनीयं मनसिजत
रुपुष्पं रागबन्धप्रवालं अकृतकविधि सर्वांगीणमाकल्पजातं विलसितपदमाद्यं यौवनं
स प्रपेदे ५४ प्रतिकृतिरचनाभ्यो दूतिसंदर्शिताभ्यः समधिकतररूपाः शुद्धसंतानका
मैः अधिविविदुरमात्यैराहृतास्तस्य यूनः प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ५५
इति श्री रघुवंशे महाकाव्ये कविकालिदासकृतौ वंशावर्णनो नामाष्टादशः सर्गः १८ ॥

धर्मार्थकामस्याधिगमस्य त्रिवर्गस्य मूलं =६

स्वाभाविकी विधिः निर्माणं यस्य =४ रागवल्ली हलता प्रवाल पल्लवं =४

स्वपित्र्याः प्रकृतीः दंडनीतिः =६

नेत्रैर्निर्वेशनीयं विस्तारेण सेव्यं पातुं योग्यं =५ सर्वांगव्यापि ... विलासस्य पदं स्थानं =४

हृदयमपि मालिनी वृत्तं =२

तादृक्ले सर्वांगीणं सर्वांगव्यापकं =४

नियतं संदेहं ... राजकुमाराय दर्शिताभ्यः =५

कृतसापत्नीकं च कुः =२

जितेंद्रियः=२

॥ अग्निवर्णमभिषिच्य राघवः स्वे पदे तनयमग्नितेजसं । शिश्रिये श्रुतवता
४४ मपश्चिमः पश्चिमे वयसि नैमिषं वशी ॥ १ ॥ तत्र तीर्थसलिलेन दीर्घिकास्तल्पमंतरि
तभूमिभिः कुशैः । सौधवासमुटजेन विस्मरन्संचिकाय फलनिस्पृहस्तपः ॥ २ ॥ निरभिलाषः सन्=२
लब्धपालनविधौ न तत्सुतः खेदमाप गुरुणा हि मेदिनी । भोक्तुमेव भुजनिर्जितद्विषा
न प्रसाधयितुमस्य कल्पिता ॥ ३ ॥ सोधिकारमभिकः कुलोचितं काश्चन स्वयमवर्त्तय चकार=५
त्समाः । तन्निवेश्य सचिवेष्वतः परं स्त्रीविधेयनवयौवनोभवत् ॥ ४ ॥ कामिनीसह
चरस्य कामिनस्तस्य वेश्मसु मृदंगनादिषु । ऋद्धिमंतमधिकर्द्धिरुत्तरः पूर्वमुत्स
वमपोहदुत्सवः ॥ ५ ॥ इंद्रियार्थपरिशून्यमक्षमः सोढुमेकमपि स क्षणांतरं । अंतरेव वि
हरन्दिवानिशं न व्यपेक्षत समुत्सुकाः प्रजाः ॥ ६ ॥ गौरवाद्यदपि जातु मंत्रिणां दर्शनं प्रकृ कदाचित्=४
तिकांक्षितं ददौ । तद्गवाक्षविवरावलंबिना केवलेन चरणेन कल्पितं ॥ ७ ॥ तं कृतप्रणत
योनुजीविनः कोमलात्मनखरागरूषितं । भेजिरे नवदिवाकरातपस्पृष्टपंकज
तुलाधिरोहणं ॥ ८ ॥ यौवनोन्नतविलासिनीस्तनक्षोभलोलकमलाश्च दीर्घिकाः । गूढ

(Left margin notes:) ४४ तीर्थसलिलोदकोजोक्रिया मित्यमरः=३ ५५ · लेभे=४ · संस्थाप्य=६ · रोधं चकार=६ · स्रक्चंदनवनितादयः=५ दिवानिशं=४ · नवीदंतं चक्रे=४

(Right margin notes:) विरहवि ४४ हुलत्वाद्द्वारादिविवस्थिता चरणमात्रे दर्शित मित्यर्थः=३

सिषेविरे=२

गुप्तं=२

यथास्यात्तथा॥२ कृत्रिमशोभायांगतामपि सहजशोभया तस्यतां प्रीतिमुपा
पादयन्नित्यर्थः॥२

दीर्घिकाणामंबुभिः आलोडयत् दृढत्

मोहनगृहास्तदंबुभिः सव्यगाहत विगाढमन्मथः ।९। तत्र सेकहृतलोचनांजनैर्धौतराग
परिपाटलाधरैः अंगनास्तमधिकं व्यलोभयन्नर्पितप्रकृतिकांतिभिर्मुखैः ।१०। घ्राण
कांतमधुगंधिवाहिनीः पानभूमिरचनाः प्रियासखः अभ्यपद्यत स वासितासहः पुष्पि
ताः कमलिनीरिव द्विपः ।११। सातिरेकमदकारणं रहस्तेन दत्तमभिलेषुरंगनाः ताभि
रप्युपहृतं मुखासवं सोपिबद्बकुलतुल्यदोहदः ।१२। अंकमंकपरिवर्त्तिनोचिते तस्य
निन्यतुरशून्यतामुभे वल्लकी च हृदयंगमस्वना मंजुवागपि च वामलोचना ।१३।
स स्वयं प्रहतपुष्करः कृती लोलमाल्यवलयो हरन्मनः नर्त्तकीरभिनयातिलंघनीः
पार्श्ववर्त्तिषु गुरुष्वलज्जयत् ।१४। चारुनृत्यविरमेपि तन्मुखं स्वेदभिन्नतिलकं परि
श्रमात् प्रेमदत्तवदनानिलः पिबन्नत्यजीवदमरालकेश्वरौ ।१५। तस्य सावरणदृष्ट
संधयः काम्यवस्तुषु नवेषु संगिनः वल्लभाभिरुपसृत्य चक्रिरे सामिभुक्तविषयाः
समागमाः ।१६। अंगुलीकिसलयाग्रतर्जनं भ्रूविभंगकुटिलं च वीक्षितं मेखलाभिर
सकृच्च बंधनं वंचयन्प्रणयिनीरवाप सः ।१७। तेन दूतिविदितं निषेदुषा पृष्ठतः सुरतवा

एतेन किमुक्तं यद्यप्यसौ समस्ताभिः संबंधात्प्रसक्ताभिः संयोगप्रकारः प्रदर्शितेत दानमतिलंघिनीयवस्त्वा शक्तिमत्वादस्मात्परित्यजान्या नयममिगमिष्यतीति विचार्यरमणीभिर्नि
शेषविशेषकलिताः संभागप्रकारा न दर्शिता इति भावः॥२

अर्पिता दत्ताप्रकृति
कांतिः सहजा शोभा ये
षां तैः॥२
हस्तिनी॥१

अधिक ... सहित॥४

लोचनहस्तपादां ... विन्या
सातलंघनशील अभ्य
थाकर्त्तृशी॥६

सामिअर्द्धंभुक्ताः सामिभु
क्तास्ताद्दशाः विषया ये
षां ते तथा॥२

अवलोकिते॥२ कांचीक
लापैः॥२

तत्र स्मरणमात्रं शीकृतमन्यथात्वात्तत्ताविकभावो दयायेकृयेवित्युक्तिः=२

चित्रे लिखन्=२

प्रणयकलहकुपितत्वेन दुर्लभाः=२

५५

45

पीडयामास=२

वामानाः=६ शय्याया उपरि तत्ने वलैः तस्याः तेस्मीवगलिताः पतिताः श्रुबिंदवो ये पुतैः=६

प्रकटयांचकार=२

मेखलागुणानां स्थानं पदैः स्थानैः=२

स्मराद्बिभ्युः शुश्रुवे प्रियजनस्य कातरं विप्रलंभपरिशंकिनो वचः १८ लोलमेत्य गृहणीप

रिग्रहान्नर्तकीष्वसुलभासु तद्वपुः । वर्त्तिते स्म सकथंचिदालिखन्नंगुलीस्वरलसल्लवर्तिकः

१९ प्रेमगर्वितविपक्षमत्सरादायताच्च मदनान्महीक्षितं । निन्युरुत्सवविधिच्छलेन तं

देव्य उज्झितरुषः कृतार्थतां २० प्रातरेत्य परिभोगशोभिना दर्शनेन कृतखंडनव्यथः

प्रांजलिः प्रणयिनीः प्रसादयन्सोऽदुनोत्प्रणयमंथरः पुनः २१ स्वप्नकीर्तितविपक्षमंग

नाः प्रत्यभैत्सुरवदंत्य एव तं । प्रच्छदांतगलिताश्रुबिंदुभिः क्रोधभिन्नवलयैर्विवर्त्तिभिः २२

क्लृप्तपुष्पशयनांल्लतागृहानेत्य दूतिकृतमार्गदर्शनः । अन्वभूत्परिजनांगनारतं सोऽव

रोधभयवेपथूत्तरं । २३ नाम वल्लभजनस्य ते मया प्राप्य भाग्यमपि तस्य कांक्ष्यते लोलु

पं वत मनो मम मेति तं । गोत्रविस्खलितमूचुरंगनाः २४ चूर्णबभ्रु लुलितस्रगाकुलं

छिन्नमेखलमलक्तकांकितं । उत्थितस्य शयनं विलासिनस्तस्य विभ्रमरतान्यपावृ

णोत् २५ स स्वयं चरणरागमादधे योषितां न तु तथा समाहितः । लोभ्यमाननयनः

श्लथांशुकैर्मेखलागुणपदैर्नितंबिभिः २६ दर्पणेषु परिभोगदर्शिनीर्नर्मपूर्वमनुपृष्ठ

अवारुणं रक्तविगलितालक्तकं सवटपटवासकुंकुमचूर्णि दिनावभ्रुपिंगलवर्णं अनेन व्याप्ततीवहार तमुस्कृतत लत्तेन च कामतेत्रेयपाभ्यानत रतमिदं यदि शियास्या दधोमुख

चतुःपदौ लुतिः तत्का टिं समधिकं स वल्लभः स्यात् वादिकंतस्यितारवरक्ति=४ यदा हन्त स्तहस्तयुगलेन निजपदयोषिदनिकटिरूढव ल्लभ आयतो यदि मनोरधोमुखे धेनुकं

दुगवनमदुरवरीज विनीतकरतं=४

अंगुली खेदचरणेन=२

प्रापयंति स्म=२

कृतानां संपादितानां खंडनव्या प्यात्रयंगाकमलसंगविह ग्रानौत्पत्नव्रीडयातोता=४

सममनीयो परिलुप्तैः=२

तयाच लुलिताभिः केशा द्रुष्टाभिः आविभिर्मीलभि ... कीर्तितत्वेन ... तेयाचयथाकृततस्स=६ नमुक्तासममस्तकीमुनत स्वयमधोमुखी ... मतिति ... महत्तानलुप्त ... बउच्यते ... =४

पश्यान्नागेस्थितः=२

नयनगलकलेलंदंतवासोमुषीतः स्तनयुगललाटं चुंबनस्थानमाहुः दधति जघननाभीमूलके स्थानलं चुंबनस्य तिकर सुलेनुच्चैर्देशसाम्येन लीलाः शतिरहस्ये=२

संभ्रयः च्छाययास्मितमनोज्ञयावधूर्ह्रीनिमीलितदृशाम्बकारसः २७ चुंबने विपरि
भोगदर्शिनीधृतेर्हस्तिरोधिरसनाविघट्टने विघ्नितेछमपि तस्य सर्वतो मन्मथेंधनमभू
द्धूरतं २८ कंठपाक्रमदुबाहुवंधनं न्यस्तपादतलमग्रपादयोः प्रार्थितस्य शयनोत्थि
तं पुवास्तं निषण्णस्य विसर्गचुंबनं २९ प्रेम्णदर्पणतलस्थमात्मनो राजवेषमतिशक्रशो
भितं विप्रियेन सतथा यथा युवा व्यक्तलक्ष्मपरिभोगमंडितं ३० मित्रहस्तमपदिश्य पार्श्व
तः प्रस्थितं तमनवस्थितं प्रिया विद्युतेव शठ पलायनच्छलान्यंजसेति रुरुधुः कचग्रहैः ३१
तस्य निर्दयरतिश्रममालसाः कंठसूत्रमपविध्य योषितः अध्यशेरत वृहद्भुजांतरं पीव
रस्तनविलुप्तकुंकुमं ३२ संगमाय निशि गूढचारिणं चारुदूतिकथितं पुरोगताः वंचयि
ष्यसि कथं तमो वृताः कामुकेति चकृषुस्तमंगनाः ३३ योषितामुडुपतेरिवार्चिषां स्पर्श
निर्वृतिमसाववाप्नुवत् आरुरोह कुमुदाकरोपमां रात्रिजागरपरो दिवाशयः ३४ वे
णुनादशनपीडिताधरा वीणया नखपदांकितोरवः शिल्पकार्यमुभयेन वेदितास्तं वि
जिह्मनयना व्यलोकयन् ३५ अंगसत्त्ववचनाश्रयं मिथः स्त्रीषु नृत्यमुपधाय दर्शयन्
सप्रयोगनिपुणैः प्रयोक्तृभिः संजघर्ष सह मित्रसंनिधौ ३६ अंसलंबिकुटजार्जु

भरतनाचार्यैः सह=१ स्पर्धिचक्के=१

ककुभार्जुनः कुटजो गिरिमल्लि केत्यभिधानचिंतामणिः=१

शाणयकलसीन=२

४६

46

नस्नजस्तस्यनीपरजसां गरागिणः प्राहबिप्रमदवर्द्धिणेष्वं भ्रतत्त्रियादबुविहारविभ्र
मः ३७ विनिहाविशयनेपराङ्मुखी नानुनेतुमवलासतत्वरे अंवकात्तघनशब्दवि
क्कवास्ताविततयविशतीभुजांतरं ३८ कार्त्तिकीबुसवितानहर्म्यभागयामिनीबुलतिलितांग
नासखः अन्वभुंक्तसुरतक्कमापहांमेघमुक्तविशदांसचंद्रिकां ३९ सेकतंचशरदूं
विहंत्वतीश्रोणिविंबमिवहंसमेखलां स्वप्रियाविलसितानुकारिणींसोधजालविवरैर्व्य
लोकयत् ४० मर्मरैरगरुधूमगंधिभिर्व्यक्तहेमरसनैस्तमेकतः जहुराग्रथितमोत्त
लोलुपंहेमनैर्निवसनैःसुमध्यमाः ४१ अर्पितस्तिमितदीपहष्टयोगर्भवेश्मसुनिवात
कुक्षिषु तस्यसर्वसुरतांतरक्षमाःसाक्षितांशिशिररात्रयोययुः ४२ दक्षिणेनपवने
नसंभृतंप्रेक्ष्यचूतकुसुमंसपल्लवं अन्वनेषुरविकीर्तविग्रहास्तंदुरुत्सहवियोगमं
गनाः ४३ तास्वमंकमधुरोप्यदोलयाप्रेबयन्परिजनप्रविद्धया मुक्तरज्जुनिविडं
भयच्छलात्कंठवंधनमवापवाहुभिः ४४ तंपयोधरनिषिक्तचंदनैर्मोक्तिकग्रथि
तचारुभूषणैः ग्रीष्मवेषविधिभिःसिषेविरेश्रोणिलंबिमणिमेखलैःप्रियाः ४५ यत्समु
न्नसहकारमासवंरक्तपाटलसमागतंपपौ तेनतस्यमधुनिर्गमात्कृशः चित्तयोनिर

मनोज्ञरसणीयुक्तः=२

मलयशैलानिलेन=६

सोढुमशक्यंवियोगोय
स्य=५

४६

वातरहिताःकुक्षयमध्य
भागायासां=६

रक्तपाटलपुष्पैःसमागतंमिलितं=२

कारणेन=१

भवत्सुनर्नवः ४६ एवमिंद्रियसुखानि निर्विशन्नन्यकार्य्यविमुखः स पार्थिवः आत्म
लक्षणनिवेदितान्ऋतून्नत्यवाहयदनंगतत्परः ४७ तं प्रमत्तमपि न प्रभावतः शेकुरा
क्रमितुमन्यपार्थिवाः आमयस्तु रतिरागसंभवो दक्षशापइव चंद्रमक्षिणोत् ४८ द
ष्टदोषमपि तन्नसौ त्यजत्संगवस्तु भिषजामनाश्रवः स्वादुभिस्तु विषयैर्हृतस्ततो दुःख
मिंद्रियगणो हि वार्य्यते ४९ तस्य पांडुवदनाल्पभूषणा सावलंबगमना मृदुस्वना राजय
क्ष्मपरिहानिराययौ कामयानसमवस्थया तुलां ५० व्योमपश्चिमकलास्थितेंदु वा पंककोष
मिव घर्मपल्वलं राज्ञि तत्कुलमभूत्क्षयातुरे वामनार्चिरिव दीपभाजनं ५१ बाढमेषु दि
वसेषु पार्थिवः कर्म साधयति पुत्रजन्मने इत्यदर्शितरुजोस्य मंत्रिणः शश्वदूचुरघशंकि
नीः प्रजाः ५२ स त्वनेकवनितासखोपि सन्पावनीमनवलोक्य संततिं वैद्ययत्नपरिभावि
नं गदं न प्रदीप इव वायुमत्यगात् ५३ तं गृहोपवन एव संगताः पश्चिमक्रतुविदा पुरोधसा
रोगशांतिमपदिश्य मंत्रिणः संभृते शिखिनि गूढमादधुः ५४ तैः कृतप्रकृतिमुख्यसंग्रहै
राशु तस्य सहधर्मचारिणी साधु दृष्टशुभगर्भलक्षणा प्रत्यपद्यत नराधिपश्रियं ५५ तस्या

स्तथाविधनरेंद्रविपत्तिशोकादुष्णैर्विलोचनजलैः प्रथमाभितप्तः निर्वापितः कनककुंभमु
खोज्झितेन वंशाभिषेकपयसा शिशिरेण गर्भः ५६ तं भूत्यर्थं प्रसवसमयाकांक्षिणीनां प्रजाना
मंतर्गूढं क्षितिरिव ततो बीजमुष्टिं दधाना मौलैः सार्द्धं स्थविरसचिवैर्हैमसिंहासनस्था रा
ज्ञी राज्यं विधिवदशिषद्भर्तुरव्याहताज्ञा ५७ इति श्रीरघुवंशे महाकाव्ये कविकालिदास
कृतौ वंशप्रतिबंधो नामैकोनविंशतितमः सर्गः १९ संवत्सरे नागनागविधुमाने मासि वै
शाखके पक्षे श्यामलके पितामहतिथौ वारे बुधे बुद्धिदे साभाचंडिगणेशदत्तविदुषात्रालेखितो
राणिकौ ग्रंथोयं रघुवंशनाम सुमहान्काव्यश्चमत्कारकः १ ॥ ॥ ॥ ॥

४७
मंत्रिभिः =२
शास्त्रोक्तप्रकारेण =४
पालयामास =४
47

४७